Shree Raghunath Sanskrit Research Institute Library,
Jammu

No. २७१८

Title भगवद्गीता १८ टीका सहिता अष्टमोऽध्यायः

Author श्रीसूर्यपण्डितः

Extent १४८ Age

Subject वेदान्तशास्त्र

23

अष्टमाध्याय

शंकरभाष्य
आनंदगिरि टीका
श्रीधरी स्वामिकृता
पिशाचभाष्य
रामानुजभाष्य
अभिनवगुप्ती
परमार्थप्रपा
वनमाली
उत्तमवैजयन्ती
मधुसूदनी
सदानंदी
नीलकंठी
आनंदी
रामकंठी
लासिकी
पंचोली ॥

भाषा अनुवाद ॥

अर्जुनउवाच किन्तद्ब्रह्मकिमध्यात्मं किंकर्म्मपुरुषोत्तम अधिभूतञ्चकिंप्रो क्तमधिदैवंकिमुच्यते ।

शाङ्करभाष्यटीका

तेब्रह्मतद्विदुःकृत्स्नमित्यादिना भगवतार्ज्जुनस्य प्रश्नबीजानि उपदिष्टानि अतस्तत्प्रश्नार्थं अर्ज्जुनउवाच ।

आनन्दगिरिकृतटीका

सप्तमाध्यायान्ते येषामन्तगतं पापमित्यादिना येषां ब्रह्मादीना मनुसन्धानमुक्तं यच्च प्रयाणकालेभगवतः स्मरणं दर्शितं तदिदं जिज्ञासमानः सन् पृच्छतीति प्रश्नसमुदायमवतारयति तेब्रह्मेति प्रश्नबीजानि तद्विषयभूतानि ब्रह्मादीनि वस्तूनीति यावत् उपक्षिप्तविषयप्रतिलम्भानन्तरं तेषां प्रश्न द्वारा निर्णयार्थमाह अत इति यदुक्तं तेब्रह्मतद्विदुरिति तत् किं सोपाधिकंनिरुपाधिकं वाब्रह्मशब्दस्योभयत्रापिसमत्वादितिम त्वाह किंतदिति यच्चोक्तं कृत्स्नमध्यात्ममिति तत्रात्मानं देहमधि कृत्यतस्मिन्नधिष्ठाने तिष्ठतीत्यध्यात्मशब्देन श्रोत्रादिकरणग्रामो वा प्रत्यग्भूतं ब्रह्मैव वा विवक्षितमित्याह किमध्यात्ममिति वि ज्ञानं यज्ञं तनुते कर्म्माणि तनुतेपि चेतिश्रुतौ कर्म्मणोद्वैविध्य निर्द्धारणात् कर्मवाखिलमित्यत्र कर्म्मगृहीतमिति पृच्छति कि मिति क्षराक्षराभ्यांकार्य्यकारणाभ्यां अतीतस्य भगवतो नकि ञ्चिद्वेद्यमस्तीति सूचयति पुरुषोत्तमेति साधिभूताधिदैवमि त्यत्राधिभूतशब्देनपृथिव्यादिषु भूतेषुवर्त्तमानं किञ्चिदेव गृह्य ते किम्वा समस्तमेव कार्यमिति निर्द्धारयिषया पृच्छति अधि

गी·
टी· अ·

भूतमिति अधिदैवमितिच दैवतविषयमनुध्यानं वा दैवते
षादित्यमण्डलादिषु वर्तमानं चैतन्यं वा जिघृक्षितमिति प्रश्ना
न्तरं प्रष्टौति अधि दैवमिति १

स्वामिकृतटीका

ब्रह्मकर्माधिभूतादिविदुः कृत्स्नकेवतमः इत्युक्तं ब्रह्मकर्मादिस्वरूपम
जानते एवं व्याख्यातं भगवतोपक्षिप्तानां ब्रह्माध्यात्मादिसप्तानां पदार्था
नां तत्त्वं जिज्ञासुरर्जुन उवाच किं तद्ब्रह्मेति द्वाभ्यां १ स्पष्टोर्थः

पिशाचभाष्यटीका

ते ब्रह्म तद्विदुः कृत्स्नमित्यादिना भगवतार्जुनस्य प्रश्नबीजान्युप्ता
नि तानि श्रुत्वा तत्प्रश्नार्थमर्जुन उवाच किं तद्ब्रह्मेत्यादिना १ ॥

रामानुजभाष्यटीका

सप्तमेपरस्यब्रह्मणोवासुदेवस्यसर्वेशस्यनिखिलचेतनाचेतनव
स्तुशेषित्वंकारणत्वमाधारत्वंसर्वशरीरतयासर्वप्रकारत्वेनसर्व
शब्दवाच्यत्वंसर्वनियन्तृत्वंसर्वैश्चकल्याणगुणैरेकाश्रयत्वंचसत्वर
जस्तमोमयैर्देहेन्द्रियत्वेनभोग्यत्वेनचावस्थितैर्भावैरनादिकालप्रवृ
त्तदुष्कृतप्रवाहहेतुकैस्तस्यतिरोधानमत्युत्कृष्टसुकृतहेतुकभ
गवत्प्रपत्त्यावतन्निवर्तनंसुकृततारतम्येनचप्रपत्तिविशेषादैश्व
र्याक्षरयाथात्म्यभगवत्प्राप्त्यपेक्षयोपासकभेदंभगवत्प्रियत्वा पासना
निस्युक्ततैकभक्तितयाचात्यर्थंपरमपुरुषप्रियत्वेनचश्रेष्ठ्यं।
दुर्लभत्वंचप्रतिपाद्यपक्षत्रयाणांज्ञातव्योपादेयभेदांश्चप्रस्तौतीत १

अभिनवगुप्तकृतटीका स्पष्टार्थ १

परमार्थप्रपाटीका

एवं व्याख्यातं भगवदुपक्रान्तमध्यात्मप्रभृतिसप्तप्रकाराणां स्वरू
पं जिज्ञासुरर्जुनः पृच्छति किं तदिति द्वाभ्यां तत्र पूर्वपद्ये स्पष्टार्थं ।

वनमालीटीका

मुमुक्षूणां सदा ज्ञेयं मनोक्षं प्राप्यमैश्वरं सक्तं पंचवीतीदं मुक्तामुक्तपदैरिः स योद्ध
मर्मा ते समयप्राप्ते यत्वेत भगवतोक्तानामृतानमर्जुनः पृच्छति तद्ब्रह्म किं
परं ब्रह्म वेदादिकं [illegible] वा यद्यपि वासुदेव एव ब्रह्मेति ज्ञानात्स्य व[illegible]त
थापि मां विदुरित्युक्ते ब्रह्म तद्विदुरिति पाठे संदेहात्तथा प्रकृतेः परं ब्रह्म वक्ता
त्मकं भगवतोऽक्षरमन्यदिति भवति संदेहः आत्मा नं देहमपि किं आत्मत्वेन माने
श्रोत्रादिजीवो वा कर्म किं ज्योतिष्टोमादिकं परेशकर्तृकं जगत्सर्जनादिरू
पं वा [illegible] अपि भूतमुतयत् किं चित्कार्यं समस्तमेव वा का[illegible]यं ज्ञातं अपिदेव
हिरण्यगर्भो यद्वा परं ब्रह्म प्राप्यतया मुमुक्षुरेयं अध्यात्मं जीवतत्त्वमपि
विवेचनायशेयं कर्म जगत्सर्जनात्मं ज्ञेयं तज्ज्ञानस्य भक्तिवर्द्धकत्वात् अ
धिभूतं च प्राप्यतयाशेयं अपिदैवं हिरण्यगर्भो मोक्षप्रापकत्वादुरुत्वे
न ज्ञेयः सपतान् ब्रह्म गमयतीति श्रुतेरितितत्त्वमः १ ॥

अथ मवैजयन्ती टीका ॥

एवं तावत्सप्तमेऽध्याये सर्वेश्वरः परब्रह्मणो वासुदेवस्य पार्थसारथेर्भग
वतः क्षराक्षरस्य प्रकृतिद्वयात्मकस्य सर्वकारणत्वं सर्वनियंतृत्वं सर्वेश्वरत्वं सर्व
शब्दवाच्यत्वमनंतमंगलगुणगणाश्रयत्वं च बहुविधानामधिकारिणां नि
ष्कामत्वेन श्रेष्ठत्वं तस्य दुर्लभत्वं च श्रयाणामपि तेकजन्मकृतपुण्यपुंज
लभ्यत्वं मत्प्रपत्तेव प्राकृतविषयकामनिवृत्तित्वं ज्ञानप्राप्तिं च प्रतिपा
द्येदानीमष्टमेऽध्याये एवं ध्याया अन्ते जरामरणमोक्षाय यतिश्लोकद्वयेनार्था
र्थिद्वयाणामुपादेयान् ब्रह्मादीन् सप्त प्रश्नान् जिज्ञासुरर्जुनो भगवंतं
पृच्छति स्म किं तद्ब्रह्मेति द्वाभ्यां किं तद्ब्रह्म जरामरणमोक्षाय सर्वेश्वरं त्वा
प्रपद्यमानानां ज्ञातव्यत्वेन यदुक्तं तद्ब्रह्म किं परमात्मरूपं वा जीवा
त्मरूपं वा किमध्यात्मैश्वर्यप्राप्तिकामानां ज्ञातव्यतया यदुक्तं तदध्या
त्मं किं श्रोत्रादीन्द्रियगणो वा स्वात्मभूतगणो वा किं कर्म जरादिमोक्षाय
यतमानानां कर्तव्यं यत्तत्कर्म किं लौकिकं वैदिकं वा च पुनः अधिभूतं किं
प्रोक्तं ऐश्वर्यार्थिनां ज्ञातव्यं तदधिभूतं किं भूतान्यधिकृत्य वर्तते इ
ति भूतमत्तेचेष्टादिकार्यं वा स्थूलशरीरं वा प्रोक्तं कथितं त्वया च पुनः अ
धिदैवं किमुच्यते ऐश्वर्यार्थिना ज्ञातव्यं यत्तदधिदैवं किं देवताविषय
कमनुध्यानं वा समष्टिविराड्वा उच्यते कथ्यते पुरुषोत्तमेति सम्बोधनेना
वयोर्वयःकुलधर्माचाराध्ययनगुरुदेवद्विजसेवादीनां ज्ञानोत्पत्तिकार

पूर्वाध्यायान्तेते ब्रह्म तद्विदुः कृत्स्नमध्यात्ममित्यादिना सार्द्धश्लोकेन सप्तपदार्था ज्ञेयत्वेन भगवता सूचितास्तेषां वृत्तिस्थानीयोयमष्टमोध्याय आरभ्यते तत्र सूचितानि सप्तवस्तूनि विशेषतो बुभुत्समानः श्लोकाभ्याम्

गी॰ टी॰ प्र॰ एतांसमानत्वेपिसर्वेश्वरस्यतवसर्वज्ञत्वात्त्वेववस्तुजातंविदितमस्तिजीव
स्यममतुस्वल्पज्ञत्वान्नकिंचिद्विदितमतस्त्वंमावेदितिसूचितम् ।

मधुसूदनी टीका ॥

२ तत्ज्ञेयत्वेनोक्तंब्रह्मकिंसोपाधिकंनिरुपाधिकंवा एवमात्मानंदेहमधि
कृत्यतस्मिन्नधिष्ठानेतिष्ठतीत्यध्यात्मंकिंश्रोत्रादिकरणग्रामोवाप्रत्यक्
चैतन्यंवा तथाकर्मचाखिलमित्यत्रकिंकर्मयज्ञरूपमन्यद्वाविज्ञानंयज्ञं
तनुतेकर्माणितनुतेपिचेतिश्रुतौहिविध्यश्रवणात्त्वममचसमत्वात्क
थंतंमांहब्रूसीतिशंकामपनुदन्सर्वेषुपक्षेषुः उत्तमस्यसर्वज्ञस्यतवन
किंचिदज्ञेयमितिसंबोधयन्नेनसूचयति हेपुरुषोत्तमेति अधिभूतंचकिं
श्रोत्रंस्पृश्यादिभूतमधिकृत्ययत्किंचित्कार्यमधिभूतपदेनविव
क्षितं किंवासमस्तमेवकार्यजातं चकारःसर्वेषांप्रश्नानांसमुच्चयार्थः अ
धिदैवंकिमुच्यतेदेवताविषयमनुध्यानंवा सर्वदैवतेष्वादित्यमंडलादि
ष्वनुस्यूतंचैतन्यंवा ।१॥

सदानंदी टीका ॥

यशोभूतिर्धर्मोविषयविरतिः श्रीःस्फुतिमतिर्गुणाःसाकल्येनप्रभवतिस
दायत्रविमलाप्रतिष्ठासशाश्वाभगवतिपदेनिरूप्यमेश्रयेहकुसलत्र्याश्रि
तममरवरस्यैश्वमुनिभिः सप्तमांतेपदार्थायेहरिणासमसूचिताःश्रुतिनी नि॰
यएतेषामयुनारभ्यतेष्टमः नुपलभ्यार्जनःप्रश्नवीजंकृत्स्नोपदेशानः स्वा॰
एछुतिस्महरिंसमपदार्थज्ञानसिद्धये ज्ञेयत्वेनेरितंब्रह्मकिंतत्सोपा
धिकंत्वया किंनिरुपाधिकंवोक्तंतथाध्यात्मंकिमुच्यते श्रोत्रादिक
रणग्रामःप्रत्यक्चैतन्यमेववातथाकर्मकिमप्रोक्तंयज्ञरूपमथाप
रंविज्ञानंतनुतेयज्ञंकर्माणितनुतेपिच इत्यत्रश्रुति
वाक्येपिहिविध्यकर्मणःस्मृतेकिंतेसर्वज्ञमस्याज्ञातंवापुरुषोत्तम
अधिभूतपदेनोक्तंकिंकार्यपांचभौतिकं किंवासमस्तमेवोक्तंकार्यजा
तंहिमायिकं अधिदैवमनुध्यानंदेवताविषयंचकिं किंवानुस्यूतचैत
न्यंसूर्यादिमंडलादिषु ।१॥

नीलकंठी टीका ॥

पूर्वस्मिन्नध्यायेमायोपहितंब्रह्मजगत्कारणमुक्तंतच्चउत्तमानामनु
पायित्वब्रह्मप्रतिपत्तौउपलक्षणंमध्यमानामुपास्यंचेतिमत्वाप्रतिपन्नंब्र
ह्मतद्विषयप्रकः उपासनाविषयाश्चषट्पदार्थाःसप्तमप्रश्नविषयास्तेब्रह्मतद्वि
दुरित्यध्यायांतेसार्धश्लोकेनभगवतासूचितास्तन्निरूपणोयमध्यायआर
भ्यते तत्रसूचितानांब्रह्मादिशब्दानामर्थंबुभुत्सुरर्जुनउवाच किंतद्ब्र
ह्मब्रह्मेतिप्रथमःप्रश्नः शेषःस्पष्टार्थःश्लोकः १

आनंदीटीका

एतदेवंपरमेश्वरस्यप्रागुद्दिष्टंवाक्यलक्षणपितद्ब्रह्मप्रथमंसर्वोपिष्टा
न्तंतयाप्राप्तंपरमेश्वरस्वरूपलक्षणं निरूप्यप्राप्तावसरेंऽत्रकालस्वरूप
लक्षणीयं तत्रातीताध्यायान्तेयोगिनांदेहोत्क्रान्त्युपक्रमेसाधिभूता
द्योयेपदार्थाउपन्यस्तास्तांस्तत्त्वतोज्ञातुमर्जुनउवाच किंतद्ब्रह्मकिं
मध्यात्मेति प्रश्नप्रश्नार्थःसुगमः १

रामानुजीटीका

अथसप्तमेध्यायेप्रतिपादितज्ञानविदोभक्तिलक्षणविज्ञानविशारदात्र
ब्रह्मादीन्प्रकारान्विदुरितियदुक्तं ततस्तेषांप्रकाराणांसंजातस्वरूप
२ जिज्ञासुरर्जुनउवाच प्रश्नवाक्यान्येतानिगतार्थानि किंतत्किंतदितित
च्छब्दस्यायमभिप्रायः यद्भगवतोक्तमध्यायेषुतेषुप्रकारेषु किंतद्ब्रह्म
कःप्रकारोब्रह्मस्वरूपःकश्चाध्यात्मस्वरूपइतिविभागजिज्ञासारूपः १

वल्लभीटीका

गेपूर्वाध्यायेउद्दिष्टानांब्रह्माध्यात्मादिपदार्थानांलक्षणंबुभुत्सयार्जु
नउवाच किंतद्ब्रह्मेत्यादि स्पष्टार्थं १

पैठोलीटीका

सप्तमाध्यायांतेतेब्रह्मतद्विदुःकृत्स्नमित्यादिनाभगवतार्जुनस्य
प्रश्नवीजानिउपन्यस्तानिअतःतत्प्रश्नार्थं किंतद्ब्रह्मेतिद्वाभ्यांहेपुरु
षोत्तमतद्ब्रह्मकिंतदध्यात्मंकिंकिंकर्मअधिभूतंकिंप्रोक्तंअधिदैवंकिं
उच्यते १

श्रीकार्तवीर्यार्जुनायनमः अथसप्तमाध्यायप्रतिपादित
स्वजात्युचितकर्मकर्तव्यताविषयकनिश्चयलक्षणज्ञान
तत्त्वज्ञाभगवद्भक्तिलक्षणविज्ञानविषयके ब्रह्मादीन्प्रका
रान्विदुरितियद्भगवतोक्तं तत्रतेषांप्रकाराणांसंज्ञातस्वरूप
जिज्ञासोर्जुनउवाच किंतद्ब्रह्मेति सप्तार्थोयंश्लोकः किंतयद्ब्र
ह्मेत्युपदिष्टंकिंतत् कतमोब्रह्मस्वरूपः प्रकारइति यच्छब्दा
ध्याहारेणसमन्वयः अयंभावः किंब्रह्मेत्येतावन्मात्रेणैवब्रह्म
स्वरूपजिज्ञासात्मकप्रश्नेसिद्धे तच्छब्देनैतदुच्यते यदुक्ता
वतामन्योपायनुजनयेस्वजातिविहितकर्मणिप्रवृत्तनयेवानेके
तत्त्वज्ञानप्रकाराउपदिष्टप्रायास्तेपृच्छकः प्रकारोब्रह्मस्वरूपः
कश्चाध्यात्मस्वरूपइति तवचममवगमवाकथमावेष्ट
सीतिमांकामयनुदत्सर्वपुरुषेभ्यउत्तमस्यसर्वज्ञस्यतवन
किंचिदज्ञेयमस्तीत्यभिप्रायेणसंबोधयति पुरुषोत्तमेति
१॥

मधुभाष्य

मधुसूदनकालकर्तव्यगत्याद्यस्मिन्नध्यायेउपदिशति परमम
क्षरंब्रह्मवेदान्तेषूक्ताव्याहृत्यर्थमेतत् आत्मन्यधिपतद्ध्या
त्मं आत्मात्मिकारेयत्तदितिवा तथाहिमेव स्वभावः स्वा
त्मेभावइतिस्मृत्यत्याजीवोवास्वभावः सर्वदास्त्येवैकप्र
कारेणेतिभावः अंतःकरणादिव्याहृत्यर्थोभावग्राहः नप्र
कप्रकारेणस्थितिरंतःकरणादेः विकारित्वात् स्वस्वप्रवृत्तिस्थ
रव्याहृत्यर्थः भूतानांजीवानांभावानांजडपदार्थानांवोद्भव
करेश्वरक्रियाविसर्गः विशेषेणसर्जनंविसर्गइत्यर्थः भूतानि

सशरीरान् जीवानधिकृत्य यत्तदधिभूतं क्षरो भावः वि
नाशिकार्यपदार्थः अव्यक्तांतर्भावेपि तस्याप्यन्यथाभा
वाख्यो विनाशोस्त्येव तथोक्तं अव्यक्तं परमे व्योम्नि निष्क्रि
ये संप्रलीयत इति तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तमे
ति च विकारो व्यक्तजन्मादीति च स्कांदे पुरिशयनमस्तु कथो
जीवः स च संकर्षणो ब्रह्मा वा स सर्वदेवानधिकृत्य पतिरि
त्यधिदैवतं देवाधिकारस्थ इति वा सर्वयज्ञभोक्तृत्वाद्देवोधि
यज्ञः अन्योधियज्ञोस्यादिः प्रसिद्ध इति देहविशेषणं भो
क्तारं यज्ञतपसां त्रैविद्या मां येप्यन्यदेवताभक्ताः एतस्य वा
अक्षरस्य प्रकाशने गार्गि ददतो मनुष्याः प्रशंसंति यजमा
नं देवा इत्यादेः कुतोस्य ध्रुवः स्वर्गः कुतो नैश्रेयसं पदमि
त्यादिपरिहाराच्च मोक्षधर्मे भगवांश्चैव तद्भोक्ता देवोधि
यज्ञत्वं सिद्धमिति कथमित्यस्य परिहारार्थः पृथगुक्तः सर्व
प्राणिदेहस्थरूपेणाधियज्ञः अत्रेति स्वदेहनिर्देशस्यार्थं न हि
तदेश्वरस्यानियम्यत्वं पृथगस्ति नाघोक्तं ब्रह्मभगवतोन्यत्
तेब्रह्मेत्युक्ता साधिभूताधिदैवं मां साधियज्ञं च ये विदुरिति
प्रकरणाभावात् तस्यैव प्रश्नात् साधियज्ञमिति भेदप्रतीतेः त
न्निर्दिशत्यर्थमधियज्ञोहमित्युक्तं मामित्यभेदसिद्धेश्चान्तरमि
त्येवोक्तं भाद्रवगीताकल्पे देहस्थविष्णुरूपाणां त्वधियज्ञ
इतीरितः कर्मेश्वरस्य स्वरूपाख्यं तच्चापीक्षा यमुच्यते अधि
भूतं जडं प्रोक्तमध्यात्मं जीव उच्यते हिरण्यगर्भोधिदैवं देवः
संकर्षणोपि वा ब्रह्मा नारायणो देवः सर्वदेवेश्वरेश्वर इति
यथाप्रतीतं वा सर्वमत्र नैव निषिध्यत इति स्कांदे च आत्माभि
मानाधिकारस्थितमध्यात्ममुच्यते देहद्वयं विना जीव वा
स्तवमधिदैवतं देवाधिकारगं सर्वमहाभूताधिकारगं तत्का

रणं तथा कार्यमधिभूतं तदंतिकान् इति मद्भक्तो मैव अथा
त्मं देहपर्य्यंतं केवलात्मोपकारकं सदेहजीवा भूतानि यत्ते
षामुपकारकम् अधिभूतं तमायांतं देवानामधिदैवतमि
ति तद्भावमपि सतानि दुःखवनिरतिशयानंदात्मिकां तद्वोक्तं
मुक्तानां च गतिर्ब्रह्म सनातनं तेन रतज्ञ इति कल्पितं इति मोक्षधर्मे स्म
रन्मुरुष त्यजतीति भिन्नकालीनत्वेप्यविरोध इति मंदमतेः
शंका माभूदिति अंतइति विशेषणम् स्मरन्नेनैव पाकावकाशः
स्मरत्यजतीत्येककालीनत्वप्रतीतेः उमृते दुःखान्न स्मरंस
जतीति न भविष्यतिशंका त्यजन्देहं कश्चित्तु मोहमामोत्य
संप्राप्य मितिवक्तादे तस्यद्वैतस्य हृदयस्याग्रप्रद्योतनं तेन
प्रद्योतनतेन नैष आत्मा निष्क्रामतीति हि श्रुतिः सदा तद्भावभा
वित इति अंतकालस्मरणोपायमाह भावोंतरगतं मनः तथा
भिधानात् भावितत्वमसि वासितत्वम् भावना स्वति वासने
त्यभिधानात् सदा तद्भावभावितत्वं स्पष्टयति १॥

भाषा अनुवाद टीका ॥

सप्तम अध्याय मे जो संक्षेप से कहा कि भगवद्भक्त मे एकचित्त भ
क्तजन ब्रह्म कर्म्म औ अधिभूत आदि सात पदार्थ जानि सकै है सोई
जो सप्तम अध्याय मे कहा ब्रह्मकर्म्मादि तिस को भगवान अष्टम अ
ध्याय मे प्रकाशरूप से कहैगे सोयह कि सतयें अध्याय के अन्त
मे प्रसङ्गवश भगवान नेकहा जोब्रह्म औ अध्यात्म सात पदार्थ ति
नके जानेकुक अर्जुन दोश्लोक से प्रश्न करते है किहे पुरुषोत्तम
आपने कहा जो ब्रह्म सो किस रूप कहै और अध्यात्म ही वा कि
स प्रकार का जानै तथा कर्म्म ही वाक्यहै और अधिभूत या अ
धिदैव किस को कहते है यह प्रश्नकिया १ ॥

दोहा॥

को पुरुषोत्तम ब्रह्म सो को अध्यात्म होय अधीभूतसोकोकसो॰
को अधिदेवहूंसोय १॥

5

अधियज्ञः कथं कोऽत्र देहेऽस्मिन्मधुसूदन प्र
याणकाले च कथं ज्ञेयोऽसि नियतात्मभिः २

शाङ्करभाष्यटीका उपक्रमे २ नास्ति

आनन्दगिरिकृतटीका

साधियज्ञं चेत्यत्राधियज्ञशब्देन यज्ञमधिकृतो विज्ञानात्मा वा
परदेवता वेति प्रश्नान्तरं प्रतिकरोति अधियज्ञ इति स च कथ
केन प्रकारेण ब्रह्मत्वेन विज्ञानीयः किं तादात्म्येन किं वा अन्य
नाभेदेनेत्याह

कथमिति सर्वव्यापि स किमस्मिन् देहे वर्तते ततो बहिर्वा देहे
चेत् स कोऽत्र बुद्ध्यादितद्व्यतिरिक्तो वेति जिज्ञासया पृष्टे कोऽत्रेति
अधियज्ञः कथं कोऽत्रेति न प्रश्नभेदकः कथमिति किन्तु प्रका
रभेदविवक्षयेति द्रष्टव्यं यत्तु समाहितचित्तानामुत्क्रमणका
लेऽपि भगवदनुसन्धानं सिध्यतीति तदयुक्तमुत्क्रमणदशायां
करणग्रामस्यैव ग्लानत्वेन समाधानानुपपत्तिरित्यभिप्रेत्याह प्रया
णेति २

स्वामिकृतटीका

अत्र देहे यो यज्ञो वर्तते तस्मिन्कोऽधियज्ञः अधिष्ठाता प्रयोजकः
फलदाता चेत्यर्थः स्वरूपं पृष्ट्वा अधिष्ठानप्रकारं पृच्छति कथं के
न प्रकारेण असावस्मिन्देहे स्थितो यज्ञमधितिष्ठतीत्यर्थः यज्ञग्रह
णे सर्वकर्मणामुपलक्षणार्थं अन्तकाले च नियतचित्तैः पुरुषैः क
थं केनोपायेन ज्ञेयोऽसि प्रश्नक्रमेणोत्तरं २ ॥

पैशाचभाष्यटीका उपक्रमे २ नास्ति

रामानुजभाष्यटीका

इदानीमष्टमे प्रस्तुतान् ज्ञातव्योपादेयभेदान्निर्दिशति जरामरण
मोक्षाय भगवन्तमाश्रित्य यतमानानां ज्ञातव्यं तद्ब्रह्माध्यात्म
च कर्म च किमिति वक्तव्यं ऐश्वर्यार्थिनां ज्ञातव्यमधिभूतमधिदैवं च
किं त्रयाणां ज्ञातव्योऽधियज्ञशब्दनिर्दिष्टः कः तस्य चाधियज्ञभावः

गी॰ कथंप्रयाणकालेचैभिरिक्षिभिर्नियतात्मभिः कथंज्ञेयोसि २॥
टी॰ अ॰

अभिनवगुप्तकृतटीका

तेब्रह्मतद्विदुरित्यादिनायद्भगवतोपदिष्टंतत्सप्रश्नकएवंनिर्णाय ति अधियज्ञःकथंकोत्रदेहेस्मिन्नितीतिविशेषः २

परमार्थप्रपाटीका

[illegible] अधियज्ञइति अत्रदेहेयोयज्ञोवर्ततेतस्मिन्को यियज्ञअधिष्ठाताप्रयोजकस्तत्फलदाताचकइतिप्रश्नोत्तरंभ गवानाह २॥

वनमालीटीका

अत्रब्रह्मादिषट्केअधियज्ञोयज्ञमधिगतोदेवतात्मापरंब्रह्मवा तत्तयोर्विविच्यतैयत्वात्प्रश्नःसचकथंकेनप्रकारेणचिंतनीयः
न॰ किमस्मिन्देहेवर्तमानतयोतेतोवहिर्भावेनवादेहेचतत्कोत्रपरमे श्वरोजीवोवा अधियज्ञःकथंकोत्रेतिनप्रश्नद्वयं किंतुसप्रकार कप्रश्नएवप्रयाणकालेचसर्वकरणवैकल्याच्चित्तसमाधा नानुपपत्तेःकथंकेनप्रकारेणनियतात्मभिःसमाहितचित्तै र्ज्ञेयोसि उक्ताशंकात्रयवनाद्यप्रकारःएतत्सर्वंतत्वात्परमकारु णिकत्वाच्छरणागतेभ्योप्रतिकथयेत्यभिप्रायः २

उमनुमवैजयन्तीटीका

किंचाधियज्ञ इति हे मधुसूदन मधुदैत्यहंतः अस्मिन्देहेऽधियज्ञः आत्मादि
रूपाणां ज्ञातत्वेन स्थितस्तु कः अधियज्ञसंज्ञको यज्ञमधिगत इन्द्रादि
र्वा विष्णुर्वा तस्य चात्र देहेऽधियज्ञभावः कथं केन प्रकारेण भवति अत्रैकए
व प्रश्नो भवति न तु प्रश्नद्वयस्य शंकागंधस्यादित्यर्थः च पुनर्नियतात्म
भिः निशेषेण मतः शब्दादिविषयादुपरमिति आत्मा मनो यैस्तैस्तथा तैर
तोऽदिभिः सुविभिर्भक्तैः प्रयाणकाले प्राणोत्क्रमणसमये कथं केन प्रका
रेण ज्ञेयो ज्ञातुं योग्योऽसि भवसि यतोऽसुमूर्षोर्जनस्य तस्मिन्समये निर
तिशयरोगादिपीडया सकलदेहेन्द्रियादिव्याकुलत्वेन चित्तसमाधा
नासम्भवः यथा मधुदैत्यं हत्वा सर्वेषां जगतां त्वं सुखमदास्तथा ममापि
संदेहरूपासुरं निहत्य सुखं देहीति संबोधनाशयः २ ॥

मधुसूदनीटीका ॥

अधियज्ञो यज्ञमधिगतो देवतात्मा वा परब्रह्म वा स च कथं केन प्रकारेण
चिन्त्यः किं तादात्म्येन किं वात्यन्ताभेदेन सर्वथापि स किमस्मिन् देहे व
र्तते ततो बहिर्वा देहे चेत् स कोऽत्र बुद्ध्यादिस्तद्व्यतिरिक्तो वा अधियज्ञः क
थं कोऽत्रेति न प्रश्नद्वयं किंतु सप्रकारक एक एव प्रश्न इति द्रष्टव्यं परम
कारुणिकत्वादनायासेनापि सर्वोपद्रवनिवारकस्य भगवतोऽनायासेन
मत्संदेहोपद्रवनिवारणमीषत्करमुचितमेवेति सूचयन् संबोधय
ति मधुसूदनेति प्रयाणकाले च सर्वकरणग्रामवैयग्र्याच्चित्तसमाधा
नानुपपत्तेः कथं केन प्रकारेण नियतात्मभिः समाहितचित्तैर्ज्ञेयो
सीति उक्तशंकासूचनार्थः चकारः एतत् सर्वं सर्वज्ञत्वात् परमकारु
णिकत्वाच्च शरणागतं मां कथयेत्यभिप्रायः [illegible]
[illegible] २ ॥ प्रति॰

सदानंदीटीका ॥

देवतात्माधियज्ञो वा परब्रह्माथवेरितं स च केन प्रकारेण चिंतनीयोऽधि
यज्ञकः किं तादात्म्येन किं वा सोऽत्यन्ताभेदेन चिन्त्यते सर्वथापि स देहेऽस्मि
न्वर्तते वा ततो बहिः देहे चेत्किं स बुद्ध्यादिस्तद्भिन्नो वा सदुच्यते करा
णग्रामवैयग्र्यान्तकाले तु तिडः सदैकथं ज्ञेयोऽसि चित्तस्य समाधेरस
संभवात् एतत्कथय सर्वज्ञत्वात्कृपालुत्वाच्च मां प्रति ज्ञानमंतशाय

गी॰
टी॰ग्र॰

स्यास्यहृदरनेत्वमथोरिव [illegible] २ ॥

नीलकंठी टीका ॥

अधियज्ञः कथं कोऽत्र क इति स्वरूपप्रश्नः कथं ज्ञेय इति पदापकर्षेण
तत्तदुपासनाप्रकारप्रश्नश्चेति द्वयं मिलित्वा एक एव प्रश्नः शेषं स्पष्टं २

आनंदीटीका अत्रापिप्रश्नार्थः सुगमः २

[illegible] २ ॥

रामकंठीटीका

प्रयाणकाले कथं ज्ञेयोसीति पूर्वमनुक्तार्थविषयः प्रथक्प्रश्नः २

लासिकी [illegible]टीका

अत्र देहे कथमस्मिन्देहे क इति परिच्छेदः प्रयाणकाले सर्वदुःखा
दिष्टाने देहादुत्क्रान्तिसमये नियतात्मभिर्नियतः प्रत्यवमृशता
मापादित आत्मा येस्तैः आत्मनि नित्यमवहितैः कथं केन प्रकारे
ण ज्ञातव्यत्वमभिज्ञातव्यो वा कोऽसि अन्यत्स्पष्टं २

पंचोलीटीका

हे मधुसूदन अत्र देहे कः अस्मिन् कथमधियज्ञः च अपरं प्रया
णकाले नियतात्मभिः कथं ज्ञेयोसि २

रणवीरसमिद्धोधिनी ॥

अधियज्ञ इति यज्ञेषु उद्दिश्यमानो देवताविशेषकः उक्तमा
येषु तेषु कतमः कथं केन स्वरूपेण च ध्येय इत्येकप्रश्नः
अत्र देहे इति देहे इति अस्मिन्निति च पदद्वयच्छेदः हे मधुसूदनेति संबोधने
हे मधुसूदनेति संबोधनस्यायमभिप्रायः सर्गादौ किल ब्रह्म
तस्य ब्रह्मणः प्रवृत्तिनिरोधकं मोहजनकं च मधुं यथा नीयासे

नस्मृदितवानसि एवंमत्संदेहोपितवस्त्वपनोदयवेति शास्त्रं आ
रब्धात तद्विपर्ययेणैवं हिंसेतियावत् अव्ययंविभक्तीतिसमासः अ
त्रै हिंसा ददातीति अत्रदोहिंसानिमित्तभूतः अस्मिन्नत्यन्ते नोप
लभ्यमानेत्रदेहिंसाजनकेसमरेइत्यर्थः तथा प्रयाणकाले सं
मुखमरणसमये नियतात्मभिः नियतो निगृहीतः स्वजात्तु
चितानुष्ठीयमानकर्मणः सकाशादन्यस्माद्विषयात्सकाशात्
त्मामनोबुद्ध्यात्मकमन्तःकरणद्वयं यैः अथच नियतो नियम
विषयतामापादितआत्मा यत्नो यैर्यत्नैकतत्परैरित्यर्थः कथं
केनप्रकारेण ज्ञेयोसि इदमत्र तात्पर्यं अतिप्रचंडशस्त्रापातेपि
पुष्पतावीरेणन प्रकंप्यं मया मर्तव्यमिति किंतु यावत्प्राणनि
र्गमं प्रयत्नपरेणैव भाव्यमिति राजन्यधर्मसिद्धांतः एवं च सं
ति तस्यातिदारुणप्रहारेणप्राणनिर्गमे सति मरणधिकार
हितत्वेन तावत्प्रयाणकालविवेक एव नास्ति अतः पुनस्तत्
कालोचिता भवदनुस्मृतिरित्यतस्तमुपायं ब्रूहि येन भवदनु
स्मृतिः स्यादिति २॥

मधुभाष्य

२॥

d

भाषा अनुवाद टीका ॥

और शरीरके द्वारा जो यज्ञादि कर्म्म किये जाय है उनका अ
धियज्ञ कहे अधिष्ठाता और कर्मफलदाता कोहै अधियज्ञ
का स्वरूप पूंछिकरके अब उसका अधिष्ठान भूत वस्तु पूं
छते हैं कि हे मधुसूदन यह अधियज्ञ पुरुष इस देहमे कि
स प्रकारसे स्थितहोके यज्ञादि कर्म्मों का नियोगकहे अवधा
रण और यज्ञ फल प्रदान करते हैं और अन्तकाल मे सं
यत चित्त पुरुष तुमकोकिस उपाय से जानते है यहां यज्ञ
शब्द से सब कर्मों का ग्रहण है यह जानो २ ॥

दोहा

कोमधुसूदन देहमें अधीयज्ञ सोहोय सतुममें तो द्विजा
नहिकैसें जितेंद्रिय सोय २॥

9

श्रीभगवानुवाच अक्षरंपरमंब्रह्म स्वभावोऽध्या
त्ममुच्यते भूतभावोद्भवकरो विसर्गःकर्मसंज्ञितः ३

शांकरभाष्यटीका

एषां प्रश्नानां यथाक्रमं निर्णयाय अक्षरमिति अक्षरं न क्षरतीति परा
त्मा एतस्य वा अक्षरस्य प्रशासने गार्गीतिश्रुतेः ओंकारस्य चोमित्ये
काक्षरं ब्रह्मेति परेण विशेषणादग्रहणं परममिति च निरतिशये
ब्रह्मण्यक्षरे उपपन्नतरं विशेषणं तस्यैव परस्य ब्रह्मणः प्रतिदेहं प्रत्य
गात्मभावः स्वभावो इति स्वो भावः स्वभावोऽध्यात्मं उच्यते आत्मानं दे
हमधिकृत्य प्रत्यगात्मतया प्रवृत्तं परमार्थब्रह्मावसानं वस्तु स्वभावो
ध्यात्ममुच्यते अध्यात्मशब्देनाभिधीयते भूतभावोद्भवकरः भूतानां
भावो भूतभावस्तस्योद्भवो भूत भावोद्भवस्तं करोतीति भूतभावोद्भवक
रो भूतवस्तूत्पत्तिकर इत्यर्थः विसर्गो विसर्जनं देवतोद्देशेन चरुपुरो
डाशादेः स्वस्य द्रव्यस्य वितरणं परित्यागः स एव विसर्गलक्षणो य
ज्ञः कर्मसंज्ञितः कर्मशब्दित इत्यर्थः इत्येतस्माद्बीजभूतात् वृष्ट्या दि
क्रमेण स्थावरजङ्गमानि भूतानि उद्भवन्ति ३ ॥

आनन्दगिरिकृतटीका

आख्यातप्रश्नसप्तकस्य प्रतिवचनं भगवन्तमवतारयति एषामिति क्र
मेण कृतानां प्रश्नानां क्रमेणैव प्रतिवचने प्रष्टुरभीष्टप्रतिपत्तिसौकर्या
न्न सिध्यतीति बुद्ध्यमानो विशिनष्टि यथाक्रममिति तत्र प्रश्नत्रयं नि
र्णेतुं भगवद्वचनमुदाहरति अक्षरमिति किं तद्ब्रह्मेति प्रश्नस्य प्रतिवच
नमक्षरं ब्रह्मपरममिति तत्राक्षरशब्दस्य निरुपाधिके परस्मिन्नात्मन्य
विनाशित्वव्याप्तिमत्त्वसम्बन्धात्प्रवृत्तिं व्युत्पादयति अक्षरमित्यादिना
कथं पुनरक्षरशब्दस्य यथोक्ते परमात्मनि वृद्धप्रयोगमन्तरेण व्युत्पत्त्या
प्रवृत्तिराश्रीयते व्युत्पत्तेरर्थान्तरेऽपि सम्भवादित्याशंक्य द्यावापृथिव्या
दिविषयनियन्तृत्वप्रशासनस्य परस्मादन्यस्मिन्नसम्भवात्तथाविधप्रशास
नकर्तृत्वेन श्रुतमक्षरं ब्रह्मेत्याह एतस्येति रूढिर्योगमपहरतीति न्या

गी. टी. अ.

10

याद्योंकारे वर्णसमुदायात्मन्यक्षरशब्दस्य रूढत्वा ब्रह्मतिराश्रयितव्य
चितेत्याशंक्याह अक्षरस्येति प्रतिवचनोपक्रमे प्रक्रान्तमोङ्काराख्य
मक्षरमेवोत्तरत्र विशेषितं भविष्यतीत्याशंक्य परमविशेषणविरोधा
न्न तस्य प्रक्रमः सम्भवतीत्याह परममिति चेति किमध्यात्ममिति प्र
श्नोत्तरं स्वभावोऽध्यात्ममित्यादि तद्व्याचष्टे तस्यैवेति स्वकीयो भावः
स्वभावः श्रोत्रादिकरणग्रामः सचात्मनि देहेऽहं प्रत्ययवेद्ये वर्तत
इतिभ्रमं प्रतिभासे व्यावर्त्य स्वभावपदं गृह्णाति स्वोभाव इति एवं
विग्रहपरिग्रहे स्वभावोऽध्यात्ममुच्यते इत्यस्यायमर्थो निष्पन्नो भव
तीत्यनुवादपूर्वकं कथयति स्वभाव इति तस्यैव परस्येत्यादिनोक्त
न विस्मर्तव्यमिति विशिनष्टि परमार्थेति परमेव हि ब्रह्म देहादौ प्र
विश्य प्रत्यगात्मभावमनुभवति तत्सृष्ट्वा तदेवानुप्राविशदिति
श्रुतेरित्यर्थः किं कर्मेति प्रश्नस्योत्तरमुपादत्ते भूतेति भूतान्येव भा
वास्तेषामुद्भवः समुत्पत्तिस्तां करोतीति निरूपयति सिद्धवत्कृत्य विधान्त
रेण व्युत्पादयति भूतानामिति भावः सन्ज्ञाभ्यां वस्तुभावो भूतभा
त्पत्ति ऽत एव भूतवस्तुकर इति वक्ष्यति वैदिकं कर्मेत्यलौकिकविशेषणं क
र्मशब्दितमिति विसर्गशब्दार्थं दर्शयन् विशदयति विसर्ग इत्यादिना
कथं पुनर्यथोक्तस्य यज्ञस्य सर्वेषु भूतेषु सृष्टिस्थितिप्रलयहेतुत्वेन
तदुद्भवकरत्वमित्याशंक्याग्नौ प्रास्ताहुतिरित्यादिस्मृतिमनुसृत्याह
एतस्माद्धीति ३ ॥

स्वामिकृतटीका प्रश्नक्रमेणोत्तरं श्रीभगवानुवाच अक्षरमितित्रिभिः

ननुजीवोप्यक्षरस्तत्राह नक्षरतिनचलतीत्यक्षरं परमं यदक्षरं जगतां मूलकारणं तद्ब्रह्म एतद्वै
तदक्षरं गार्गि ब्राह्मणा अभिवदंतीति श्रुतेः तस्यैव ब्रह्मणोंऽशतो जी
वरूपेण भवनं स्वभावः स एवात्मानं देहमधिकृत्य भोक्तृत्वेन वर्तमा
नोऽध्यात्मशब्देनोच्यत इत्यर्थः भूतानां जरायुजादीनां भावोत्पत्तिः उ सत्ता
द्भवश्च आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इत्युक्तक्रमेण विहित कल्पकत्वेनभ उद्भवः
भूत तोऽभावोद्भवौ करोतीति यो विसर्गः देवतोद्देशेन द्रव्यत्यागरूपो यज्ञः स वै
कर्मणामुपलक्षणमेतत् सर्वकर्मशब्दवाच्यः ३ ॥

पिशाचभाष्यं

एवं प्रश्नानां निर्णयार्थं भगवानुवाच अक्षरं न क्षरतीत्यक्षरं परमात्मरू-
पेण ब्रह्मेत्युच्यते एतस्य वा अक्षरस्य प्रशासने गार्गीत्याद्या श्रुतिः तस्यैवास्य
ब्रह्मणः प्रतिदेहं प्रत्यगात्मत्वभावोऽध्यात्ममुच्यते आत्मानं देहमधिकृ-
त्य प्रत्यगात्मतया प्रवृत्तमध्यात्मशब्देनोच्यत इत्यर्थः भूतानां प्राणिनां
भावो भूतभावस्तस्योद्भवमुत्पत्तिं करोतीति भूतभावोद्भवकरः विसर्गो
यागः देवतोद्देशेन द्रव्यत्यागो यः पुरोडाशाद्यात्मयागः कर्मसंज्ञित-
स्तस्य भूतभावोद्भवकरत्वं अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठत इ-
त्यादिस्मृतेः ३ ॥

रामानुजभाष्यटी॰

ब्रह्मेति निर्दिष्टं परममक्षरं क्षेत्रज्ञसमष्टिरूपं तथा च श्रुतिः अव्यक्तम-
क्षरे लीयते अक्षरं तमसि लीयत इत्यादिका परमक्षरं प्रकृतिविनिर्मु-
क्तात्मस्वरूपं स्वभावः प्रकृतिः अनात्मभूतमात्मनि संबध्यमानं भूतं
स्वरूपं तद्वासनादिकं च पंचाग्निविद्यायां ज्ञातव्यतयोदितं तदुभयं प्रा-
प्यतयात्याज्यतया च मुमुक्षुभिर्ज्ञातव्यं भूतेति भूतभावो मनुष्यादिभा-
वः तदुद्भवकरो यो विसर्गः पंचम्यामाहुतावापः पुरुषवचसो भवंती-
ति श्रुतिसिद्धो योषित्संबन्धः स कर्मसंज्ञितः तच्चाखिलमानुबंधमु-
द्वेजनीयतया परिहरणीयतया च मुमुक्षुभिर्ज्ञातव्यं परिहरणीयता
चानन्तरमेव वक्ष्यते यदिच्छन्तो ब्रह्मचर्यं चरन्तीति ३ ॥

अभिनवगुप्तकृतटी॰ ॥

इह त्वाक्षरं सकलत्वाद्यपरं ब्रह्म तदेवाध्यात्मशब्दवाच्यं यतः स्वो निजो-
यमी चैतन्याख्यो भावः तस्य च चेतनस्वभावस्य ब्रह्मणोऽपरिच्छिन्नत्वास्व-
लक्षणतया क्रोडीकृतविश्वशक्तेरैश्वर्यलक्षणात्स्वातन्त्र्याद्बहिर्भावा-
वभासनात्मबहिर्भूतभावानवभासनात्मा यो विसर्गः क्रमेण भूतानां
ब्रह्मादिप्रमातृणां जडानामुद्भवकारी जडाजडवैचित्र्यनिर्भासकत्व-
या भूतभावस्याविगलितसकलवितथप्रपंचस्य सत्यत्वस्योद्भवकरो-
तीति ३ ॥

परमार्थप्रपाटी॰ ॥

प्रश्नानन्तरं भगवानाह अक्षरमिति न क्षरतीत्यक्षरं परमं जगतो मूलका-
रणं यात्राकाशादिकमध्योतप्रोतं श्रुतिरपि ज्ञातपथी सहोवाचैतद्वै
तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनण्वह्रस्वमदीर्घमलोहित-
मच्छायमतमोवाय्वनाकाशमसंगमस्पर्शमगन्धमरसमचक्षुष्कमश्रो-

त्रमवागमनोतेजस्कमप्राणमनामागोत्रमजरममरमभयममृत
मरजोशब्दमविहृतमित्यादिस्पष्टार्थं अध्यात्मस्वरूपमाह स्वभाव
इति स्वस्यैवब्रह्मणएवांशत्वेनजीवरूपेण भवनंस्वभावः सएवात्मानंदे
हमधिकृत्यभोक्तृत्वेनवर्तमानोध्यात्मशब्देनोच्यते यद्वाइदंतिजाना
तीत्रेंतरात्मानमधिकृत्यवर्ततइतीन्द्रियमध्यात्ममित्यध्यात्ममित्यात्म
विदः भूतानांजरायुजादीनांभावोवर्तमानत्वास्थितिः उद्भवउत्पत्ति
स्तांकरोतियःविसर्गःदेवतोद्देशेनद्रव्यत्यागरूपोयज्ञःकर्मशब्देनो
च्यते ३ ॥

वनमाली टी॰ ॥

प्रश्नक्रमेणोत्तरदानेप्रकृष्टभीष्टसिद्धिरनायासेनस्यादित्यभिप्रायवा
न्प्रश्नक्रमेणैवोत्तरमाह अक्षरमिति नक्षरतीत्यक्षरंपरमंदेहतःस्वरू
पतोगुणतश्चोत्पत्त्यादिरहितःपरमश्रेष्ठंजगदुद्भवादिकारणं यतो
वाइमानिभूतानिजायंतेयेनजातानिजीवंतियत्प्रयंत्यभिसंविशंतितत
द्विजिज्ञासस्वतद्ब्रह्मेतिश्रुत्यापतस्यवाअक्षरस्यप्रशासनेगार्गिद्यावापृ
थिव्यौविधृतेतिष्ठतःसूर्याचंद्रमसौविधृतौतिष्ठतइतिश्रुत्यायुवाघा
यतनत्वेनोक्तेमक्षरं अव्यक्तोक्षरइत्युक्तस्तमाहुःपरमांगतिमितिव
क्ष्यमाणंस्वस्वरूपमक्षरमत्रब्रह्मपदेनोक्तंनान्यत्किंचिद्देवादीत्यर्थः
नेब्रह्मतद्विदुरित्यत्रवेदित्व्येनप्रत्यक्तोजीवःस्वइत्युच्यतेभावःसदे
काकारतयेश्वरोपिविषमनोलिपंरसनसंभेदग्राहकप्रत्यक्तादिविरो
धात् नापिस्वीयःतस्यप्रधानत्वादप्रधानस्यलोकेस्वीयपदेनबोधना
त् जडवर्गस्तुदेहादिःस्वीयोपिनसदैकाकारतयाविद्यमानःआत्मानंदे
हमधिकृत्यवर्तमानमध्यात्मंइत्यवस्थासून्योनिर्विकारतयाश्रि
तोजीवोध्यात्मपदवाच्यइत्यर्थः भूतानांप्राणिनांजीवानांभावा
नांचजडपदार्थानांउद्भवकरः विशेषेणसर्जनंविसर्गःईश्वरक
र्तृकःसृष्ट्यादिरूपोव्यापारइत्यर्थः यद्वा भूतानांभवनधर्मका
णांसर्वेषांस्थावरजंगमानांभावमुत्पत्तिमुद्भवंवृद्धिंकरोतियो
विसर्गस्त्यागस्तत्कर्मात्वविदितोयोगदानहोमात्म १

कः सइह कर्मसंज्ञितः कर्मशब्देनोक्त इति यावत् अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इति स्मृतेः तेवा एते आहुती हुते उत्क्रामतः इत्यादि श्रुतेश्च यद्वा भूतभावो मनुष्यादिभावस्तदुद्भवकरो यो विसर्गः पंचम्यामाहुतावापः

नि॰ पुरुषवचसो भवंतीति श्रुतिप्रसिद्धो योषित्सु रेतःसेकः स कर्मसंज्ञित इत्यर्थः ३ ॥

कुलमवैजयन्तीटीका

इत्येवमर्जुनेन पृष्टोऽर्जुनसारथिर्भगवान् प्रश्नानुक्रमेणैव ब्रह्मादीनां सप्तप्रश्नानामुत्तरमाह अक्षरं ब्रह्मेति परमं देहेंद्रियादिभ्योऽचेतनवर्गेभ्यो विलक्षण अक्षरं न क्षरति परिणामं प्राप्नोतीत्यक्षरं समष्टिरूपं जीवात्मस्वरूपं अस्मत्कर्मत्वं लीयते क्षरं तत्समष्टि लीयते न मायको भवति परास्मिन्निति श्रुतेः कूटस्थोऽक्षर उच्यते इति वक्ष्यमाणत्वात् ब्रह्म ब्रह्मशब्देनेह भगवता मया उच्यते कथ्यते विज्ञानं ब्रह्म चेद्वेदेति श्रुतिरपि ब्रह्मशब्देन विज्ञानरूपं जीवात्मानं वदति जीवात्मनोऽणुस्वरूपत्वेपि ज्ञानस्वरूपत्वे बृहद्गुणाश्रयत्वात् ब्रह्मशब्दनिर्देशो घटते एवं तद्गुणसारत्वात्तद्व्यपदेश इति सूत्रात् स्वभावः स्वस्य जीवात्मनो भावः प्रकृतिः स्वभावः यन्माचाग्निविद्यायामात्मत्वेनोदितमनात्मरूपमात्मनि सेव्यमानं भूतसूक्ष्मं तत्ह्नासनादिरूपं च मुमुक्षुभिः प्राप्यत्वेन त्याज्यत्वेन च यदुभयं ज्ञातव्यमस्ति तदध्यात्मं मया उच्यते कथ्यते भूतभावोद्भवकरः भूतानां मनुष्यादीनां यो भावस्तदाकारविशेषस्तस्योद्भवमुत्पत्तिं करोतीति तथा सः ईदृशो यो योषित्सु रेतःसर्गत्यागः पञ्चम्यामाहुतावापः पुरुषवचसो भवंतीति श्रुतिप्रसिद्धो यो विसर्गस्तादृग्रूपः स कर्मसंज्ञितः अयम्भावः छान्दोग्ये वलोकपर्जन्यपृथिवीपुरुषयोषिद्रूपेषु पंचस्वग्निषु श्रद्धासोमवृष्ट्यन्नरेतोरूपाः पंचाहुतयः क्रमात्पतन्ति तत्रास्मिल्लोके वैदिको जीवोऽमुयानि

गो
टी·अ

दृष्टादीनि अस्य यान्ति इति ता दृष्यादि मध्यः पञ्चीकृतत्वा नं च भूतसूक्ष्माः
आपः श्रद्धयाहूतत्वात् श्रद्धाख्याहुतिरूपेण तस्मिन् जीवे संबद्धास्तिष्ठे
ति अथ तस्मिन्नग्नौ तेन दिंद्रियाधिष्ठातारो देवास्तां द्युलोकाग्नौ जुह्वति त
ते जीवं दिवं नयन्तीत्यर्थः हुतायाः सोमराजाख्यं दिव्यदेहं तया परिणमन्ते
तेन देहेन स तत्र कर्मफलानि भुङ्क्ते कर्मक्षयेऽवसाने उपयोज्यजीवस्य दे
हस्य देवैः पर्जन्याग्नौ हुतो वृष्टिर्भवति वृष्टिभूतास्ते स जीवाः पृथिव्या
ग्नौ हुता अन्नीभावं लभन्ते अन्नभूताः स जीवाः पुरुषाग्नौ हु
ता रेतोभावं लभन्ते रेतोभूताः स जीवाः स्त्र्याख्येऽग्नौ हुता गर्भा
सनाश्रिता मनुष्यादिभावं प्रयान्तीति क्रमेण ज्योतिष्टोमाश्वमेधा
दियज्ञादिकर्मणा स्वर्गमासाद्य तत्र देवदेहेन तत्कर्मोपभुज्य भाण्ड
गो
लग्नघृतादिद्रव्यशेषवद्द्रव्यविनाशयः कर्मशेषोऽभुविमनुष्यादिदेह
लाभाय विसृष्टस्तन्मयानुशयशब्दवाच्यस्तद्भावद्रव्यतः कर्मशेषः
कर्मेत्युच्यते इति ३ ॥

मधुसूदनीटीका

एवं सप्तानां प्रश्नानां क्रमेणोत्तरं त्रिभिः ॥

प्रश्नक्रमेणाद्वि निर्णये प्रयुक्तभीष्टसिद्धिरनायासेन स्यादित्यभिप्राय
वान् भगवान् त्रिश्लोक्या प्रश्नत्रयं क्रमेण निर्णीतवान् एवं द्वितीयश्लो
केपि प्रश्नत्रयं तृतीयश्लोके त्वेकमिति विभागः निरुपाधिकमेवा
त्र ब्रह्म विवक्षितं भवति ब्रह्मशब्देन न तु सोपाधिकमिति प्रथम
स्मो
प्रश्नस्योत्तरमाह अक्षरं न क्षरतीत्यविनाशि अश्नुते वा सर्वमिति स
र्वव्यापकं एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदंति अस्थूलम
नण्वेत्याद्युपक्रम्य एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचंद्रम
सौ विधृतौ तिष्ठतः नान्यदतोस्ति द्रष्टृ इत्यादि मध्ये परामृश्य एतस्मि
न्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चेत्युपसंहृतेन श्रुत्या सर्वो
पाधिशून्यस्य सर्वस्य प्रशासितुः अव्याकृताकाशान्तस्य कृत्स्नस्य
प्रपंचस्य धारयितुः अस्मिन् शरीरेंद्रियसंघाते विज्ञानघन निरुपाधि
कं चैतन्यमनादि ब्रह्मेति विवक्षितं एतदेव विवृणोति परममिति परमं

स्वप्रकाशपरमानंदरूपेप्रशासनस्यकृतस्य जडवर्गस्यावरणस्यचलिंगा
स्यतत्रैवोपपत्तेः अक्षरमंबरांतधृतेरितिन्यायात् नचिहाक्षरशब्द
स्यवर्णमात्रे रूढित्वात् श्रुतिलिंगाधिकरणन्यायमूलेन रूढिर्यो
गमपहरतीतिन्यायेन रथकारशब्देन जातिविशेषवत्प्रणवाख्य
मक्षरमेवग्राह्यं तत्रोक्तलिंगासंभवात् ओमित्येकाक्षरं ब्रह्मेति
विशेषणाविशेषणात् आनर्थक्यप्रतिहतानां विपरीतं बलाबलमि
तिन्यायात् वर्षासुरथकार आदधीतेत्यत्र तु जातिविशेषनास्यसं
वइतिविशेषः अनन्यथासिद्धेन तु लिंगेन श्रुतेर्बाधः आकाशस्त
ल्लिंगादित्यादौ विहितः एतावानिह विशेषः अनन्यथासिद्धेन तु लिं
गेन श्रुतेर्बाधे यत्र योगः संभवति तत्र सएव रूढत्वेनग्राह्यत्वात्
यथाजेयः स्तुवते पृष्ठैः स्तुवत इत्यादौ यथा वा त्रिवाक्षरशब्दे यत्र तु
योगोपि न संभवति तत्र गौणीवृत्तिः यथाकाशप्राणादिशब्देषु आ
काशशब्दस्यापि प्रलगाणा आसमंतात्काशत इति योगः संभवतीति
चेत् सएव रूढत्वात्तामिति यंचपादीकृतः तथाचपारमर्षसूत्रं प्र
सिद्धेश्चेति कृतमत्र तु विस्तरेण तदेवं किंतद्ब्रह्मेतिनिर्णीतं अधुना
किमध्यात्ममितिनिर्णीयते यदक्षरं ब्रह्मेत्युक्तं तस्यैव स्वभावः
सोभावः स्वरूपं प्रत्यक्चैतन्यं न तु स्वस्य भाव इति षष्ठीसमासः ल
क्षणाप्रसंगात् षष्ठीतत्पुरुषबाधेनकर्मधारयपरिग्रहस्यकृतय
लाघवान्वयेन निषादस्थपत्यधिकरणसिद्धत्वात् तस्मान्नब्रह्म
णः संबंधि किं तत्स्वरूपमेव आत्मानं देहमधिकृत्य भोक्तृतया
वर्तमानमध्यात्ममुच्यते अध्यात्मशब्देनाभिधीयते न तु करणग्रा
मइत्यर्थः यागदानहोमात्मकं वैदिकं कर्मवात्र कर्मशब्देन वि
वक्षितमिति तृतीयप्रश्नोत्तरमाह भूतानां भवनधर्मकाणां सर्वे
षां स्थावरजंगमानां भावमुत्पत्तिमुद्भवं वृद्धिं च करोति यो विसर्गः
त्यागस्तच्छास्त्रविहितो यागदानहोमात्मकः सएष कर्मसं
ज्ञितः कर्मशब्देनोक्त इतियावत् तत्र देवतोद्देशेन द्रव्यत्यागो यागः

गी॰
टी॰ अ॰

इत्येवं होमो वषट्कारप्रयोगांतः सहहोमपविष्टहोमः स्वाहाकारप्रयो
गांतआसेचनपर्यंतो होमः परस्वत्वापत्तिपर्यंतः [illegible] स्व[illegible]त्यागो दानं
सर्वत्रच त्यागांशोनुगतः तस्यच भूतभावोद्भवकरत्वं अग्नौ प्रास्ताहु
तिः सम्यगादित्यमुपतिष्ठते आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजेति दृष्टि॰
स्मृतेः तेवा एते आहुती हुते उत्क्रामत इत्यादिश्रुतेश्च [illegible]
[illegible] ॥

सदानंदीटीका ॥

प्रश्नक्रमानुसारेण भगवानुत्तरं त्रिभिः अनायासेन बोधार्थमुवाच हरिरीश्वरः निरुपाधिकमेवात्र ब्रह्मत्वा
लिविवक्षितं अविनाशपरतरं ब्रह्म सर्वव्यापकमुच्यते सर्वस्याव्या
कृतांतस्य जगतो धारकं परं शरीरेंद्रियसंघाते विज्ञातं निरुपाधि
कंचैतन्यं स्वप्रकाशयतद्ब्रह्मेति मयेरितं प्रतिदेहं वर्तते सैव प्रत्य
गात्मतयास्थितिः स्वोभावः स्वस्वरूपं यत्सत्पत्संज्ञो चैतन्यमेवहि
उच्यते ध्यात्मशब्देन नेंद्रियग्राम इत्ययं यागहोमादिकं मेवप्रा
क्तं तत्कर्मशब्दतः विसर्गो देवतोद्देशात्स्वेगुडाशादिवस्तुनः स
र्वभूतसमुत्पत्तिकरो यागादिकर्मतत् यज्ञादेः कर्मणो बीजभा
नादृष्टादिकक्रमात् चराचराणि भूतानि जायंते तस्तदुच्यते ३

नीलकंठी टीका ॥

क्रमेणैषां प्रश्नानामुत्तरमाह अक्षरमित्यादिभिस्त्रिभिः तत्किं तद्ब्रह्मे
त्यस्योत्तरमक्षरं परमं ब्रह्मेति यत्परमं अक्षरं तद्ब्रह्मेति योजना अक्षरश
ब्दस्य वर्णेष्वपि रूढत्वात् ओमित्येतदक्षरमिमादि श्रुतौ ओमित्येकाक्षरं ब्रह्मे
ति स्मृतौ च दर्शनेनात्रापि प्रणवस्याक्षरशब्देन ग्रहणो प्रसक्ते परममिति
विशेषणं प्रणवस्यापरब्रह्मत्वासंभवात् एतस्य एतदेनदक्षरं गार्गि ब्रा
ह्मणा अभिवदंत्यस्थूलमनण्वह्रस्वमदीर्घमित्यादिश्रुतिप्रसिद्धमखंडैक
रसं वस्त्वक्षरशब्देनेह ब्रह्मेति प्रोक्तः यद्वा अक्षरशब्देन जीवः कूटस्थो
क्षरउच्यते उत्तमः पुरुषस्त्वन्य इति गीतास्वक्षरं प्रधानमस्मात्परं हरः त

त्मानावीशतेदेवएकइतिश्रुतौचकूटस्थपदेनास्मत्पदेनचविशेषि
तस्याक्षरपदस्यजीववाचित्वदर्शनात् अतस्तोक्षरमित्यपेक्षितेतेउक्तमा
वश्यकोद्देशः तथाचाक्षरंजीवाख्यंपरमंब्रह्म परममितिविशेषणे
नसोपाधिकस्यपूर्वाध्यायोक्तस्यव्यावृत्तिः नहिजीवस्यसोपाधिक
स्यब्रह्मभावःसंभवति यावत्कोपाधेर्मायादर्पणेजातुतिनयोरभे
दायोगात् किंतद्ब्रह्मेतिप्रश्नेपरममितिविशेषणभावेपितद्ब्रह्मत
द्विदुःकृत्स्नमितिप्रश्नोस्याप्युक्तेस्तेपरमत्ववाचिनाकृत्स्नपदेनब्रह्म
णोविशेषितत्वादुत्तरेपिब्रह्मणएवपरममितिविशेषणंश्रुतमतएव
प्रश्नेपितद्ब्रह्मेत्येतत्कृत्स्नत्वस्यैवग्रहात् ततश्चकिंतत्कृत्स्नंब्रह्मेतिप्र।
श्नेयदक्षरंजीवाख्यंतदेवअपेतोपाधिसंबंधंसत्कृत्स्नंब्रह्मेतितत्व।
मसीतिमहावाक्यार्थःप्रतीतोब्रह्मभावःप्रतिपादितोभवतीतिहृ
यं तथास्वोंशोगतकोभावःस्वरूपंस्वभावःशुद्धत्वंपदार्थःसोध्यात्म
मुच्यते भाष्येतुतस्यैवपरस्यब्रह्मणः प्रतिदेहंप्रत्यगात्मभावःस्वोभा
वःस्वभावोध्यात्ममुच्यतेअध्यात्मशब्देनाभिधीयतइति विसर्गोदेव
तोद्देशेनद्रव्यत्यागात्मकोयागःसकर्मसंज्ञितः तमेवविशिनष्टि भू
तेति भूतानांभावःसात्विकादिस्वभावःउद्भवस्तयोःकरणात्भूत
भावोद्भवकरः तथाहि बुद्धिःकर्मानुसारिणीतिकर्मानुसारित्वंभा
वस्यस्मर्यते तथोद्भवोपिकर्मतएवस्मर्यते अग्नौप्रास्ताहुतिःसम्य
गादित्यमुपतिष्ठते आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंततःप्रजाइति १

षण्णांप्रश्नानांक्रमेणोत्तरलक्षणं॥

आनंदीटीका

नक्षरतिस्वभावान्नच्यवतियत्तन्निर्विकारंअश्नुतेसर्वंततज्जानमि
मक्षरंसर्वव्यापकंवा परमंब्रह्मपरमात्मसंज्ञम् स्वःस्वकीयःपर
ब्रह्मणोभावःअंशःजीवादिप्रकृतिवर्गः अध्यात्ममुच्यतेआत्माधि
कृत्यायत्रवर्ततइतिक्रियाविशेषणत्वादात्माधीनप्रवृत्तिविषयः भू
तानांभावस्तत्तानस्योद्भवःसत्तातःस्थितानामेवबहिरवभासनंतं
करोतीतीदृशः विसर्गःविविधसृष्टिरूपःकालायेत्नःपारमेश्वरोव्या
पारःकर्मसंज्ञितः १ ॥

रामकंठीटीका

गी॰
टी॰
प्र॰

15

यथोक्तप्रश्नव्याकरणार्थं भगवानुत्तरमाह तद्ब्रह्म किमुच्यते इति
प्रश्नेनावदुत्तरं परममक्षरं ब्रह्म न क्षरतीति न संचलयतीति न स्वरूपाच्च्यवती
मक्षरं चिद्रूपमुच्यते तद्धि प्रकारद्वयं भवति ब्रह्मरूपं जीवरूपं च यद्ब्रह्म
रूपं तत्परमं तस्य न कदाचित्स्वरूपाच्चलनं भवति यतस्तस्य प्रबन्धतः
स्वरूपं जन्मविनाशादिभावविकाराः सेस्यैकविज्ञानलक्षणं सहज।
नित्यानन्दैकधर्मकं सकलविश्वभावावभासकत्वादिरूपमपि वि
श्वभावव्यवस्थापकत्वेन कर्यविदप्यसंगतत्वान्नेष्योव्युत्तिरिक्तं प्रतिपा
दितमेव जीवरूपं तु कूटस्थत्वे सत्यक्षरं भवति किन्तु परं परब्रह्मवत्परत्वे
नावस्थितं यतस्तस्य मायावशात्तदस्वभावप्राकृतभावाद्दैवमयाल।
त्वे सति देहादिप्राकृतभावबन्धतो जन्ममरणादिकं वा तत्स्वरूपम
नुविद्ध्यानस्य स्वरूपप्रच्युतिसंबन्धे सत्यपरमक्षरत्वे यदुक्तं द्वावि
मौ पुरुषौ लोके इत्यादि इमं च स्वापेक्षया जीवानां नित्यत्वेपि प्रतिपादि
तोपपद्यानि कूटस्थमक्षरत्वं परमं त्वक्षरं च ब्रह्मेति प्रथमप्रश्नस्योत्तरमध्या
त्मं किमुच्यते इत्यस्योत्तरम् स्वभावोध्यात्ममिति स्वभावशब्देन भूमि
रापइत्यादिना यदेवं चार्थ तेजगदिमन्तेनय्रन्थेन पराऽपराच प्रकृ।
तिर्भगवताशक्तिपादितेह उच्यते एवं प्रकृत्यात्मकः स्वभावः परम
कारणरूपस्य स्वात्मावभासितता नानात्माधीनत्वादध्यात्ममित्यर्थः आ
त्मा हि परमेश्वरो जडचेतनविभागेन स्वेच्छया त्मानमेवावभासयति
तदुक्तं कल्पयत्यात्मनात्मानमात्मा देवः स्वमायया स एव बुध्यते भे
दानिति वेदान्तनिश्चयः एवं हि प्रकारप्रकृतिलक्षणस्वभावस्यात्माधी
नत्वादध्यात्ममुच्यत इति द्वितीयप्रश्नस्योत्तरम् अथ किं कर्मेत्यस्योत्तरं
विसर्गः कर्मसंज्ञित इति विसर्गो विशिष्टा पराब्रह्मव्यतिरिक्ता सृष्टिः
कर्मेति संज्ञितः तस्य हेतुगर्भं विशेषणमाह भूतभावोद्भवकरः भू
तानां जडाजडप्रकृत्यात्मकानां यो भावः सत्ता जडानां प्रवाहनित्यता
रूपा चेतनानामन्योन्यविभक्तत्वेपि कूटस्थनित्यतारूपा तत्स्वभावस्या
उद्भवेन यथावभासनरूपामभिव्यक्तिं यः करोति सत्तदात्मकः ईश्वरेच्छया
नादिनाप्रबन्धेन जडचेतनप्रकृत्योर्यः संयोगस्तत्कृतो यः स्वयं चे।
मयः सर्गः स तयोः कर्मेत्युच्यते यदुक्तं शाक्त यतद्योनीनि भूतानि द्वयो॰

सर्वाणीन्द्रपथारयेति एवं त्वयादिष्टा पर्यन्तप्रपंचलक्षणो जडा-
याः प्रकृतेर्यो विविधः सर्गस्तथा चतुर्दशविधप्राणिप्रपंचलक्षणो
जीवभूतायाः प्रकृतेर्विविधः सर्गः स तयोः संयोगजत्वात्तयोः कु-
र्मणोः कर्मत्वेन विसर्ग उक्तः इति द्वितीयप्रश्नस्योत्तरम् [illegible]
[illegible] १ ॥

लासिकी [illegible]टीका

अथोत्तरं श्रीभगवानुवाच नन्दति निश्चलति निस्तरंगमहोद-
धिवत्स्पन्दते इत्यनन्तरं तद्रूपरमं पूर्णं न तत्कूटस्थात्मवदेहा-
वच्छिन्नं तदेव परममक्षरं ब्रह्मोच्यते बृहत्वाद्बृंहकत्वाच्च यस्य
हि पूर्णानन्दघनतया सततोपि पूर्णाहम्भावस्यात्मतया नन्त-
याप्रतीतिस्तत्स्वतत्त्वं शैवैः परमशिवरूपमुपदिष्टं तदुक्तं सर्वथा-
त्वन्तरालीनानन्ततत्त्वौघनिर्भरः शिवश्चिदानन्दघनः परमाक्षर
विग्रह इति अत्र श्रीमदभिनवगुप्तपादैर्विवृतं यथा न खलु भग-
वति श्रीपरमशिवे प्रमेयकथा काचिदस्ति तत्त्वौघस्य सर्वथा त-
च्चिद्रूपतामात्रविश्रान्तत्वेन लीनत्वादित्यादिनेति तस्यैव चिद्रू-
पस्य ब्रह्मणः स्वभावः स्वात्मनिहितधर्मो चैतन्यात्मको भावस्तज्जत्वेनो
ध्यशकारो ध्यात्ममुच्यते आत्मानं पूर्णस्वस्वरूपं विमृश्य त्वेनाधिकृ-
त्य वर्तमानत्वात् अत्र पूर्णाहम्भावस्यात्मतया प्रतीयमानत्वा-
च्छैवैः शिव इति तत्त्वं निर्दिष्टं तदुक्तं यदयमनुत्तरमूर्तिर्निजेच्छ-
याखिलमिदं जगत्स्रष्टुं पस्पन्दे स स्पन्दः प्रथमः शिवतत्त्वमुच्य-
ते तज्ज्ञैरिति तस्यैवाध्यात्माख्यस्य क्रोडीकृतविश्वशक्तेः सतत्त्वा-
भूतानां जडाजडरूपाणां भावबहिर्भावावभासनात्मकं बहिर्भूत
भावान्तरावभासनात्मकं तयोर्द्वयमवस्थानं करोतीति भूतभावो-
द्भवकरो यो विसर्गो विविधत्वेन तत्तद्रूपतया सर्गः तदेतत्तवङ्कस्या
प्रजायेयेत्यादिश्रुतिसमस्तावितसर्जनकर्मसंज्ञितः यस्य शक्त्यादा-
यः सत्ता विहिताः तदुक्तं स एव विश्वमीषितुं ज्ञातुं कर्तुं चोन्मु-
खो भवन् शक्तिस्वभावः कथितो हृदयत्रिकोणमधुमांसलोल्ला-
सः कर्मणः सदाशिवत्वरूपो विशेष ईश्वररूपानन्तत्वात्किंचिन्मा

त्रमुइहेकान्नहथद्धिः नृपितः किंत्वान्तरदृशोहेकात्सादाख्यंतत्वमा
दितः वहिर्भावपरत्वेन परतः परमेश्वरं [illegible] मेव
[illegible] जानन्ति ॥ ३ ॥

पंचोलीटीका

एवं प्रश्नानां यथाक्रमं निर्णीय भगवानुवाच अक्षरमिति ।
हे अर्जुन परमं अक्षरं परमात्मब्रह्म स्वभावस्तस्य ब्रह्मणः प्रतिदे
हे स्वकीय आत्मभाव अध्यात्म उच्यते आत्मानं देहमधिकृत्य स्वा
त्मतया प्रवर्तते चैतन्य अध्यात्मं भूतभावोद्भवकरो विसर्गः प्राणि
देहोत्पत्तिकरः सर्गः देवतोद्देशेन पशुपुरोडाशादेर्द्रव्यस्य उत्स
र्गकर्मसंज्ञितः ३

रमावीरससिद्धोधिनी ॥

अथात्र यथाक्रमेण प्रश्नसप्तकं व्याकुर्वन्नुत्तरं भगवानुवाचाक्षर
मित्यादिना श्लोकत्रयेण तत्र किं तद्ब्रह्मोच्यत इति प्रथमं प्रश्नं ताव
दुत्तरयति अक्षरं ब्रह्म परममिति अक्षरं परममिति द्विविधं ब्रह्मो
च्यत इति संबंधः अस्यार्थः वेदस्तत्त्वं तपो ब्रह्मेत्यनुशासनाद्ब्रह्म
वेदः तस्मादपुट प्रस्तावान्नद्वियाधिकृतं हि प्रकारं यथा अक्षरं
अक्षैः पाशकैः रमते येन प्रमाणभूतेनेत्यक्षरं द्यूतक्रीडाविधायकं
तथा परमं परां प्राभृन्मीनति हिंसति येन प्रवर्त्तकभूतेनोपायज्ञाप
कभूतेन वेति परमं शिववधे प्रवृत्तिजनकमुपायज्ञापकं च अथ
वाक्षरं अक्षमिंद्रियेनाप्नुतांगेकर्षचक्रे व्यवहारे कलिंगम इतिना
मानुशासनाद्देहे प्रजाव्यवहारं रक्षति येन प्रवर्त्तकेनोपायज्ञापके
न चेत्यक्षरं प्रजापालनधर्मात्मिरूपं तथा परमं अधृष्टरूपनात्मोत
राः परा इत्यनुशासनात्परां श्रेष्ठां ब्राह्मणादीन्मानयति पूजयति
येन तत्परमं गोब्राह्मणरक्षाशुश्रूषादौ प्रवर्तकमिति वातवलयं
प्रति परमेश्वरेण वेदरूपया स्वधर्मस्य तिकर्तव्यताबोधितेति चो
दनालक्षणं च नित्यनैमित्तिके काम्येऽधिकृतस्य प्रवर्तकं उपाय
ज्ञापकं काम्येधर्मश्रीयं वचनं विधिरिति विधिश्चोदनेति पर्यायो

अधिकृतस्य ब्राह्मणादिवर्णत्रयस्येत्यर्थः तथाचक्षत्रियायैवकृ
तः प्रतिपादितहिप्रकाशोवेदो ब्रह्मस्वरूप प्रकारइतिफलितोर्थः
तथाचव्यासः आहूतोननिवर्तेतद्यूतायचरणायचेति यदाप्राव
श्च क्षत्रियोहिप्रजारक्षणंशस्त्रपाणिःप्रदंडयन् निर्जित्यपरसै
न्यानिक्षितिंधर्मेणपालयेदिति मनुरपि समोत्तमाधमैराजा
त्वाहूतःपालयन्प्रजाः ननिवर्तेतसंग्रामात्क्षात्रंधर्ममनुस्मरनि
ति तथा संग्रामेष्वनिवर्तित्वंप्रजानांचैवपालनं शुश्रूषाब्राह्म
णानांचराज्ञःश्रेयस्करंपरमिति राजाचात्रसमान्यतःक्षत्रिय
जातिरुच्यते श्रेयस्करमिति ऐहिकामुष्मिकभोगापवर्गलक्ष
णोभयफलप्रयोजकमुक्तं तथैवाह सर्वाध्यायांते ब्रह्मादिस
मयपदार्थज्ञानेसत्येवप्रयतनस्यजरामरणमोक्षायेतिप्रयोजनं
फलिति प्रवृत्तये आदावेवकथितं तथाचैषामासनासत्फलत्वे
तिभावः ननुवराहमिहिरादिभिराप्तैः मद्यांगनावादित्रनृत्त
गीतान्यक्षाहृष्याश्चमृगयाद्युनिद्रा परोक्षनिंदेचकामजानि
दशैव विद्याद्व्यसनानिदुःसामिति परिभाषितेषुदशसंख्येषुव्य
सनेषु मद्यादिमनयानामास्पदं मध्यमाहुः ननुयनमतिसत्व॰
श्रेयसांकर्षणायसमुपदत्तमतिःसंसक्तस्यानेंद्रियत्वाद्दूणयति
नहिभक्ष्याभक्ष्यमन्यानिचैव ग्रन्थानिगम्यागम्यादीनि तथा
पत्नीयद्यपिमातरंमदवशात्पत्नीवमाशीयतिस्वश्रीयत्यपिमं
दिरंब्रह्मधियालंकृपंचगेद्धीयति स्वल्पंवाउदयीयतीश्वरमयोमो
दात्स्यलीयत्यपि मिथ्रीयत्यपिपार्थिवंकिमपरंक्रुद्धयीश्वयमस्यय
पः तथा भूयोपिदीव्यतिजितोजयलिप्सयैवप्राप्नोतितत्स्वसवि॰
प्रोषतरंकदाचित् कृत्वाप्रियाणिमदतःपरितप्यवांतेभूयःपि
वेत्किमपिदोषविशेषकांक्षी तथा रोगाचारविवर्जितःपावइव
त्यकः शुद्धद्धंधवैनिःशंकोनिरपत्रपोगतघृणः कृच्छ्रादवाप्ता
प्तनः वेपुनोस्यनिवंधनंनप्रापयोलोकद्वयेनेक्षते मायावीकृ
तपांसनप्रकितवोदोषार्णवोनिःस्वइत्यादिनातद्दोषाविष्कर॰

णेन विजिगीषुं राजानं प्रति निषिद्धेषु अभ्यागमोत्सवमिषवं वा
मोपदेशो: कामं पिवेदमतिलोपकृदप्रकामं द्यूतं विनेंद्रियसुखा
नि दिष्टानि युक्त्या मन्यस्य जीवितफलं विषयैर्विना किमित्यादि
ना व्याख्यादिविषये वैयाघ्रन्नमत्यासौशमरपाटैवयागे मद्यस्य
१८ मित्रादयभ्यागमे विवाहोत्सवादौ च वादित्रनृत्यगीतादेः अतो च सर्व
कामित्या: अन्येषां च यथाकालानतिक्रमेणात्यासक्तिं हित्वा क
थं वित् संभावितेपि मसेव्यत्वं द्यूतं विनेति साक्षादुक्तेरन्येभ्यः सकाशा
द्धेषां तिष्ठा यावद् तावद् द्यूतं सर्वथैव निषिद्धमिति कथं तस्य वेदप्र
तिपादितत्वं संघटते श्रुतिविरुद्धेव दिस्मृतिरितिचेत्सत्यं किंतु
स्वातंत्र्येण मर्यांगनादिवत्सद्वत्थायथाकाल विनोदार्थं वा संसेवनं
व्यसनापरपर्यायमेव निषिद्धं न तु न: प्रयुभिगाहूतस्य राजसूयादि
नादिजयपूर्वकतज्जयद्धतकं धर्म्यमिदमिति बुद्ध्या चरितमपीति
एतदभिप्रायेणैव परिभाषणायेकामजानीत्युक्तं कामास्त्वेव
षणार्थलोभविनोदादिरूपात्मकतिविषयीभूतानीति तदर्थः त
तश्च युद्धप्रतिनिधिभूता द्यूतक्रीडापि लक्ष्मियं प्रतिवेदमेव प्रतिपा
दितास्तीत्यवतरं प्रसंगेति तथैव व्याख्याते अत एव प्राहुस्तेन नि
वर्तते त्यादिव्यासोक्तिरप्यन्वर्था यद्वा परमं ऊक्तनयेन रिपुवधे
गोब्राह्मणरक्षणाद्यभ्युपादौ च प्रवर्तकस्तद्रुपायस्तापकस्य कृत्य क्रिया
पिहितो वेदो ब्रह्मस्वरूपः प्रकाशते इति कीदृशं तद्ब्रह्म अत्र तं प्राह
विश्वो: परमेश्वरात् चरति स्रवति प्रकटीभवतीत्यक्षरं यस्य निः
श्वसितं वेदा इति श्रुतिरत्र प्रमाणं तथा च परमेश्वरस्य श्वासरूपेण
प्रकटीभूतो वैदिकानां विप्रवर्तको वेदो ब्रह्मपाह्वार्थ इति फलितो
र्थ: इति प्रथमः प्रश्नो निर्णीतः अथ किमध्यात्मं उच्यते इति द्विती
यमपि निर्णाययति स्वभावोऽध्यात्ममुच्यते इति भावः सत्तास्वभा
वाभिप्रायश्चेदात्मजन्मा स्थितिनामान्नुयाससनात् अथ विसर्गोभावो
भिप्रायः द्व्यादिरूपकृत्स्नजगदुत्पत्तिनिमित्तीभूतस्य स्वधादि
लक्षणः अभावः सर्वजगद्धितानुविधायि वाक्क्षोभमनोभावः

स्वभावः सोहेवंच यदायदाहिधर्मस्येत्यादिनाश्लोकद्वयेनप्रागेव
प्रतिपादितं सत्तारूपः परमेश्वरस्वभावः अध्यात्ममित्यात्मश
ब्देनोच्यते आत्मनोयत्रप्रतिबुद्धिजीवात्मनश्चततोधिकृत्यवर्तमा
नत्वात् अयंभावः परमेश्वरोऽहमितियन्नायर्थं तत्तद्धीरपुरुषरूपेण
स्वयमभिनवेनमूर्तिविशेषेणवावतरति अव्यभिचारिणीचन
दिक्षाश्रन्तोवमयंभावितिमहावीरप्रधानेनतदंसणन्नुप्राणितोहंस
मर्थस्तदनुगृहीतश्चयशोविस्तार्थैहि किंराज्यसुखादिकंपारत्रि
कंस्वर्गादिलोकसुखंचभुक्तांतेपवर्गमपिप्राप्स्यामितिकोति
भारोनिमित्तमात्रभूतस्य कश्चपापसंबंधस्तादिक्काशेवितस्यास्वमं
त्रस्यस्वोचितकर्मप्रवृत्तस्यपुण्यराशिंसंचिन्वानस्यममेतिनिश्च
येनप्रवृत्तिरध्यात्मशब्दार्थस्तानप्रवुक्तेत्येवंद्वितीयोनिर्णीतः
अधुनाकिंकर्मेति तृतीयमुत्तरयति भूतभावोद्भवकरोविसर्गः
कर्मसंज्ञितइतिभुक्ते द्व्याद्याहृतेभूतंप्राणिनीतेसमेषिक्षिति
कोशाद्भूतानांसमानांविधाविनयेत्यत्रप्रतिपादितसाम्ययोगा
रूढानांभावः येनदेहेनापदार्थेषाहृत्तानेप्रवर्तेतेसयाहृप्रवृ
त्तिनिमित्तीभूतोजातिगुणक्रियाद्यन्यतमरूपोधर्मः सचात्रक्रि
यात्मकस्तस्योद्भवःप्राकट्यंतंकरोतीतितादृशोविसर्गः सर्ग
विपर्ययः संहारोरिपुच्यातलक्षणःविसर्गोविसर्जनंबाणादीनां
मोक्षोवा सकर्मसंज्ञितःकर्मशब्दाभिधेयइत्यर्थः येनविधी
मानेनयत्तेभूताःसर्वत्रपुत्रमित्रारिषादिषुसमदर्शिनइति व्र
त्रेषुव्यपदेशाः प्रयुज्यतेसरिपुव्यातबाणमोक्षादिलक्षणाक्रि
याद्रूपोधर्मः कर्मशब्दार्थइतिभावः इतितृतीयोनिर्णीतः ३

मधुभाष्य

३॥

17

भाषा अनुवाद टीका ॥

श्रीकृष्णभगवान इस स्लोकसे लेकर तीन स्लोक के द्वारा अर्जुन की पृथक प्रश्न का सिद्धान्तरूपउत्तर कहते हैं कि नक्षरति गच्छति इति अक्षरं अर्थात् जिसका गमन औ आगमन नहीं है सोई अक्षर ब्रह्म है जो कहो कि जीव चैतन्य भी अक्षर होय न कोहै तो कहते है किनहीं जो परम अक्षर कहै जगत का मूल कारण है सोईब्रह्म जानोक्यों कि श्रुतिमे भीकहा है कि हे गार्गि वेद इसी ब्रह्माण्ड ही कोसोई ब्रह्म कहते हैं यह बातप्रसिद्ध है और उसी ब्रह्म का अंश जो जीव रूप होनेसे नाम स्वभाव और देह आदि अङ्गीकारकरिके भोक्तारूप से वर्तमान है वह जीवही अध्यात्म कहा है और भूत कहै जरायुज आदिकोंकी उत्पत्ति और उद्भव शब्दका यह अर्थ है कि सूर्यसे वर्षा वर्षासे अन्न औ अन्न से प्रजा ऐसे क्रमसे उत्तमरूपजो वृद्धिसोभूतोंका भाव और उद्भवकारीजो विसर्ग अर्थात् सर्व कर्म्म का उपलक्षणरूप देवतों को उद्देश करि द्रव्य त्यागरूप जो यज्ञ सोइ कर्म्म है ३ ॥

दोहा ॥

अक्षरपरमस्वभावहि ब्रह्मअध्यात्मसोय भूतस्थितिउत्पतिक रै द्रवेंकर्मसो होय ३ ॥

अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतं अधियज्ञो
ऽहमेवात्र देहे देहभृतांवर ४ ॥

शाङ्करभाष्यटीका

अधिभूतमिति अधिभूतं प्राणिजातमधिकृत्य भवतीति कोसौ क्षरः
क्षरतीति क्षरो विनाशी भावो यत् किञ्चिज्जनिमद्वस्त्वित्यर्थः पुरुषः
पूर्णमनेन सर्वमिति पुरि शयनाद्वा पुरुषः आदित्यान्तर्गतो हिरण्य
गर्भः सर्वप्राणिकरणानामनुग्राहकः सोधिदैवतं अधियज्ञः सर्वय
ज्ञाभिमानिनी देवता विष्णवाख्या यज्ञो वै विष्णुरिति श्रुतेः स हि विष्णु
रहमेवात्रास्मिन्देहे यो यज्ञस्तस्याहमधियज्ञः यज्ञो हि देहनिर्वर्त्यत्वेन
देहसमवायीति देहाधिकरणो भवति देहभृतांवर ४ ॥

आनन्दगिरिकृतटीका

सप्तति प्रश्नत्रयस्योत्तरमाह अधिभूतमिति अधिभूतञ्च किं प्रोक्तमि
त्यस्य प्रतिवचनमधिभूतं क्षरो भाव इति तत्राधिभूतपदमनूद्य तदुक्ते
मर्थं कथयति अधिभूतमित्यादिना तस्य निर्देशमन्तरेण निर्ज्ञातुमश
क्यत्वात् प्रश्नद्वारा तन्निर्दिशति कोसाविति कार्यमात्रमत्र संगृहीतमि
ति वक्तुमुक्तमेव व्यनक्ति यत् किञ्चिदिति अधिदैवं किमिति प्रश्ने पुरु
षश्चेत्यादिप्रतिवचने तत्र पुरुषशब्दमनूद्य मुख्यमर्थं तस्योपन्यस्यति
पुरुष इति तस्यैव सम्भावितमर्थान्तरमाह पुरिशयनाद्वेति वैराजे देहमा
साद्य आदित्यमण्डलादिषु देवतेषु योन्तरवस्थितो लिङ्गात्मा व्यष्टिकर
णानुग्राहकोत्र पुरुषशब्दार्थः सचाधिदैवतमिति स्फुटयति आदित्येत्या
ति अधियज्ञः कथमित्यादि प्रश्नं परिहरन्नधियज्ञशब्दार्थमाह अधिय
ज्ञ इति कथमुक्ता या देवता यामधियज्ञशब्दः स्यादित्याशंक्य श्रुतिमनु
सरन्नाह यज्ञो वै इति यैवं देवताधियज्ञशब्देनोच्यते सा च ब्रह्मणः स
काशादत्यन्ताभेदेन प्रतिपत्तव्येत्याह स हि विष्णुरिति शास्त्रीयव्य
वहारभूमिरत्रेत्युक्ता देहसामानाधिकरण्याद्वात्रेत्यस्य व्याख्यानं अ
स्मिन्निति किमधियज्ञो बहिरन्तर्वा देहादिति सन्देहो मा भूदित्याह
देह इति ननु यज्ञस्य देहाधिकरणत्वाभावात् कथं तथा विषयज्ञानि

गी॰
टी॰ अ॰

देवतात्वं भगवतो विवक्ष्यते तत्राह यज्ञोहीति एतेन तस्य बुद्ध्यादिव्याप्तिरि
ङ्गत्वमुक्तमवधेयं न हि परा देवता दर्शितरीत्याधियज्ञशब्दिता बुद्ध्यादि
ष्वन्तर्भावमननुभावयितुमलं देहान् बिभर्तीति देहभृतः सर्वे प्राणिनस्ते
षामेव वरः श्रेष्ठः युक्तं हि भगवता साक्षादेव प्रतिलक्षणं तस्मादं विदधा
नस्याङ्गेनस्य सर्वेभ्यः श्रेष्ठत्वम् ४ ॥

19

^ अधिभूतमिति

स्वामिकृतटीका

किं च क्षरो भावः विनश्वरो देहादिः पदार्थो भूतं प्राणिमात्रमधिकृत्य भव
तीत्यधिभूतमुच्यते पुरुषो वैराजः सूर्यमण्डलमध्यवर्ती स्वांशभूतसर्वदे
वतानामधिपतिरधिदैवतमुच्यते स वै शरीरी प्रथमः स वै पुरुष उच्यते आ
दिकर्ता स भूतानां ब्रह्माग्रे समवर्तत इति श्रुतेः अत्रास्मिन् देहे अन्तर्यामित्वे
न स्थितोऽहमधियज्ञः [redacted] । यज्ञादिकर्मप्रवर्तकस्तत्फलदाता च कथं वस्याप्यत्र च ब्रूतेनैवोक्तं
इष्टव्यमन्तर्यामिनो संगत्वादिभिर्गुणैर्जीववैलक्षण्येन देहान्तर्व
र्तित्वप्रसिद्धत्वात् तथा च श्रुतिः द्वा सुपर्णा
सयुजा सखाया समानं वृक्षं परिषस्वजाते
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचा
कशीति देहभृतां मध्ये
श्रेष्ठेति संबोधयन् त्वम
प्येवंभूतमन्तर्यामिनं प
राधीनस्वप्रवृत्तिनिवृत्तिम
न्वयव्यतिरेकाभ्यां बोद्धुम
र्हसीति सूचयति ॥ श्री ॥

पैशाचभाष्यटीका

अधिभूतं प्राणिजातमधिकृत्य भवतीति तत्र देवं दर्शयति क्षरो भावः क्षर
ति विनश्यतीति क्षरो भावो वस्तु विनाशि वस्त्वित्यर्थः पुरुषः पूर्णमने
न सर्वमिति पुरि शयानाद्वादित्यान्तर्गतो हिरण्यगर्भः सर्वप्राणिकरणा
नुग्राहकः स एवंभूतः पुरुषोऽधिदैवतमित्युच्यते अधियज्ञः सर्वयज्ञाभिमा
निनी देवता विष्णवाख्या यज्ञो वै विष्णुरिति श्रुतेः अत्रैव देहे कर्ममये शरी
रे देहभृतां वर ४ ॥

रामानुजभाष्यटीका

अधिभूतमिति ऐश्वर्यार्थिनां ज्ञातव्यतया निर्दिष्टमधिभूतं क्षरो भावः वि
यदादिभूतेषु वर्तमानस्तत्परिणामविशेषः क्षरस्वभावः विलक्षणश
ब्दस्पर्शादिः साश्रयविलक्षणा [illegible] श्रयाः शब्दस्पर्शरूपरसगन्धाः ऐश्व
र्यार्थिभिः प्राप्यास्ते स्वसंधेयाः पुरुषश्चाधिदैवतं अधिदैवतशब्दनि
र्दिष्टः पुरुषः अधिदैवतोपरिवर्तमानं इन्द्रप्रजापतिप्रभृतिकृत्स्नदै
वतोपरिवर्तमानं इन्द्रप्रजापतिप्रभृतीनां भोग्यजातविलक्षणशब्दादिभो १८
क्ता पुरुषः सा च भोक्तृत्वावस्थैश्वर्यार्थिभिः प्राप्यतयानुसंधेया अ
धियज्ञोऽहमेव अधियज्ञशब्दनिर्दिष्टोऽहमेव अधियज्ञः यज्ञैः आराध्य

तयावर्तमानः अत्रेन्द्रादौ मम देहस्थे तेजात्मतया वा स्थितोऽहमेव यज्ञेशाराध्य इति महायज्ञादिनित्यनैमित्तिकानुष्ठानवेलायां त्रयाणामधिकारिणामनुसंधेयमेतत् ४ ॥

अभिनवशंकरकृतटी॰

क्षरति स्रवति परिणामादिधर्मेणेति घटादिः पदार्थग्राम उच्यते पुरुषः आत्मा स चाधिदैवतं तत्र सर्वदेवतानां परिनिष्ठितत्वात् अत एवाधियज्ञो भोक्तृत्वेन यज्ञानवश्यकार्याणि कर्माण्यधिकृत्य यः स्थितः पुरुषोत्तमः सोऽहमेव अहमेव च देहस्थित इति प्रश्नद्वयमेकेन यत्नेन निर्णीतम् ४ ॥

परमार्थप्रपाटी॰

अधिभूतमिति क्षरो नश्वरो भावो देहादिपदार्थो भूतं प्राणिनमधिकृत्य वर्तते तदधिभूतं द्रष्टव्यश्चात्मादिवा पुरुषो वैराजः सूर्यमण्डलवर्ती यदेतन्मण्डलं तपति यश्चास्मिन्मण्डले पुरुष इति श्रुतेः स सर्वांशभूतसर्वदेवतानामधिपतिरधिदैवमुच्यते अत्रास्मिन्देहेऽन्तर्यामित्वेनास्थितोऽहमेवाधियज्ञः दैहिकयज्ञादिकर्मप्रवर्तकस्तत्फलदाता ननु तर्हि अध्यात्माधियज्ञयोः को भेद इति चेन्न अन्तर्यामिनोऽसंगत्वादिगुणैर्जीववैलक्षण्यं तादात्म्येनेति श्रुतिनादिनं स्मृतिश्च द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति रावणभाष्ये अत्र त्रैलोक्यपक्षिद्वयदृष्टान्तेन जीवपरमात्मानौ स्तूयेते यथा लोके द्वौ सुपर्णौ सुपर्णौ शोभनगमनौ सयुजा समानयोगौ सखाया सखायौ समानाख्यानौ समानं वृक्षमेकं देहाकारवृक्षं परिषस्वजाते आश्रयः तयोरन्य एकः पिप्पलं फलं स्वाद्वत्त्यत्ति अपरः अनश्नन् अभिचाकशीति अभिपश्यति तद्वत् द्वौ सुपर्णस्थानीयौ देहस्थपरमात्मानौ सयुजा समानयोगौ योगो नाम संबंधः स च तादात्म्यलक्षणः स एवात्मा जीवात्मनः स्वरूपमेव मन्यस्यापि इत्येकात्म्यम् अत एव समानख्यानौ यस्य यादृशाख्यानं स्फुरणं परमात्मनस्तद्देवेतरस्यापि अत एव सखायौ एकरूपप्रकाशाविति अर्थः ४ ॥

वनमालीटी॰

अग्रिमप्रश्नत्रयस्योत्तरमाह अधिभूतमिति भूतान्यशरीरानुजीवानधिकृत्य तदुपकारित्वेन यद्वर्तते तदधिभूतं क्षरतीति क्षरः विनाशी कार्यरूपो भावो वियदादिः स शरीरजीवोपकारकत्वेनाधिभूतपदेनोच्यत इत्यर्थः पुरुषो जीवो विशेषो हिरण्यगर्भः हिरण्यगर्भः समवर्तताग्र इ

गी॰
टी॰
अ॰

२०

तिकृत्या आदिकर्त्ता सभूतानां ब्रह्माग्रे समवर्त्ततेत्यादिस्मृत्याच प्रतिपा
दितः अधिदैवतं सर्वजीवाधिपतित्वेन जीवविशेषान् अधिदैवतानींद्रादी
नधिकृत्याधिपतित्वेन वर्त्तत इत्यधिदैवतं पुरिशेते इति पुरुषः यद्यपि
जीवसामान्यमध्यात्मपदेनोक्तं तथापि हिरण्यगर्भस्य सर्वजीवगुरु
त्वाद्विशेषतो ज्ञानाय पृथगुक्तिः संकर्षणो वा पुरुषः सर्वदेवकप्रे
रकत्वादधिदैवतं देवकप्रेरकत्वादियमविशिष्टस्य विशेषतो ज्ञा
नाय स्वीयरूपविशेषस्य संकर्षणस्योक्तिः अधिगतो यज्ञमित्यधि
यज्ञ अधिगतो यज्ञो येन इति वा अत्र देहे प्रत्यक्षसिद्धयज्ञादेः कं
र्तृभोक्तृत्वफलदातृणां सर्वप्राणिनां देहप्रेरकत्वेन यज्ञादिप्रवर्त्त
कत्वेन वांतर्यामितयाधितोऽहमेव मां साधियज्ञं च ये विदुरित्य
त्राधियज्ञसाहित्यस्योक्ता अक्षरं ब्रह्म परममिति परं ब्रह्मत्वोक्त्याचा
धियज्ञस्य स्वस्माद्भेदप्रतीतिस्तन्निरासायाधियज्ञोऽहमेवेत्येवका
रः तथाच बृहद्गुणकत्वजगदुदयादिकर्तृत्वव्यापकत्वादिना
हं ब्रह्मपदवाच्योंऽतर्यामितया यज्ञादिप्रवर्त्तकत्वेनाधियज्ञादि
पदवाच्यः साहित्यं चाभेदेपि मत्स्यामिवाचिंत्यशक्त्या रूपभेदे
नोपपन्नं भोक्तारं यज्ञतपसां इत्यादिना भगवतः सर्वयज्ञभोक्तृ
त्वादिनाधियज्ञत्वं प्रसिद्धमेवेति कथमिति प्रश्नस्य परिहारः पृ
थक्त्वेनोक्तः ४ ॥

ऊहमवैजयंती टीका

एवं प्रश्नत्रयस्योत्तरमुक्त्वेदानीमवशिष्टानां त्रीन् प्रश्नानाह अधिभूत
मिति क्षरः प्रतिक्षणं क्षरति परिणमतीति क्षरः परिणामस्वभावो
भावः प्रकृतिकार्यरूपः स्थूलदेहादिपदार्थः अधिभूतं भूतं प्रा
णिनमधिकृत्य भवतीत्यधिभूतमिति मयोच्यते पुरुषश्चाधिदैव
तं च पुनः पुरुषः समस्तभोग्यमात्राणां प्रजापतींद्रादीनां विल
क्षणः शब्दादिविषयभोक्ता समष्टिविराड्रूपोऽधिदैवतं सर्वा
णि प्रजापतींद्रादीनि देवता ।

न्यधिकृत्य वर्तमानं ममाधिदैवतमित्युच्यते हे देहभृतांवरश्रेष्ठेति संबो सू॰
धयेनयतत्स्वसर्वदेहभृतांश्रेष्ठोऽस्मि तोहेयोपादेयवस्तुज्ञानेनतवडुले
भेन भवतीति सूचितम् अत्रास्मिन्व्याकृतिके देहे अधियज्ञः यज्ञमधिकृत्य
रा॰ वर्तते इत्यधियज्ञो यज्ञैराध्यत्वेन वर्तमानो यजमाने शुभदात्मीय भूतेषु प्रा
जापतीन्द्रादिदेवतात्मनयावस्थितस्तत्तद्रूपेण सर्वयज्ञैराराध्योऽहमे
वनत्वमद्भिन्नः प्रजापतीन्द्रादिः आतो दिव्यपाणामधिकारिणो यज्ञा
दिकर्मानुष्ठानकाले ह्यवश्याधियज्ञोऽप्यतयानुसंधेयोऽपि चाध्यात्मा
दीनि तत्साज्जतयाऽनुसंधेयानीति भावः ४ ॥

मधुसूदनीटीका

संप्रत्यग्रिमप्रश्न त्रयस्योत्तरमाह ॥

क्षरतीति क्षरो विनाशी भावो यत्किंचिज्जनिमद्वस्तु भूतं प्राणिजातमधि
कृत्य भवतीत्यधिभूतमुच्यते पुरुषो हिरण्यगर्भः समष्टिलिंगात्मा
व्यष्टिसर्वकरणानुग्राहकः आत्मैवेदमग्र आसीत् पुरुषविध इत्युपक्र
सर्वस्मात् म्य स यत्पूर्वोऽस्मात् सर्वान्पाप्मन औषत्तस्मात्पुरुष इत्यादिश्रुत्या प्रति
पादितः चकारात् स वै शरीरी प्रथमः स वै पुरुष उच्यते आदिकर्ता स भू
तानां ब्रह्माग्रे समवर्तत इत्यादिस्मृत्या च प्रतिपादितः अधिदैवतं देवता
न्यादित्यादीन्यधिकृत्य चक्षुरादिकरणान्यनुगृह्णातीति तथोच्यते
अधियज्ञः सर्वयज्ञाधिष्ठाता सर्वयज्ञफलदायकश्च सर्वयज्ञाभिमानि क
नी विष्ण्वाख्या देवता यज्ञो वै विष्णुरिति श्रुतेः स च विष्णुरधियज्ञोऽहं वा
सुदेव एव न मद्भिन्नः कश्चिदत एव परब्रह्मणः सकाशादत्यन्ता
भेदेनैव प्रतिपत्तव्य इति कथमित्याकांक्ष सचात्रास्मिन्मनुष्यदे
हे यज्ञरूपेणावर्तते बुद्ध्यादिव्यतिरिक्तो विष्णुरूपत्वात् एतेन स कि
मस्मिन्देहे न तो वहिर्वा देहे चेत्कोऽत्र बुद्ध्यादिव्यतिरिक्तो वेति सं
देहो निरस्तः मनुष्यदेहे च यज्ञस्यावस्थानं यज्ञस्य मनुष्यदेहनिर्वर्त्य
त्वात् हे देहभृ
तांवर सर्वप्राणिनां श्रेष्ठेति संबोधयन् प्रतिक्षणं मत्संभाषणात्

गी॰ कृत कृत्यस्त्वमेतद्बोद्धुं योग्योसीति प्रोत्साहयन्नर्जुनं भगवान् अर्जुनस्य सर्व
टी॰ अ प्राणिश्रेष्ठत्वं भगवदनुग्रहातिशयभाजनत्वात्प्रसिद्धमेव [illegible]
[illegible] ४ ॥

९१

मधुसूदनी टीका

प्राणिजातं देहि यत् किंचिज्जनिमद्वस्तुमात्रं अधिभूतपदेनोक्तं विना
शीभावरूपं च पूर्णं सर्वमनेनेत्यतिशयनात्पुरुषो वैराजो वा सूर्यमण्डलमध्या
स्थः पुरुषश्चाधिदैवतं सर्वप्राणिकरणानामनुग्राहकः पुमान्
हिरण्यगर्भो वा समष्टिव्यष्टिरूपः स एव शरीरी प्रथमः स वै पुरुष
उच्यते आदिकर्ता स भूतानां ब्रह्माग्रे समवर्तत विसर्गादिदेवताश्चोति
सर्वयज्ञाभिमानिनी सर्वविष्णुप्रतिपाद्यत्वोपहवा यष्टदेवोत्र मत्परः अतोत्र
ह्लादयानेदादत्मेनाभेदत्वोहदेः प्रतिपत्तव्यश्चास्मिन्देहे यज्ञरूपतः
बुद्ध्यादिव्यतिरिक्तोखिलविष्णुरूपतया स्थितः मनुष्यदेहे यज्ञस्यावस्था
नं हरिणेति यतो मनुष्यदेहेन निर्वर्त्यत्वादिकर्मणः त्वं सर्वदेहिनां
श्रेष्ठ मत्तोनिध्यात्मतत्त्वं मयोत्सभावणादेतद्बोध्ययोग्योसि सर्व
था सर्वदेहिवरत्वं तु प्रसिद्धं नृसगादिषु अर्जुनस्यैव भगवत्प्रसादा
तिशयेनैव ४ ॥

नीलकंठी टीका

क्षरो भावो जनिमद्वस्तुकर्मफलभूतं तन्नाशनभूतं वनदधिभूतमित्यु
च्यते अधिदैवतं पुरुषः सर्वाः समष्टिवस्तीति सर्वकरणानुग्राहकः सक
लदेवतात्मा हिरण्यगर्भः अधियज्ञो यज्ञाभिमानी विलक्षणतर्यामी सोहमे
वदेहस्मिन्नत्रास्मिन्देहे देहभृतां वर ४ ॥

आनन्दीटीका

क्षरति स्वभावान्न्यवति विकारमाप्नोतीति क्षरः देहेंद्रियविषयल
क्षणो भावोयः कश्चन पदार्थः भूतान्यधिकृत्य भवतीत्यधिभूतमधि
भूतं भूताधीनलयोत्पत्तिरित्यर्थः पुरिशेतेरतिपुरुषः ज्ञानावेकवव

नम् सर्वे देवताः अधिदैवतं दैवतं परमेश्वरोधिकृतो यत्र तत्रेति शु
भस्मानतत्कर्मफलभोगार्थं तांस्तान्सर्वयोनिषु परमेश्वराधीनत्वेन म
र्थः अत्रास्मिन्मनुष्यदेहेहमेवाधियज्ञः यज्ञेषु द्रव्ययज्ञादिष्वहं प
रमेश्वर एवाधिकृतस्तत्तद्यज्ञफलप्रदः यज्ञभोक्ता चेत्यर्थः ४ ॥

अथाधिभूतं किमुच्यते इत्यस्योत्तरं ॥ रामकंठीटीका

अधिभूतं क्षरो भाव इति क्षरः परिणामरूपतया स्वरूपसंचलनपरो यो
भावः प्रतिप्रहं प्रविभक्तकार्यकारणकलापात्मकः पदार्थः सोधि
भूतमुच्यते तस्य भूताधीनत्वात् भूतरूपा प्रकृतिः कार्यकारणात्म
नाविपरिणमत इति क्षरो भावोधिभूतमिति चतुर्थप्रश्नस्योत्तरम्
अथाधिदैवं किमुच्यते इत्यस्योत्तरम् पुरुषोधिदैवतमिति पुरुषः दे
वत इति जानाविकवचनं अतस्तेन पुरुषात्मतदात्मतानुगुणेन प
रिणतप्रविभक्ततत्तत्कार्यकारणात्मकक्षरभावरूपे धिष्ठाय त
थावतिष्ठमानाधिदैवतं भजन्त इति पुरुषोधिदैवतमिति पं
चमप्रश्नस्योत्तरम् अथात्र देहे कथं केन प्रकारेण कश्चाधियज्ञ इ
त्यस्योत्तरमाह अधियज्ञोहमेवात्रेति परस्परविभक्तकर्त्रभिमानावि
ष्टनानादेवताधिष्ठितेस्मिन्देहे यद्यपि देवता एवाधियज्ञत्वमर्हन्ति
तेन तत्फलाभिसंधिनां तत्तद्यागविधिमनुतिष्ठतां तादृशमविच्छि
न्नमात्मानं कर्तृत्वेनाभिमन्यन्ते तथापि पारमार्थिकस्य कर्तृत्वस्या
नन्यसाधारणत्वादहमेव मुख्यः कर्ता सर्वयज्ञानामित्यहमेवाधि
यज्ञो नाम कथमिति प्रकारप्रश्नेप्येतदेवोत्तरमहमेवाहमित्य
नेनैव प्रकारेणाहमधियज्ञः इदमत्रतात्पर्यम् यद्यपि देवतानां शा
रीराद्यात्मत्वं न तन्निमित्ताहंकारो यद्यपि परस्वरूपनिष्ठा ममतया रहं
कारत्वेनास्ति कश्चिद्भेदः केवलं मायावशात्तद्देवतानामवच्छेद्याद्या
लम्बननिष्ठत्वादवच्छिन्नत्वं वच्छिन्नेश्वरस्य हमेव नान्यो शुद्धाहंकारनिष्ठत
याधियज्ञो न प्रकारान्तरेणेति सर्वत्रेष्वधिकृतः प्रभुरहमेव यज्ञके।
अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव चेति षष्ठप्रश्नस्योत्तरम् अनेनै

वासोयमतुस्वभा
निष्ठत्वादन ^

गी॰
टी॰
अ॰ ८

२२

वमायेणाधिभूतमहमेवेतिबोद्धव्यम् भूतभावेनपरमार्थतोहमेवस्थि
तइत्यर्थः तथैवाधिदैवतंतेनपुरुषाख्योयःप्रकारउक्तस्तत्राहमेवाधि
ष्ठितइतिप्रश्नषट्कस्यसंक्षेपतोव्याकरणमेवंवेदितव्यम् यत्तुब्रह्माध्या
त्मकर्मसंज्ञंपरमात्मतत्त्वप्रकृतिपरिणामरूपंसममेतत्त्रयंनिर्णी
तं तत्रयथाक्रममधियज्ञाधिदैवताधिभूतभावेनाऽहमेवतत्त्वतोव्य
वस्थितोनमद्व्यतिरिक्तंकिंचित्सम्भवति तथासममेतेबलात्दृढाः
कृतवन्तमिमादित्वान्तत्रयमेनतदुक्तासाधिदैवंमांसाधियज्ञंचतेविदु
रिति नव्यापकत्वेनात्मानंभगवान्निर्दिष्टवानिति प्रयाणका
लेदेहाद्देहान्तरसंक्रान्तिसमयेनियतात्मभिर्निगृहीतान्तःकरणैः
कथंज्ञेयोसीत्यस्योत्तरम् ४ ॥

लासिकी ~~[illegible]~~टीका

एवंजीवस्वरूपस्यज्ञेयंवस्तुजातमाख्याय विदेहमुक्तस्यापेक्षितमीयमर्थजातमाह ॥

क्षरतिचलतितत्तदवस्थाभेदेनेतिक्षरोभावः भवनधर्मकोऽजी
वाख्योऽधिभूतमुच्यते पंचभूतानिस्थूलसूक्ष्मरूपाण्यात्माध्यासे
नाधिकृत्यवर्तमानत्वात् तथापुरुषःपुरिदेहेतात्त्विकपरामर्शा
नवलम्बनेनशेतेइतिपुरुषआत्मासांख्याभिमतः वेदान्त्यभिम
तःसाक्षीकूटस्थइति अन्यतन्त्राभिमतःपरमात्मेतिसोऽधिदैव
तमुच्यते देवतानांकरणेश्वरीणांखेचरीगोचरीदिक्चरीभूचरी
रूपाणांचतत्रैवपरिनिष्ठितत्वात् तदुक्तं यतःकरणवर्गोयंविमू
ढोमूढवत्स्वयं स्वहान्तरेणवक्रेणप्रवृत्तिस्थितिसंहृतीः लभ
तेइत्यादि तथात्रदेहेऽन्तर्यामित्वेनस्थितोहमीश्वरएवाधियज्ञो
ता यज्ञादिकर्मप्रवर्तकोतत्फलदातृत्वात्तुयदहस्पति ईश्वरःसर्वभू
तानांहृद्देशेऽर्जुनतिष्ठतिइति प्रकारप्रश्नेध्यानदेवोत्तरं तथाहिअ
हमेवाहन्तयापरामृश्यइत्यनेनप्रकारेणाहमीश्वरोधियज्ञोना
न्यइत्येवकारेणाध्वनितं तदुक्तंविद्रूपानन्दपंचाशिकायां स्वपरा
वभासनक्षमआत्माविश्वस्ययःप्रकाशोसौअहमिति सपकत

क्तोहन्तास्थितिरीदृशी तस्येति तथा चोक्तमुत्पलदेवैः प्रकाशस्यात्म
विश्रान्तिरहंभावो हि कीर्तितः उक्ता च सैव विश्रान्तिः सर्वापेक्षानिरोध
तः स्वातन्त्र्यमथ कर्तृत्वं मुख्यमीश्वरतापि चेति जीवत्वावच्छिन्नदेहा स्य
लंबनोऽहंकारः ममत्वानवच्छिन्नस्वस्वभावनिष्ठाहन्तेति भवति तद्भेदः
[illegible]
[illegible] ४

पंचोलीटीका

किं च अधिभूतमिति हे देहभृतां वर क्षरो भावः विनाशी भावः अ
धिभूतं प्राणिजातमधिकृत्य भवतीत्यधिभूतं च पुनः पुरुषः पु
रि शयनात्पुरुषः उच्यते आदित्यान्तर्गतो हिरण्यगर्भः सर्वव्यापक
श्चाधिदैवतामत्रास्मिन् देहे अधियज्ञः सोऽधियज्ञोऽहं सर्वयज्ञाभिमानी
विष्ण्वाख्या देवता सोऽधियज्ञोऽहम् ४

रसगावीरसमिद्धेयिनी॥

अथाधिभूतं च किं प्रोक्तमित्यस्योत्तरमाह अधिभूतं क्षरो भाव इति क्ष
रश्चंचलो विसंवादिफलः स विनाशफलो वा भावो भक्तिश्रद्धालक्षणो
ऽधिभूतशब्दवाच्यः भूतान्देवताविशेषानधिकृत्य वर्तमानत्वात् अयं
चात्राभिप्रायः मद्व्यतिरिक्तदेवताभक्तानां ताभ्यस्ताभ्यो देवताभ्यो वर
लाभादाभिचारिककर्मसिद्धावपि फलं पापगतिप्रदमेवेति प्रतिपादि
तं चैतत्कामैस्तैस्तैर्हृतज्ञाना इत्यादि च ततः श्लोकद्वयाच्छ्रद्धाभावेना
न्यदेवताराध्याभिचारिकं कर्म निरयगतिप्रदं विज्ञाय मामेव विष्णु
रूपाभक्त्याधारणीकृत्य स्वकर्मणि प्रवर्तते इति भावः इत्यं च दृष्टोऽपि नि
रीतः अथाधिदैवं किमुच्यते इति पंचमं विवृणोति पुरुषश्चाधिदैव
तमिति पुरुषो वा स्वमानवा विति कोपस्तु रुषपाद्देनामनुष्यजातिरु
च्यते जातौ चैकवचनं तथा च पुरुषाः पौरुषलक्षणविशिष्टाः स्त्रिया
अधिदैवतशब्दवाच्याः देवतान्यस्तादिदेवतानिवन्ध्यादीन्यधिकृत्य
वर्तमानत्वात् एतदुक्तं भवति अत्र दैवताधिकारिणः स्त्रियाः यद्यर्थे

च तासामाराधनं सम्पुरुहविषयेरिषुत्वात् तद्रूपोऽर्थः क्षत्रियेणावश्यं संपाद
नीयइत्यपि देवतत्तानप्रयोजनमिति अयं पंचमो निर्णीतः ५ अथा
पि यत्तः कथंकोऽत्र देहेऽस्मिन्मधुसूदनेत्यस्योत्तरं अपि यज्ञोऽहमेवात्र देहे
देहभृतां वरेति देहे देहभृतां वर देहं विभ्रतिपोषयंतिनिःसपत्नता
विधानेन सुखं प्रापयन्ति इति देहभृतः क्षत्रियजातिकास्तेषां वरश्रे
ष्ठ यद्वा देहं विभ्रति धारयंति इष्टनिग्रहाद्यर्थं येते देहभृतो मदंशांश
वतारास्तेषां वरश्रेष्ठ मदंशावतारत्वात् अनेन संबोधनेन तवेदृशो
व्यामोहो न युक्त इति दर्शयति अत्र देहे प्रश्नवाक्यव्याख्यानसाधेणास
मरेऽहमेवाधियज्ञो यज्ञाधिकृतो देवाद्यनेकभेदभिन्नपुरुहूयज्ञथीष
रोऽस्मि किमुक्तं भवति यथैव देवादिप्रकारभिन्नपुरुहूयज्ञाधिकारि
णः प्रजाः स्रष्टाः अतोऽहमेव तेषां साध्यसिद्धेः सहायः फलप्रापक
इतिसमरे मद्ध्यानमेव विधीयमिति कथंध्येय इति प्रकारप्रश्नेऽवा
ऽहमेवेति सावधारणवचनेनोत्तरं ज्ञेयं अयमाशयः अहमेवैतादृ
शाकृत्याकृतिमां ध्येय इति यदुक्तं भवति यथा मयातत्तदव
तारदेहमंगीकृत्य ते ते दुःसाध्या अपि नारदयामद्भवीरादनवप्रति
योगिकपुरुहूयज्ञाः संपादितास्तथैव तां तां मन्मूर्तिं मनसा संचिं
त्य समरयज्ञः संपाद्य इति एवं षष्ठो निर्णीतः ६ ॥ ४ ॥

मधुभाष्य

४ ॥

और क्षर कहे विनश्वर जो देह आदिको प्राणी मात्रको अधिकार।
करके स्थिति करे है इस से अधिभूत कहावे है और पुरुष कहते
है सूर्य मण्डलवर्ती विराट को जो अपने अंशरूप समस्त देवतो
के अधिपति है वह अधिदैव है अधिदैव कहते अधिष्ठात्री देवता
को यह श्रुति से कहा है कि सोई विराट पुरुष प्रथम शरीरधा
री सकल भूतोंके आदि कर्त्ता औ ब्रह्माके भी पूर्व वर्त्तमानथे औ
र इस शरीर मे अन्तर्यामी रूप से वर्त्तमान हम को अधि यज्ञ
कहे यज्ञ की अधिष्ठात्री देवता तथा कर्मफल दाता जानो इस से अधियज्ञ किस रूप स्थि
करते इस ^
^ प्रश्नका उत्तर भया क्योंकि यही अन्तर्यामी की असङ्ग आदि गुण
के द्वारा जीव के साथ भिन्नता पूर्वक देह के बीच वर्त्तमान।
ता लोकमे प्रसिद्ध है सो श्रुतिभी कहती है कि मित्रभावसे एक।
स्थानमे रहने वाले जो जीव औ अन्तर्यामीरूप ये दोनो सुन्दर
पत्रयुक्त शरीर रूप एक वृक्षपर स्थिति किये हैं तिन के म
ध्य एक फल भोगी औ दूसरा साक्षीमात्र कहे देखने वाला है
और हे देहभृतां वर नरश्रेष्ठ अर्जुन इस सम्बोधनसे यह जना
या कि तुमभी अपनी प्रवृत्तिरूप कर्मो की अन्वयव्यतिरेकात्
रूपसिद्धि असिद्धिमे वही अन्तर्यामीके अधीन हो सो सुतरां अ
न्वयव्यतिरेक के द्वारा इस अन्तर्यामीकोतुम आप जानने के योग्य
हौ ४ ॥

दोहा

क्षरोभाव अधिदैव है पुरुष कह्यो अधिदेव मे अधिप जंहि देह
मे है जीवन वर एव ४॥

94

अन्तकाले च मामेव स्मरन्मुक्त्वा कलेवरं यः
प्रयाति स मद्भावं याति नास्त्यत्र संशयः ५

शांकरभाष्यं

अंतकाल इति अन्तकाले च मरणकाले मामेव परमेश्वरं विष्णुं
स्मरन्मुक्त्वा परित्यज्य कलेवरं शरीरं यः प्रयाति गच्छति स मद्भा
वं वैष्णवं तत्त्वं याति नास्ति न विद्यते अत्रास्मिन्नर्थे संशयो याति वा
न वेति ५ ॥

आनंदगिरिकृतटी०

यत्तु प्रयाणकाले चेत्यादि चोदितं तत्राह अन्तकाले चेति मामे
वेत्यवधारणेन अध्यात्मादिविशिष्टत्वेन स्मरणं व्यावर्त्यते वि
शिष्टस्मरणे हि चित्तविक्षेपात्तत्प्रधानस्मरणमपि स्यान्न च मरण
काले कार्यकरणपारवश्याद्भगवदनुस्मरणासिद्धिः सर्वदैव नै
रन्तर्येणादरधिया भगवति समर्पितचेतसः तत्कालेऽपि कार्य
करणजातमगणयतो भगवदनुसन्धानसिद्धेः शरीरे तस्मिन्नहं
ममाभिमानाभावादिति यावत् प्रयातीत्यत्र प्रकृतशरीरमपादा
नं ब्रह्म वेद ब्रह्मैव भवतीत्यादिश्रुतिमाश्रित्याह नास्तीति व्यासे
धं संशयमेवाभिनयति याति वेति ५ ॥

स्वामिकृतटीका

प्रयाणकाले च कथं ज्ञेयोसीत्यनेन पृष्टमन्तकाले ज्ञानोपायं तत्
फलं च दर्शयति मामेवोक्तलक्षणमन्तर्यामिरूपं परमेश्वरं स्मरन्
देहं त्यक्त्वा यः प्रकर्षेणार्चिरादिमार्गेणोत्तरायणपथा याति स
मद्भावं मम स्वरूपतां याति अत्र च संशयो नास्ति स्मरणं ज्ञानोपा
यो मद्भावापत्तिश्च फलमित्यर्थः ५ ॥

पैशाचभाष्यं

अंतकाले मरणकाले च मामेव विष्णुं स्मरन्मुक्त्वा परित्यज्य क
लेवरं शरीरं यः प्रयाति म्रियते मद्भावं विष्णुभावं वैष्णवं पदं याती
त्यत्र संशयो नास्ति ५ ॥

रामानुजभाष्यटी० ॥

गी॰ अंतकाल इति इदमपि त्रयाणां साधारणं अंतकाले मामेव स्मरन्
टी॰ कलेवरं त्यक्त्वा यः प्रयाति स मद्भावं याति मम यो भावस्तं तदा
अ॰ नीं यथा मामनुसंधत्ते तथाविधाकारो भवतीत्यर्थः यथा भ
रतादयः तदानीं स्मर्यमाणमृगसजातीयाकाराः संभूताः ५

२५

अभिनवगुप्तकृतटीका

अथ योऽवशिष्टः प्रश्नः कथं प्रयाणकाले ज्ञेयोऽसीति तं निर्णा
यति उत्तरश्लोकगम्यार्थः ५ ॥

परमार्थप्रपाटीका

अंतकाले इत्यनेन तत्कालज्ञानोपायं दर्शयति मामेवोत्कल
क्षणं अंतर्यामिरूपं परमेश्वरं यः स्मरन्देहं त्यक्त्वार्चिर्मार्गेण
याति स मद्भावं मद्रूपतां प्राप्नोति अत्र च संशयो नास्ति ५

वनमालीटीका

प्रयाणकाले च कथं ज्ञेयोऽसीति प्रश्नस्योत्तरमाह अंतेति
स्मर्तव्यः सततं विस्मर्तव्यो न जातुचिदित्युक्तनित्यस्मर
णस्यच्छायाकल्पशाहः सदनंतगुणलयं जगदुदयादिली
लं सच्चिदानंदघनविग्रहं सर्वेश्वरं सर्वांतर्यामिनं वासुदेवं मा
मेव स्मरन् सदा चिंतयन् तत्संस्कारपाटवात्समस्तकरणवै
कल्यवत्यंतकालेपि स्मरन्कलेवरं त्यक्त्वा देहाभिमानं त्यक्त्वा
प्राणवियोगकाले यः प्रयाति सोर्चिरादिमार्गेण मद्भावं पू
र्णत्वनिर्गुणत्वादिरूपं मत्साम्यं याति निरंजनः परमं साम्य
मुपैतीति श्रुतेः इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागता इति
वक्ष्यते अर्चिरादिमार्गस्तु अथ यदु चैवास्मिन्शव्यं कुर्वंति य
दु च नार्चिषमेवाभिसंविशंत्यर्चिषोहरह्न आपूर्यमाणपक्षमा

पूर्यमाणपक्षाद्यान् षडुदङेति मासांस्तान्मासेभ्यः संवत्स
रं संवत्सरादादित्यमादित्याच्चंद्रमसं चंद्रमसो विद्युतं तत्पु
रुषो मानवः स एनान् ब्रह्म गमयतीति श्रुतिसिद्धः ब्रह्मज्ञा
निनोऽस्मिंल्लोके शव्यं समीचीनं कुर्वंति न वा सर्वथार्चिषमे
वाभिसंभवंति तन्मार्गेण ब्रह्मैव प्राप्नुवंतीत्यर्थः अत्रार्चिरा
दिपदेन तत्तन्मार्गाधिष्ठातारो देवा उच्यंते तन्मार्गगतानां प्र
तीकोपासकानां व्यापकोपासकानामप्यधिकृतानां नारदा
दीनां ब्रह्मणा सह मोक्षः सोऽश्नुते सर्वान्कामानिति श्रुतेः
ये वानधिकारिणो व्यापकानां तद्गुणलयब्रह्मोपासनया
जाततदपरोक्षाः शुकादयस्तेषां तन्मार्गेण स्वयं स्वस्वरूपा
विर्भावरूपो मोक्षः यद्यपि ब्रह्म व्यापकं सर्वत्रैवास्ति स्वयोग्यपाशे
षविशेषविशिष्टब्रह्मापरोक्षपूर्णप्रमादश्रुतस्य जातमेवेति।
कर्तव्यं प्राप्यं च किंचिन्नास्त्येव तथाप्यस्माच्छरीरात्समुत्थाय
परं ज्योतिरूपसंपद्यते स्वेन रूपेणाभिनिष्पद्यते स तत्र पर्येति
जक्षत् क्रीडन् रममाण इत्यादिश्रुत्यनुसारात् प्राकृतांशस्य
लिंगदेहादेर्निःशेषतया नाशो लोकस्य भगवन्मूर्तिविशे
षप्राप्तिरेव न च तस्य प्राणा उत्क्रामंतीत्यनुत्क्रमणश्रुतिवि
रोध इति वाच्यं तासां मूर्द्धानमभिनिःसृतैका तयोर्ध्वमाय
न्नमृतत्वमेति स एवं विद्वानस्माच्छरीरभेदादूर्ध्वमुत्क्रम्यामु
ष्मिन् स्वर्गे लोके सर्वान्कामानाप्त्वामृतः समभव
दिति श्रुत्या ऊर्ध्वमेकः स्थितस्तेषां यो भित्त्वा सूर्यमंडलं ब्र
ह्मलोकमतिक्रम्य तेन याति परां गतिमिति स्मृत्या चोत्क्र
मणोक्तेः न तस्य प्राणा उत्क्रामंतीत्यत्र यावत्कर्मसंबंधिप्रा

गी॰
टी॰
अ॰

९८

णेनामत्युत्क्रमणमुक्तं नत्वतस्याप्युत्क्रमणंजन्माभा
वात्तस्यप्राणोत्क्रमणरूपंमरणंनभवतीत्यर्थः प्राणादी॰
नामिहैवाशेषेणस्वस्वकारणेषुपृथिव्यादिषुलयोनतुस्व
र्गादिगामिनइवांशेनतेनसहगच्छतीत्यर्थः अत्रसदाचिं
तनाद्भगवदपरोक्षे ततोभगवंतंप्राप्यस्वस्वरूपाविर्भावरू
पमोक्षेसंदेहोनास्तीत्यर्थः ५ ॥

अथप्रमेवैजयन्ती टीका

नियतात्मभिः प्रयाणकालेकथंज्ञेयोसीतिप्रश्नस्योत्तरंव
दन्नुत्तेषांत्रयाणांसाधारणंप्राप्यमाह अंतकालेचेति ।
अन्तकालेमृत्युसमयेयोगिध्येयपदांबुजंसर्वकारणंस
र्वेश्वरंवसुदेवनंदनंमामेवनतुमदन्यंदेवंस्मरन्नुचिंतय
न्नुसन्यःकोपिमद्भक्तःकलेवरंस्थूलदेहंमुक्त्वापरित्यज्य
प्रयातिस्वाधिकारयोग्येनमार्गेणगच्छतिसभक्तोमद्भावं
ममयोभावःस्वभावःसोऽपहतपाप्माविजरोविमृत्युः
विजिघत्सोपिपासःसत्यकामःसत्य
संकल्पइत्यादिश्रुतिसि
द्धःस्वभावःसम
द्भावस्तंयाति
प्राप्नोति अत्रा
स्मिन्मद्वचनेसंशयः
यथा ॥

कारंस्मरतितन्माकारंभवेत्तत्रैवत्वेवंसत्यस्मःसंदेहोनास्तिवशाहेनपश्च
न्नकालएवमांस्मरन्मद्भावंयातिनतोजन्ममरणमंर्थ्यतेयोमामाराध
यन्स्मरतिसमद्भावंप्राप्नोतीतिकिमुवक्तव्यमितिसूचितम् ५ ॥

मधुसूदनीटीका

इदानींप्रयाणका लेचकथंज्ञेयोसीतिसप्तमस्यप्रश्नस्योत्तरमाह ॥
मामेवभगवंतंवासुदेवमपियत्तत्सगुणंनिर्गुणंचपरमंब्रह्मतत्रवा
ध्यात्मादिकंस्मरन्सदाचिंतयन्ततत्संस्कारपाटवात्समस्तकरण
२ ग्राममैवयम्प्रवसंतकालेपिस्मरन्कलेवरंमुक्त्वाशरीरेहंममाभिमा
नंमुक्त्वाप्राणवियोगकालेयःप्रयातिसगुणध्यानपक्षेऽग्निर्ज्योति
रहःशुक्लइत्यादिवक्ष्यमाणेनदेवयानमार्गेणपितृयानमार्गात्प्रा
कर्षेणयातिसउपासकोमद्भावंमद्रूपतोनिर्गुणब्रह्मभावंहिर
ण्यगर्भलोकभोगांतेयातिप्राप्नोतिनिर्गुणब्रह्मस्मरणपक्षेतुक
लेवरंमुक्त्वाप्रयातीतिलोकदृष्ट्यभिप्रायंततस्यप्राणाउत्क्राम
त्यत्रैवसमवलीयंतेइतिश्रुतेस्तस्यप्राणोत्क्रमणाभावेनगत्यभावा
त्समद्भावंसाक्षाद्देवयातिब्रह्मैवसन्ब्रह्माप्येतीतिश्रुतेः नास्त्यत्र ने
देहव्यतिरिक्तेआत्मनिमद्भावप्राप्तौवासंशयः आत्मादेहाद्व्यतिरि
क्तोनवादेहव्यतिरेकेपिईश्वराद्भिन्नोनवेतिसंदेहोनविद्यतेछिद्यं
ने तेसर्वसंशयाइतिश्रुतेः अत्रचकलेवरंमुक्त्वाप्रयातीतिदेहाद्भिन्नत्वं
मद्भावंयातीतिचेश्वराद्भिन्नत्वंजीवस्यात्मकमितिद्रष्टव्यं अंतका
लेभगवंतमनुध्यायतोभगवत्प्राप्तिर्नियतेतिवदन्नन्यमपियंक
ने चित्कालेध्यायतोदेहस्यपतनसत्प्राप्तिरवश्यंभाविनीतिदर्शयति ५

मदानंदीटीका ॥

समस्मोत्तरंप्राहप्रश्नस्यभगवान्हरिः मामेववासुदेवंयःसगुणं
वाथनिर्गुणं चिंतयन्ननंतबुद्ध्यातत्संस्कारपाटवात् समस्तक
रणग्राममेवयत्रसमयेसतौ स्मरन्कलेवरंमुक्त्वाहंममेतिधियंत
था मुक्त्वाप्राणवियोगेयः सगुणध्यानवान्यदि तदासदेवया
नेनप्रयातिमदुपासकः मद्भावंनिर्गुणंब्रह्मब्रह्मलोकेविरिंचिना

गी-
टी-अ

२७

मद्भोगावसाने मोक्षमाप्नोति ज्ञानलाभतः निर्गुणध्यानपरस्तत्र या
तीत्यन्यद्दृष्टितः न तस्य प्राणा इत्यत्र श्रुतेर्ब्रह्मविदो मुनेः प्राणस्यो
त्क्रमणाभावेगत्यभावमर्हीति संभावादेव मद्भावं याति ब्रह्मैव स
न्नवंये नास्त्यत्र संशयः कश्चिद्ब्रह्मवद्ब्रह्मविद्यतः अत्रायमाशयो विद्वांसः
प्रयाणसमयेन्तरेण कफवातादिदोषेण मत्तमूर्छितानामपि स्वस्वरू
पं स्वयं साक्षात्स्मारयन्त्यात्मनि स्थितः हरिस्तत्वविदो भक्तस्तथान्यत्र ह
रेर्वचः स्वस्थे चेतसि ये मर्त्याः स्मरंति मम नारद काष्ठपाषाणतुल्यास्ता
नंतकाले स्मराम्यहं स्थिरे चेतसि सुस्वस्थे शरीरे सति यो नरः धातुसा
म्ये स्थिते स्मर्ता विश्वरूपं च मामजं ततस्तं म्रियमाणं तु काष्ठपाषाण
सन्निभं अहं स्मरामि मद्भक्तं नयामि परमां गतिं ५ ॥

नीलकंठीकी ॥

अत्र षट्प्रश्नोत्तरेषु प्रथमे जीवस्य ब्रह्मभाव उक्तः तेज्ञानतो प्रयाणमे
वनास्ति न तस्य प्राणा उत्क्रामंति अत्रैव समवनीयंते ब्रह्मैव सन्ब्रह्माप्ये
तीतिश्रुतेः द्वितीये शुद्धत्वंपदार्थ उक्तः तज्ज्ञानस्यापि वस्तुतंत्रत्वविषय
त्वात्तत्र भावनापेक्षास्तीति न भावनाफलभूतकाले तत्स्मरणापेक्षाते
तृतीयचतुर्थयोस्तु कर्मतत्साधनभूतं च जगदेवोक्तं तत्रापि न भावना
पेक्षास्ति अंतकाले प्रबलेनैव कर्मणा चित्तस्यावरोधात्तत्साधनफल
भूतस्यैव स्मरणावश्यंभावेन तत्र भावनापावैयर्थ्यात् परिशेषात् अं
त्ययोरेव कार्यकारणब्रह्मणोः सोपाधिकनिरुपाधिकयोरन्यतरस्य
भावनासहकृतावंतकाले तत्स्मरणावश्यंभावीति तयोरन्यतरं रूपं प
रमात्मानं स्मरन्यः कलेवरं मुक्त्वार्चिरादिमार्गेण प्रयाति स ब्रह्मलोक
प्राप्तिद्वाराक्रमेण मद्भावं मोक्षं यातीत्याह अंतकाले चेति स्पष्टोर्थः जना
नास्त्यत्र संशय इति सोपाधिकब्रह्मोपास्तिं प्रकरणशतेनैव का हृदयस्य
नाड्यस्तासां मूर्द्धानमभिनिःसृतैका तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उ
त्क्रमणे भवंतीति तदुपासकस्य गतिः पूर्वं कस्मात्स्वतत्वं स्पष्टवर्णनात् यस्तु वि०
शुद्धत्वंपदार्थरूपमध्यात्मवस्तु मामेवेदत्र सोब्रह्मात्मैकात्म्यज्ञानाभावात्
तस्य प्राणा उत्क्रामंतीत्यनंतरांकविषयो न भवति किं तु शतेनैव काचेयत

स्यैव विषयः ननु तस्यानुपासकत्वात्कथमेतदिति चेन्न नहि क
ल्याणकृत्कश्चिद्दुर्गतिं तात गच्छतीति न्यायेन तस्योभयभ्रष्टत्वा
संभवात् कठवल्लीषु निष्कलब्रह्मगामित्वविवेकेन योगिनं प्रक्र
म्यापातनैवेकाचैन्याम्नानाच्च वेदान्तविज्ञानसुनिश्चितार्थाः संन्यास
योगाद्यतयः शुद्धसत्त्वाः ते ब्रह्मलोकेषु परान्तकाले परामृतात्परि
मुच्यन्ति सर्वे इति श्रुते निश्चितार्थानामपि तत्त्वपदार्थानामेव
क्रममुक्तिरवगम्यते न चात्र सुनिश्चितार्था इत्यनेन ब्रह्मात्मैकनि
श्चयवन्तो गृहीतुं शक्याः तेषां गमनाभावस्य प्रोक्तत्वात् नाप्युपासकाः
श्रसंभवात् उपासनादिना सत्त्वनिर्मलबुद्धिः यथा सालग्रामे
विष्णुबुद्धिरेव सत्त्वविरागं तयोर्मिथ्यात्वबुद्धिरिति तन्नेदनः सुनि
श्चितार्था इति वक्तुं शक्यं तस्मादध्यात्मविदो ब्रह्मात्मैकात्म्यगमा
दनुपासकत्वेनाप्यन्यथाभावेऽपि श्रविरादिगतिः शास्त्रसिद्धेति स
र्वमनवद्यं ५ ॥

आनन्दीटीका

प्रयाणकाले च यस्मात्प्राणोत्क्रान्तिसमये मामेव परब्रह्मस्वरूपं नी
रूपं च चतुर्भुजादिकं साकारं वा स्मरन् धारणाभिः स्वयमविषयीकु
र्वन् यो जीवात्मा प्रयाति प्राह्लादिकं देहं यः कोऽप्युत्क्रामति सोऽयं मद्भावं
याति मम परब्रह्मणो भावं मेकं याति नास्त्यत्र संशयः तथा श्री
लक्ष्मीवासुदेवकल्पे भगवान् कुलस्य शरीरस्य क्रमः प्राणवा
रेणातश्चतेषु स्थानेषु नुभवविक्षिप्तिलाभसंपर्वोत्क्रान्तेः सर्वमुत्क्र
मणोत्तात्वाविरमत्र भूयविरामेपि एवं परिणतिमपचयलक्षणां प
रमीमवस्थामासुंमत्वा ज्ञात्वा वोत्क्रमेत् इति महावाक्यार्थः नहि
स्वेपिणं परिणतेस्तात्वाजरयाजर्जरीकृतम् श्रमतः सर्वकार्येषु
स्वलितवाक्यत्वेऽपि यः रमास्वादविनिर्मुक्त इन्द्रियार्थेन विरक्तिन
दातेन प्रकर्तव्या मतिरुत्क्रमणे यति श्रीदेतमकलं भावं समालोक्ये
वमाश्रयेत् सोपानपरंवीनां तत्स्वभ्यस्तात्तत्त्वपद इति स्मृतिम् षडिंशतिप
दोपासीनात्मकास्य पुंसुजेदम् ओंकाररवाद्दनेरत्नप्रेम्णापानं समाहरे
त् नासाग्रेणातिलम्बाकारस्य दयप्रयेमनः एरितेन समजेहास्येनर

गी. ध्रुविनियोजयेत् सोस्यितोस्यकेजाजीवोव्रजन्द्वारिपथंपरम् ताल
टी. द्वारमथासाद्य ब्रह्मद्वारं विभेदयेत् उपोद्धाते हि भिन्नेव स्थिरधीः
पृ. पिंगलाश्रयः मनः शार्ङ्गं समारुह्य बोधशक्तिपरात्मिकाम् तया
विबोधितं कुर्यात्तत्र ब्रह्मगुहाशयम् विमलस्य स्थितेनास्य संली
नेशाश्वते पदे कृत्वा समन्वयं चैव विनिर्गमप्रशान्तरात् शतकोटि
९८ सहस्रांशुशीतविद्रुमभस्तिकम् समवेतं चान्यपरमेयद्विसोः परमं
पदम् तत्र विशेषो निराभासः परिविन्मात्रलक्षणः स्वेस्वमव
मापन्नः तीरेतीरान्तरे यथा सजीवः परमानन्दैकीभावमुपा
गतः तत्र सायुज्यमाप्नोति यत्र नस्यात्पुनर्भवः [illegible]
[illegible]
[illegible] ॥

रामकंठटीका

ननु ब्रह्म किमुच्यते इति प्रश्नेनावदुत्तरं परमन्नदक्षरं ब्रह्म न क्षरति न
संचलयति न स्वरूपाच्च्यवते इत्यक्षरं चिद्रूपमुच्यते तद्धि प्रकार
द्वयं भवति स्वस्वरूपं जीवरूपं च यद्वास्वरूपं नित्यमेतस्य न कदाचि
त्स्वरूपाच्चलनं भवति यतस्तमाप्रक्षं यतः स्वस्वरूपं जन्मादिविनाशा
दिभावविकाररहितं चिन्मात्रलक्षणं सहजनित्यानंदैकरू
पं स्वप्रकाशं विषयाभावमासकत्वात् हि च स्वरूपमपि विषयभावव
र्शनेनैवेन कथंचिदध्यस्तेगतत्वात्तेऽन्योऽस्ति तस्य सत्यादि
तो भेदाभेदरूपेण कूटस्थे सत्यत्वं भवति किंच यांयं स्वरूप
मस्त्वेनावाविर्भवत्तत्र मायावशाद्दारस्वभावमाहात्म्या
वाहंप्रत्ययालंबनं तस्मिद्देहादिव्याहारस्वभाववत्सूत्रादेर्दयेऽजन्म
मरणादिवंधानस्वरूपमप्यविद्यानन्दस्वरूपमस्तितिसंवन्ध्ये
मप्यपरमवत्स्वयंवदन्ती नाविमोप्रकृपैलोके इत्यादि इत्यंत्र
लीपेक्षया जीवनं नित्यत्वेऽपि भिन्नवादेनाद्यध्यानिहान्तमवता
द्वयं रामभवत्तं ब्रह्मेति ग्रथन यन्नस्योतरमथ्यात्मं किं उच्यते इत्य
बोनं स्वभावोध्यात्ममिति स्वभावशाहेन भूमिरापइत्यादिना य

अंतकालेपितत्तत्कर्मत्वयात्तस्यशरीरस्यप्रलयसमयेमांयथोक्त
विशेषणंपरमात्मानंस्मरन्मामेवचिंत्यमत्स्वरूपप्रत्यवमर्शपूर्वकंकले
वरंशरीरंत्यक्त्वात्तेन्द्रेणविमुच्ययःप्रयातिततोदेहादुत्क्रामतिस
मद्भावंमदीयांसत्तांयात्यहमेवसंपद्यतइत्यत्रसंदेहोनास्तितथाशु
क्तिंप्रदर्शयितुमाह ५

लासिकी [illegible] टीका

अथप्रयाणकालेचकथंज्ञेयोसिइतिप्रश्नस्यफलभूतयाविदेहमुक्तेरुपायपूर्वमुत्तरमाह ॥

योंतकालेमरणकालेचकारात्स्वस्थावस्थायामपिमामेवाहन्ता
मत्येयमपियज्ञंपरमात्मानंस्मरन्स्मरणस्यवमृशन् नत्वधिभूताधिकं
कलेवरंदेहंमुत्क्रात्यक्त्वाप्रयाति आद्यप्रवेशवन्मूर्धसीमाविदा
रणपूर्वंनिर्गच्छतीति समद्भावंमद्रूपांसत्तांयातिप्राप्नोत्यहमेवसंप
द्यतेइत्यर्थः तथाचश्रुतिःएषसंप्रसादोस्माच्छरीरात्समुत्थायप
रंज्योतिरुपसंपद्यस्वेनरूपेणाभिसंपद्यतेति स्मरणंचात्रनित्यसन्निहि
तस्यपरमात्मनःप्रत्यवमर्शःनत्वसन्निहितस्यचराचरादेरिवविकल्पमात्रे
णस्वीकारःअत्रांतकालेमत्स्वरूपस्मरणेनमद्भावापत्तौनास्तिसंश
यःफलभूतायाविदेहमुक्तेरुपायामद्भावापत्तेर्मदनुस्मरणमुपा
यः नकेवलेमद्विषयएवायंनियमःकिंतर्हि ५

पंचोलीटीका

अंतकालेचकथंज्ञेयोसिइतिप्रश्नस्योत्तरंतत्कालज्ञानोपायंच
दर्शयन्नाह अंतकालेतिचपुनःयोंतकालेमामेवस्मरन्कलेव
रंमुक्त्वाप्रयातिसमद्भावंवैष्णवंतत्त्वंयातिअत्रसंशयोनास्ति ५

रणवीरसमिद्धोधिनी ॥

अथप्रयाणकालेचकथंज्ञेयोसिनियतात्मभिरित्यस्योत्तरंसफलमाह
अंतकालेचेति चशब्दोनुक्तसमंतेतरंजीवनकालंसमुच्चिनोति तथा
चजीवदवस्थायांमरणासन्नकालेचमामेवसर्वेश्वरंनत्वन्यंकंचित्
स्मरन्सन् कलेवरंसंमुखंविमुक्ताद्दृढंप्रहृतेदेहंमुक्त्वातस्मादुत्क्र
म्यप्रयातिलोकांतरमितिशेषःसमद्भावंमत्सादृश्यंयाति निःसंशयमे

२९

तदित्यर्थः इदमत्र तात्पर्यं आरंभात्प्रभृति मतस्मृतिरविच्छिन्नप्रवाह
त्वेन प्रवर्त्तमाना तत्काले पि सा स्वयमेव सिद्धेति नांतकालप्रतियो
गिकत्वानेमदनुस्मृतिसाधनमिति न तत्त्वाने उपायांतरमन्वेष्य
मिति यद्योर्थश्च वर्णाहोनत्वापितः अन्यथा तत्काले मामेव स्मरति
त्युक्त्वाविवक्षितार्थसिद्धौ कथं तत्तेयोसीति पर्यनुयोगो नोत्तरितः
स्यादिति ५॥

मधुभाष्य

५॥

भाषा अनुवाद टीका ॥

और तुम अन्तकाल मे कैसे जाने जाते हो इस विषय मे अन्त सम
य ज्ञानकी उपाय औ उसका फल देखावते है कि उक्त जो अ
न्तर्यामि स्वरूप जो परमेश्वर मै सोमेरे को स्मरण पूर्वक
देह त्याग करिके जो प्रकाश रूपमे अर्चिरादि कहे सूर्य म
ण्डल मे होय के उत्तरायण राह से गमन करते है वे मेरे
स्वरूप को प्राप्त होते है इसमे संशय नहीहै मेरा स्मरण
ही तत्वज्ञान की उपाय है औ मेरेरूपता की प्रतिहीफल
है ५ ॥

दोहा

मृत्युसमें जो मोहिकों करें स्मरण तजें देह सो मम भावहिं
पावहें या मे नाहि संदेह ५॥

30

यंयंवापिस्मरन्भावं त्यजत्यन्तेकलेवरं तंत मेवैतिकौन्तेय सदातद्भावभावितः ६ ॥

शाङ्कुरभाष्यं टीका

नमद्विषय एवायं नियमः किंतर्हि यं यमिति यंयंवापि यंयंभावं देव ताविशेषंस्मरंश्चिन्तयन् त्यजति परित्यजति अन्तेप्राणवियोगकालेक लेवरं तंतमेवस्मृतं भाव मेवैति नान्यंकौन्तेय सदासर्वदा तद्भावभा वितस्तस्मिन् भावस्तद्भावः सभावितःस्मर्यमाण तयाभ्यस्तोयेन सत द्भावभावितः सन् ६ ॥

आनन्दगिरिकृत टीका ॥

अन्तकाले भगवन्तमनुध्यायतोभगवत् प्राप्तिनियमवदन्यमपि त त्काले देवादिविशेषंध्यायतोदेहं त्यजतस्तत्प्राप्तिरवश्यंभाविनीति द र्शयति नेत्यादिना कथं पुनरन्तकालेपरवशस्य नियतविषयस्मृतिर्भ वित मुत्सहते तत्राह सदेति देवादिविशेषस्तस्मिन्निति सप्तम्यर्थः भा वो भावना वासना स भावोभावितः संपादितोयेन पुंसास तथाविधः

त॰ सन् यंयंभावंस्मरति तमेव देहत्यागादूर्ध्वं गच्छतीति सम्बन्धः ६ ॥

स्वामिकृत टीका ॥

यंयंभावंदेवतांतरंवाअन्यमपिवाअंतकालेस्मरन् देहंत्यजतितंतमे वस्मर्यमाणं भावंप्राप्नोति अंतकालेभावविशेषस्मरणेहेतुः सर्वदात सदातद्भावभावितइति॰

स्यभावोभावनाअनुचिंतनंतेनभावितोवासितचित्तः

पिशाचभाष्यटीका ॥

यंयंवापिस्मरन्भावंपदार्थंतेनभावेनभावितः ६ ॥

रामानुजभाष्यं टीका ॥

सर्वेः स्वविषयसजातीयाकारतापादनमंत्यप्रत्ययस्यस्वभावइतिस्

स्पष्टमाह यंयमिति अंते अंतकाले यंयंवापि भावंस्मरन्कलेवरं।
त्यजति तंभावमेवमरणानंतरमेव एति अंतप्रत्या।
यस्य दृढभावितविषय एव जायते ६ ॥

अभिनवगुप्तकृतटीका ॥

नकेवलंस्वस्थावस्थायांयावदंतकालेपीति मामेवअवछिन्नसक
लोपाधिकम् कथंच स्वस्थावस्थायांविनिहतसकलेंद्रियवेश्मभ
गवांस्मृतिपथमुपेयादित्युपायमप्युपदिशति सर्वावस्थास्वव्याबा
हतिकालमपियस्यभगवत्तत्वेनप्रदयादयपातितस्यभगवन्मेवस।
कलकर्मसंन्यासिनः सततभगवन्मयस्यावशंपस्वयमेवभगवन्न त्व
स्मृतिविषयतांयातीति सदातद्भावभावितत्वेनात्रहेतुः अतएवा
ह येनैववस्तुनासदाभावितांतःकरणभावः तदेवमरणसमये
स्मर्यतेतद्भावएवचप्राप्यते इति सर्वथामत्परमएवमस्येप्सुः स्या।
दित्यत्रतात्पर्यम् ननुयदेवांतेस्मर्यतेतत्त्वमेवावाप्यतेइति एवंहि
सतिज्ञानिनोपियावच्छरीरभाविधातुदोषविकुलितचित्तवृत्तेरंत
तोप्यस्यतामसस्येवगतिःस्यात् नचाभ्युपगमोत्रयुक्तः प्रमाण
भूतश्रुतिविरोधात् अस्तिहि तीर्थेश्वपचगृहेवानष्टस्मृतिरपिप
रित्यजेद्देहम् ज्ञानसमकालमुक्तः कैवल्यंयातिहतशोकइति त
स्मादेवंविधश्रुतिवादो सदायेनभावितमंतःकरणंतदेवांतेप्रया।
णानंतरंप्राप्यते नतुस्मर्यतेनैवेति नात्रनिर्बंधः अन्वाचयश्चायम
पिशब्देनसूचितः स्मरणस्यासर्वथाभावेवाशंकाः स्फुटयति सदा
चमत्परमोजनः सर्वथास्यादितितात्पर्यंमुनिरेवप्रकटयति।
यदाह ७ ॥

परमार्थप्रपा टीका ॥

नकेवलं मां स्मरन्मद्भावं प्राप्नोतीति नियमः किं तर्हीत्याह यं यमि
ति यं यं भावं देवतांतरं वान्यमपि अंतकाले स्मरन्देहं त्यजति
तं तमेव स्मर्यमाणं भावं प्राप्नोति यथा जाग्रति स्मरणरूढं पदा
र्थं निद्रायामनुभवति किंभूतः सदा निरंतरं तद्भावेन स्मरणा
रूढपदार्थेन भावितः वासितचित्तः ६ ॥

वनमालीटीका ॥

अंतकाले भगवंतमनुध्यायतो भगवत्प्राप्तिर्नियतेति विवक्षमन्यमपि
त॰ यं कंचिदंकाले ध्यायतो देहं त्यजतस्तत्प्राप्तिरवश्यं भवतीत्याह
यं यमिति न केवलं मां स्मरन्मद्भावं यातीति नियमः किं तु यं यं भा
वं देवताविशेषं वाकारादन्यदपि यत्किंचिद्वा स्मरन्नंते प्राण
वियोगकाले कलेवरं त्यजति स तं तमेव स्मर्यमाणं भावमेवेति
नान्यं प्राप्नोति अंतकाले स्मरणोद्यमासंभवेपि पूर्वाभ्यासजनि
तवासनैव स्मृतिहेतुरित्याह सदा सर्वदा तस्मिन्देवतावि
शेषादौ भावो भावना वासना तद्भावः सभावितः संपादितो
येन स तथा आहिताग्न्यादेराकृतिगणत्वाद्भावितपदस्य प
रनिपातः ६ ॥

उत्तमवैजयन्तीटीका

ननु यथा त्वत्स्मरणकर्ता त्वद्भावं याति तथान्यस्मर्ताप्यन्यभावं याति
न वेत्याशंकायामंते यं यं भावं स्मरति तं तमेव स्मर्ता यातीत्याह यं यं वा
पीति हे कौंतेय कुंतीपुत्र सदा सर्वस्मिन्काले तद्भावभावित
स्तस्य सर्वं चिंतनविषयीकृत्वा न कलेवरं शरीरं त्यजति जहाति
हे कौंतेय कुंतीपुत्र सदा सर्वस्मिन्काले तद्भावभावितस्तस्य सर्वं चिं
तनविषयस्य पदार्थस्य यो भावः सानुरागचिंतनविशेषस्तेन भावि
तश्चिंतितः सन् तं तमेव भावं पदार्थं यति गच्छति यथा भरतो मर

गी॰
टी॰ अ॰

णकाले स्वर्गं चिंतयन् मनुष्यदेहत्यागोत्तरकाले स्वर्गशरीरमेव प्रा
प्तवान् तथाद्याप्यंति मस्तेनः सर्वस्तति विषयनयायं यमेव पदार्थं
स्मरति स्मर्ता तं तमेवाप्नोतीत्यर्थः ६

32

अंतकाले भगवं **मधुसूदनी टीका** तं अनुध्यायतो भगवत्प्राप्तिर्नियतेति वदितुमन्यम्

पियंकं चिंतन्काले ध्यायतो देहं त्यजन् तत्त्वामि रवरूपं भाविनीतिदर्शयति ॥+

न केवलं मां स्मरन् मद्भावं यातीति नियमः किं तर्हि यं यं भावं देवतादि
विशेषं वकारादन्यदपि यत् किं विह्वा स्मरन् चिंतयन् त्यजेत् प्राणवियो
कले गकाले वं त्यजन्ति स तं तमेव स्मर्यमाणं भावमेव नान्यमेति प्राप्नोति
हे कौन्तेयेति पितृष्वसृपुत्रत्वेन स्नेहातिशयं सूचयति तेन नावश्यं मम
नु यानुत्वं तेन च प्रतारणाशंकान्यत्वमिति अंतकाले स्मरणा
ता घमासे भवेपि पूर्वाभ्यासजनितवासनैव स्मृतिहेतुरित्याह सदाम
वेदान्तस्मिन्देवताविशेषादौ भावो भावना वासना तद्भावः [illegible]
[illegible] सं भावितः संपादितो येन स तथा भावितः तद्भाव इत्यर्थः
आहिताग्न्यादेराकृतिगणत्वाद्भावितपदस्य परनिपातः तद्भावेन तच्चिन्त
नेन भावितो वासितो वा चित्त इति वा [illegible]
[illegible] ६ ॥

सदानंदी टीका

न मद्भाव एवायं नियमः किंतु सर्वतः यं यं देवविशेषं वापि यत् किं
चिद्वस्तुमात्रं चिंतयंत्यन्तकाले सोऽन्यजतीदं कलेवरं तं तं स्म
र्यमाणं सुभावमेवेति नाप्नोति पितृष्वसात्मजत्वेनानुग्राह्यो सीति
सूचयन् कौन्तेयेति पदेनात्र स्नेहातिशयं सूचनात् पूर्वाभ्यासाजि
शेष तां वासनां स्मृतिकारणं सर्वदा येन यो भ्यस्तो भावो देवादिगोचरः
स्मर्यमाणतया सौ तेन तं तमेवेति नाप्नोति ६ ॥

नीलकंठी टीका ॥

नीलकंठीटीका

नकेवलंकार्यकारणब्रह्मणोरेवभावनोत्थप्रत्ययवशात्तद्भावप्रा।
प्तिरेतरपितुकीटस्यजीवतएवभावनाबलात्भ्रमरभावप्राप्ति
र्दृश्यते नंदिकेश्वरस्यचसामर्थ्यंते सहिमहादेवेभावयंस्तत्सारूप्यंदेहा
न्तरंविनैवप्राप्तइतियोगशास्त्रेपिप्रसिद्धं तत्रकिमुवक्तव्यंप्रयत्नप्रत्य
यवशाद्देहान्तरेभाव्यभावप्राप्तिरस्तीतिमत्वातमेवार्थमस्यशापिद
र्शयति यंयमिति तद्भावभावितः भाव्याकारवासनयारंजितस्मर्थः ६

आनंदीटीका

करणवैकल्पस्यावश्यंभावित्वात्कथंपरमेश्वरलक्षणप्रपत्तिरित्याशंकामपनुदति ॥
यःकश्चिद्योगीयोगीवायंयंवापिभावंयंकंचनपदार्थंस्मरन्नन्ते
प्रयाणसमासन्नेशरीरपरिणामेप्राणवियोगकालेस्वकलेवरंत्य
जतिहेकौंतेयसदासर्वस्मिन्नवांतरेशरीरस्थितिभोगसमये
पदार्थेन तद्भावभावितः तेनतेनभावेनभावितोवासितहृदयस्तंतमेवभा
वमेतिजन्मान्तरेतमेवप्राप्नोति तत्कालेस्मरणमस्तुवानवेतिनि
यमोनेमर्थः तथाचैतद्विषयएवमश्रीनरेपुराणे तथाचभरतादा
नमिदमभिनवगुप्तपादैः तीर्थेश्वपचगृहेवानष्टस्मृतिरपिमज
न्देहम् ज्ञानसमकालमुक्तःकैवल्यंयातिहतशोकः इति
॥

रामकंठीटीका

यंयंसात्विकंराजसंतामसंवाभावंपदार्थंस्मरन्सात्विकाराज।
स्यातामस्यावावृत्त्याध्यायन्पुरुषोंतेवर्तमानेदेहंजहातितंतमेवदे
हान्तरंप्रतिपद्यते अत्रहेतुगर्भविशेषणमाह सदातद्भावभावि।
तः सदानित्यकालंतस्मिंस्तादृशिसात्विकादौभावेभावितःसंजा
तभावनोयतः किमुक्तंभवति वर्तमानेदेहेयदेवसात्विकादिकं
वस्तुपुरुषोभ्यासेनभावयति तत्तद्भावनाभ्यासप्रकर्षोद्दितसंस्का
रस्तमेवान्तेवश्यंस्मरति यमेववस्मरंस्तस्माद्देहादुत्क्रामति तमेवतत्
त्समनन्तरंदेहान्तरेलभते यदुक्तं यदासत्वेविवृद्धेतुप्रलयंया
तिदेहभृत् तदोत्तमविदांलोकानमलान्प्रतिपद्यते रजसिप्रल
यंगत्वाकर्मसंगिषुजायते तथाप्रलीनस्तमसिमूढयोनिषुजायते

इति यतएवं ६

लासिकी [illegible]लीटीका

नकेवलंमद्विषयएवायंनियमः किंतर्हि ॥ साया

अंतेक्षणेउच्चादिप्रमात्रन्तरागोचरेसायांसहिक्कागद्गदं
कादि[illegible]चेष्टावरमभाविनिशरीरद्वार्थंवंयथस्तन्नूभावाद्गेहस्कु
तस्वखेङःखमोहवंध्येकलोशयेगुरूबायंयंभावंसात्विकरा
जसंतामसमपिवावस्तुस्मरन्वापिशब्दोमध्यातिरिक्तवस्तुस्म
रणद्योतके अथवाशब्दार्थेदेहंत्यजतितंतमेवभावंसात्विका
दिकमेतिप्राप्नोति अंतेक्षणेतद्भावस्मरणेहेतुगर्भविशेषण
माह सदातद्भावभावितः यतोसौसर्वदातस्यवस्तुनोभावेन
भावनयानुचिंतनेनभावितोवासितचित्तः एतेनतद्भावानुचिंत
नमेववासनारूपेणांतेक्षणेतद्भावस्मरणेवीजभूतंदेहत्यागा
नन्तरंतद्भावापत्तेर्हेतुः यद्वत्याति सदासत्वभहेद्धत्वेति भावि
तशब्देनेतदुच्यते तद्भावानुचिन्तनेनतद्वासनायाः स्मरणबी
जभूतायाः सत्वात्स्मरणस्यस्फुटत्वमस्त्वस्फुटत्वंवाकारणां
तर्वार्तित्वात्कार्यस्येति [illegible]
[illegible] ६

पंचोलीटीका

नकेवलंमामेवस्मरन्मद्भावंप्राप्नोतिइतिनियमः किंतर्हि
अन्यास्वपिदेवतासुअयंनियमः समानइत्याह यंयमिति हे
कौंतेय अपिवा अंतेमरणकाले यंयंभावंदेवताविशेषंस्मरन्
कलेवरंदेहंत्यजति सदातद्भावभावितः तस्मिन्भावस्तद्भावः
सभावितोयेनासौतद्भावभावितस्तद्वासनयावासितः सन्तं
तंभावंदेवताविशेषमेतीत्यर्थः ६

अथजीवदवस्थायां निरंतरं स्मृतो भावोंतकालेपिस्मृतिमारोहति देहत्यागकाले निरंतरस्मृतभावताद्रूप्यापत्तिश्च नियमेनेति सहेतुकं दर्शयति यंयमिति यंयं भावं यत्पदार्थं स्मरन्स्मरन्नंते प्रायुरवसानासन्नतरे काले कलेवरं देहं त्यजति तंतमेव भावं हे कौंतेय पतिप्रामोति तत्स्वरूपो भवतीत्यर्थः ननु कथमंतकाले तदनुस्मृतिः स्यादित्याह सदेति सदा सर्वदा आरंभात्प्रभृति सर्वास्ववस्थासु पयपंप्रसाव नित्यंच प्रतिपादितस्वरूपासु तद्भावभावितः भावितो भावनाविषयीकृतः स एव भावो येन वाहिताग्न्यादिषु परमिति भावितशब्दस्य परनिपातः यमेव जीवदवस्थायां निरंतरं स्मरति तमेवांतेप्यनुध्यायति स्मरणस्य सदातनत्वेनाविच्छिन्नत्वात् यद्यानुस्मरति तदेव भवतीति व्याप्तिसिद्धोयमर्थः अतः पूर्ववासनैवांतस्मृतिनिमित्तं न पुनस्तदा विवशस्य स्मरणोद्यमो वपयापेक्ष्यः संभवतीति भावः ६

मधुभाष्य

34

भाषा अनुसार टीका ॥

अन्तकाल मे मेरा स्मरण कर मेरी प्राप्ति होय केवल यही नहीं। सोई कहते है कि हे कुन्तीपुत्र अर्जुन अन्तकाल मे जो कोई। जिस देवता का या और किसी विषय का ध्यान कर देह छोड़ै है सोउसी को प्राप्त होता जिसका ध्यान किया है देतो सदा जिसका चिन्तन करते रहो तो अन्तकालमे भी अन्तःकरण मे उसीकासंस्कार रहता और नयी अपूर्व वस्तुका संमरण कठिन है ६॥ ॥

दोहा

जिहजिह भावसिमरनजोतजैंहिं अंतमे देह तिह तिह भावमें
प्राप्ति है कौंतेय नित यह ६॥

35

तस्मात् सर्वेषु कालेषु मामनुस्मर युध्य च मय्य
र्पितमनोबुद्धिर्मामेवैष्यस्यसंशयः ७ ॥

शाङ्करभाष्य टीका

यस्मादेवमन्त्या भावना देहान्तरप्राप्तौ कारणं तस्मादिति तस्मात्
सर्वेषु कालेषु मामनुस्मर यथाशास्त्रं युध्य च युद्धं च स्वधा
र्मं कुरु मयि वासुदेवेऽर्पिते मनोबुद्धी यस्य तव स त्वं मय्यर्पितम
नोबुद्धिः सन् मामेव यथास्मृतमेष्यसि आगमिष्यसि असंशयो न
संशयोऽत्र विद्यते ७ ॥

आनन्दगिरिकृत टीका

सतते भावना प्रतिनियतफलप्राप्तिनिमित्तानन्त्यप्रत्ययदेहादिरित्यु
क्तम्यानन्तरश्लोकमवतारयति यस्मादिति विशेषणत्रयवतो भगव
दनुस्मरणस्य भगवत्प्राप्तिहेतुत्वं भाति तस्मादित्युच्यते सर्वेषु का
लेष्वादरनैरन्तर्याभ्यां सहेति यावत् भगवदनुस्मरणे विशेषणत्रय
साहित्यं यथाशास्त्रमिति द्योत्यते भगवदनुसंधाने कर्तव्यमुक्ता ते
न सह स्वधर्ममपि कुरु युद्धमित्युपदिशता भगवता समुच्चयोक्ता
नधर्मेण रङ्गीकृतो भातीत्याशंक्याह मनोबुद्धिगोचरं क्रियाकार मयीति
कफलजातं सकलमपि ब्रह्मैवेति भावयन् युद्ध्यस्वेति ब्रुवता क्रि
यादिकलापस्य ब्रह्मातिरिक्तस्याभावाभिलापात्त्वात्र समुच्चयो वि
वक्षितेत्यर्थः उक्तरीत्या स्वधर्ममनुवर्तमानस्य प्रयोजनमाह मामेवे मा
ति उक्तसाधनवशात् फलप्राप्तौ प्रतिबन्धाभावं सूचयति असंश
य इति ७

स्वामिकृत टीका ॥

यस्मात्पूर्ववासनैवान्तकाले स्मृतिहेतुः तत् तदेव विवशः स्मरणोद्यमः संभवति ॥
तस्मात् सर्वदा मामनुस्मर चिन्तय सततस्मरणं च चित्तशुद्धिं विना न
भवति अतो युध्यस्व चित्तशुद्ध्यर्थं युद्धादिकं स्वधर्मं चानुतिष्ठेत्यर्थः
एवं मय्यर्पितमनःसंकल्पात्मकं बुद्धिश्चाध्यवसायात्मिका येन त्वया स त्वं
मामेव प्राप्स्यसि असंशयः संशयोऽत्र नास्ति

गी॰
टी॰ग्र॰

[illegible] ७ ॥

पिशाचभाष्ये टीका ॥

तस्मात्सर्वेषुकालेष्वित्यर्थः ७ ॥

रामानुजभाष्ये टीका

तस्मादिति यस्मात्पूर्वकालाभ्यस्तविषयेवासनाप्रत्ययो जायते तस्मा
त्सर्वेषुकालेषुआप्रयाणादहरहर्मामनुस्मर अहरहरनुस्मृतिकरं
शुद्धादिकं वर्णाश्रमानुबंधिश्रुतिस्मृतिचोदितं नित्यनैमित्तिकंच
कर्मकुरु एतदुपायेनमय्यर्पितमनोबुद्धिरंतकालेच मामेवस्म
रन्यथाभिलषितप्रकारंप्राप्स्यसिनात्रसंशयः ७ ॥

अभिनवगुप्तकृत टीका ॥

यदाह तस्मात्सर्वेषुकालेषुमामनुस्मरेति तेनेत्थमत्रपदसंगतिः सदा।
यंयंभावंस्मरन्कलेवरंत्यजति अंतेपिवास्मरन्नामग्रहणादस्मरन्वा
तेनतमेवैतियतोसौसदातद्भावेनभावितः अनेनकलेवरंत्यजति
सति अंतेकलेवरत्यागलक्षणेवधुबंधादिभ्रमात्नरागोचरेष्वासा
यासदिक्कागंगादिकादिदेशावरमभाविनिलक्षणेशरीरदाढ्र्यंवेयथ
तनुभावाद्देहकृत सावद्धःस्वमोहवंथेकालांशेदेहत्यजनशङ्का
वाक्येयदेवस्मरतितदेवप्राप्यमसंविदन्नगृहीतमस्यहृदयंसप्रयोत
ताहृशिचकालेस्मरणस्यकारणंसदातद्भावभावितत्वमितितात्प
र्यमितिसमग्रीयोज्येतिप्राकृतपदार्थः नन्वेवमंतकालेकिंप्र
योजनंतत्स्मरणेन कथमाहप्रयोजनमितिकिंतत्स्मर्तव्यं
तमेवतद्भवतितस्मिन्नंतेतत्क्षणेनतनुपुत्रकलत्रादिवेषुभूतेः शिशिरोद
कपानादेर्वास्मिन्क्षणेदृष्टस्मरणादितितद्भावापत्तिःस्यात् ॥ ः ॥

मेवं न हि सोऽन्त्यः स्मरणः स्फुटदेहावस्थानात् न ह्यसावेवं स्मरणे स्मृतिविव
क्षितो भवति दृशैर्लक्ष्यते तच्चैवंस्मरणेऽयैनैव रूपेण भवति तथा तत्संस्कार
स्य दृढत्वनिर्वाहो पि देशकालव्यवहितानामप्यानन्तर्यमिति न्यायेन प्रबोधे
न भाव्ये तद्दशान्तस्मरणे न तस्य स्यात् तद्भावप्राप्तिः कस्यचित् देहस्याव
स्थायामपि तदेव काकतालीयवशाद्भासते यथा भरतादेः पुराणे वर्णि
तेन तत्कृते च मृगत्वे अत एव प्रयाणकालेपि च मामित्यादावपि चेति यद्ध
णं ये हि सदा भगवन्तं भावयन्ति एवं भूता भविष्याम इति तेषां तद्धीः संस्का
रोऽन्यसंस्कारप्रतिवेधीति न्यायेन तस्यामलस्यायामन्तदशायां संस्कारो
न रागपहस्तितेन संस्कारकृतेन नामवस्मरणेऽदेहसद्भावत्वाणकृतेन च तस्य स्म
रणेनैतत्रैटहविनिपातत्वाणएवकालसंस्कारानिहतेस्तादिदमित्यादि
वेद्यविभागानवभासात्मविज्ञानसमनन्तरपरमेश्वरस्वभावेनैव भवती
ति श्रीमदभिनवगुप्तगुरूणां संमतं इत्यलं बहुना ग्रन्थेन शयमिति नात्र सं
देग्धव्यमिति ७ ॥

परमार्थप्रपाटीका

ननु तदविवशस्य कथं स्मरणं घमः संभवतीत्याह तस्मादिति यस्मादेवं
तस्मात्कारणात्सर्वेषु कालेषु सुखदुःखभोगसमयेषु मामनुस्मर अनेन च स्म म
रणानुरूपं कर्म कुरु तेन निरन्तरानुध्यानसंस्कारेण तत्कालेऽपि स्वत एव स्म
रणं भविष्यति न हि चित्तवशाद्विमन्तरेण स्मरणं भवति अतो युध्यस्व च स्वधा
मरूपं स्वधर्माचरणं कुरु एवमेवमसाने मय्यर्पितमनोबुद्धिस्त्वमसंशयः
निश्चितं मामेवैष्यसि देहान्तकाले मदाकार एव संकल्पः निश्चयोऽपि म
य्येव एवं कृते सति भक्तपदव्याप्तिं ते मामेवैष्यसि अत्र मामेवेत्येवका
रेणान्ययोगव्यवच्छेदः कृतः तस्मादहमेवानयामि त्वं न स्वस्मरणेन प्रव
र्त्तितेन देहावसाने दुःखविस्मापयिष्याभिमुखे माकर्षयामि इत्यर्थः तदु
क्तं स्पर्शाश्मप्रमाध्यमस्यमसारं नयति कनकतां वा तिके [illegible] प्रमासते [illegible]
रूपं कान्तो द्रवति न तदपरं मद्दृश्याभिमुख्यात् इत्यन्यः संनिधानात् द्वि
चमतिगाहतोन्यास्ति वस्तुप्रभावो जीवानाम् किं त्वेवं भवति भगवतः किं

+ तद्रूपवस्तुबोधकस्यदेहात्ययेसंशयापन्नवर्णेजपत्यविकलेंद्रियेणगर्भात्मकः अथाधियज्ञ
स्वरूपप्राप्तिस्तदेतनमस्त्रद्वयंबड्ध्कृतिसंमतंपुनर्व्याख्यास्यतेतत्राद्योरांगिरसाप्रतिपादित
मधियज्ञमंतकालप्राप्तिंसोपदिशन्नाह + १

गी० पुनर्भवितेनेतद्वितिसंप्रश्नश्लोकश्च छांदोग्योपनिषत्स्तुतंकिलयजुर्मंत्रत्रयंअटगृह्वयंतद्धो
टी० अ० रांगिरसर्षिणाभवाव **वनमालीटीका** ॥ तेकस्मायसंस्मारितंश्रीकृष्णोपधिनाय +

यतः सर्वदाचिंतनाभ्यासादेवसंस्कारदार्ढ्यादिंद्रियवैकल्यकालेस्मृतिर्भ
वत्यतः सर्वदाभगवच्चिंतनमनवरतंकार्यमित्याह तस्मादिति नियतोमदूप
गोचरस्तानिरोधारब्धकर्माभावेनित्यस्मृतिर्जन्यातस्यस्मरणमनुभामिनिय
मेनभवति तस्मात्सर्वेषुकालेषुमामनेनगुणलयंजडेंगुद्धयादिक ज०
तोरेसच्चिदानंदघनविग्रहं अनुनिरंतरंसंस्मरेसमर यद्दिनिरंतरमवि
च्छिन्नेतैलधारावन्मन्तुस्मरणंकर्तुमशक्तस्तर्हिमदाराधनरूपस्वावि
हितैः कामंकर्मकुर्वित्याह युध्यच ज्ञातजिज्ञासस्याश्चिरचिन्तस्यतिः
कामकर्मानुष्ठानेनतः श्रवणमननिदिध्यासनरूपं संदाम। न०
चिंतनंतेनोमदाराधनंप्रसादमतेतेनमत्प्राप्तिरूपमोक्षत्इत्याह
मयीति मय्यर्पितसर्वेश्वरेर्पितेसंकल्पाध्यवसायरूपेमनोबुद्धीयेनसः मा
मेवसर्वेश्वरमेष्यसि यद्यपिस्वरूपानंदाविर्भावएवमुक्तिस्तेनेश्वरप्राप्ति
स्तथापितादृक्स्वरूपाविर्भावः सर्वेश्वरप्रसन्नपराधीनतंप्राप्येवभवति
नान्यथापरंज्योतिरुपसंपद्यस्वेनरूपेणाभिनिष्पद्यतइतिश्रुतेरित्यभिप्रायः ७

कुसुमवैजयन्तीटीका

ननुचेन्तकालेत्रिदोषादिजनितातिशयदुःखेनाविकलेंद्रियव्याकुलत्वात्स्मर
णशः स्मृतीकथमंतस्मरतीत्याशंक्यपूर्वकालाभ्यस्तस्मरणमेवान्त
स्मरणस्यकारणमित्यादिन्याहतस्मादिति यस्मात्पूर्वकालाभ्यासविषय
केयएवयंतरोस्थितिमस्मृतिर्जायते तस्मात्सर्वेषुकालेषुश्वासनाशनशयन
गमनादिषुप्रतिक्षणंमां सर्वेश्वरंभगवन्तमनुस्मर कृष्णएवममात्मा
कृष्णाधीनोहंकृष्णेनैवकारितः कर्मकरोमीत्यवैरीत्यातंमांस्मरणेकृ क०
रुयुद्धंच युध्यउपलक्षितंस्वाचितंनित्यनैमित्तिकादिककर्मकुरुएव
इत्थंप्रकारेणमयार्पितमनोबुद्धिःसन्मयिसर्वेश्वरेभगवतिअर्पितेना
र्पितेमनोबुद्धीयेनतथाभूतः यदित्वमीदृशोभविष्यसितर्हिमामेवैष्य
सितत्वंप्रदेवादिकमित्यत्रासंशयस्तवसंदेहोमास्तु ७ ॥

+ अधियज्ञोऽहमेवेति नो देहभृतां वर अत्र देहे अहमेवाधियज्ञः यज्ञं शारीरयागमधिकृत्य प्रव
र्तते सोऽधियज्ञः अंतर्यामी भगवतः प्रकृष्टस्पांतयामि+

+त्वेन वर्तमानस्तस्य वर्तकः न तत्फलसंपादकोऽप्यहमेवेत्यर्थः उक्तं च टिप्पणि
कायां सूत्रध्यात्मादि त्रयाभिधेयो व्यवहारं करोतीति ये शारीरः स च यस्तो स्यते
तिन यज्ञपुरुषविद्वः संस्कृतान्नस्यान्नाशनादेव चित्तं मुक्षोऽश्नुते नाप्यवाङ्कना
यः श्रोत्राज्जातदेवजातवेदसि पिपासितो भः पिबति सोमपानमथास्यततत्
यज्ञस्योपसदश्चेष्टाम् तिस्रावभृथोऽस्यैवेति श्रुतिरपि छांदोग्योपनिष
त्सु स यदशिशिषति यत्पिपासति यन्न रमते ता अस्य दीक्षाः अथ यद
श्नाति यत्पिबति यद्रमते तदुपसदैरेत्यथ यद्धसति यज्जक्षति यन्मैथुनं च
रति स्तुतशस्त्रैरेवैत्यथ यत्तपो दानमार्जवमहिंसा सत्यवचनमिति ता अस्य
दक्षिणास्तस्मादाहुः सोष्यत्यसोष्टेति पुनरुत्पादनमेवास्य तन्मरणमे
वावभृथस्तद्धैतद्घोर आंगिरसः कृष्णाय देवकीपुत्रायोक्त्वोवाचापिपास एव १४
वभूव सोंऽतवेलायामेतत्त्रयं प्रतिपद्येताक्षितमस्यच्युतमसि प्राणसंशि
तमसीति तत्रैते द्वे ऋचौ भवतः आदित्प्रत्नस्य रेतस उद्वयं तमसस्परि ज्योतिः
पश्यंत उत्तममिति भाष्यं शारीरयज्ञसंपादी पुरुषआत्मानं यज्ञत्वेन मन्य
ते सोत्र तत्र हेतोच्यते स यदशिशिषति [illegible] ताः सन्नशितं भोक्तुमि
च्छति तथा पिपासति पातुमिच्छति [illegible]
[illegible] तः सन्यात
मिच्छति अथ यन्न रमते इष्टमिष्ट्याराजनितं द्रवमनुभवति ता अ
स्य यज्ञपुरुषस्य दीक्षाः यतो दीक्षायामनशनादिना क्लेशानुभव एव
यत्तस्य दीक्षोपसदस्तुतशस्त्रदक्षिणादिभिः संपाद्यते तत्र दीक्षा च
विशेषः अथोपसदः आह अथेति स यज्ञपुरुषो यदश्नाति यत्पिबति तथा
यज्जलं पिबति तथा रमते अन्नपानादिना सुखमनुभवति तैरुपसदैरे
ति वर्तते यत उपसदस्य यज्ञस्य जनितसुखानुभवरूपाः अथ स्तुतशस्त्रा
न्याह यद्धसतीति यत्पुरुषो यद्धसति विनोदकथाभिरीषद्धास्यमुखो
हसति पक्रमं करुते तथा जक्षतिति यथा मैथुनं चरतु काले भार्यामनुगच्छति
तानि स्तुतशस्त्राणि द्वादशस्तोत्राणि द्वादशशस्त्राणीत्येकत्रः स्तु
तनामस्तो त्र अज्ञातस्तावकवाक्यं तदर्भः तथाहोतृपमाना न स्त्रवंस

समंततोज्योतिः पश्यंतीत्यर्थः तत्किंज्योतिर्दिविमू
र्ध्नि स्वर्गे वा यत्तु ईक्ष्यते दीप्यते येन ज्योतिषाश्रयः सू
विनातपति चंद्रमा भाति विद्युद्विद्योतते तारागणे
भाति तदित्यर्थः उद्वयमिति उद्वर्यं ज्योतिः स्वप्रका
शं तेजो वयं पश्यंतः संतः अगन्म प्राप्नवंतः किंभू
तः तेजः तमसस्परि तमसो अज्ञानात्परि परितः
उत्कृष्टं देवं द्योतमानं देवत्रा देवेषु मध्ये आसूर्यं सू
र्यं मर्यादीकृत्य द्योतमानं उत्तमं निरतिशयं तदु
क्तं नारायणोपनिषत्सु तस्यैवं विदुषो यज्ञस्यात्मा
यजमानः श्रद्धा पत्नी शरीरमिध्ममुरो वेदिर्लोमा

गी॰
टी॰
३॰

39

निबर्हिर्वेदः शिखाहृदयंयूपःकामआज्यंमन्युः॰
पशुस्तपोग्निर्दमःशमयितादक्षिणवाग्घोताप्राण
उद्गाताचक्षुरध्वर्युर्मनोब्रह्माश्रोत्रमग्नीध्रोयावद्ध्रि॰
यतेसादीक्षायदश्नाति तद्धविर्यत्पिबति तदस्य
सोमपानंयद्रमतेतदुप
सदइत्यलमिति
विस्तरेण
॥ ७ ॥
एतत् परमार्थप्रपा
त्रुटिते ॥

मधुसूदनीटीका

यस्मादेवं तस्मात्सर्वेषु स्मरणं अभ्यासजनितात्मभावनेनैव तदानीं परवशस्य देहान्तप्राप्तौ कारणं ॥

तस्मान्मद्विषयकात्मभावनोत्पत्त्यर्थं सर्वेषु कालेषु पूर्वमेवादरेण मामनु
स्मर सगुणमीश्वरमनुस्मर चिन्तय यद्यन्तःकरणाशुद्धिवशान्न शक्नोषि सततम
नुस्मर्तुं ततोऽन्तःकरणशुद्धये [illegible] अन्तःकरणशुद्ध्यर्थं युद्धादिकं स्व
धर्मं कुरु युध्यस्वेति युद्धस्य स्वधर्मोपलक्षणार्थः एवं च नित्यनैमित्तिककर्मानुष्ठानेनाशु
द्धिक्षयात् मय्यपि भगवति वासुदेवेऽर्पिते संकल्पाध्यवसायलक्षणे मनो
बुद्धी येन त्वया स त्वमीदृशः सर्वदा मच्चिन्तनपरः सन् मामेवैष्यसि प्राप्स्य
सि असंशयो नात्र संशयो विद्यते इदं च सगुणब्रह्मचिन्तनमुपासकाना
मुक्तं तेषामेवान्तभावनासापेक्षत्वात् निर्गुणब्रह्मज्ञानिनां तु ज्ञानसमकाल
मेवाज्ञाननिवृत्तिलक्षणाया मुक्तेः सिद्धत्वान्नास्त्यन्तभावनापेक्षेति द्र
ष्टव्यं [illegible] ७ ॥

सदानंदीटीका

यतोऽन्त्यभावना हेतुः प्राप्तौ देहान्तरस्य च तस्मान्मद्विषयकात्मभावनो
त्पत्तिसिद्धये पूर्वमेवादरेण त्वं सर्वकालेषु मां हरिं सगुणं सर्वसौन्दर्यसा
र सर्वस्वमीश्वरं स्मितांकितमुखं मेचकश्यामं पीतांबरं बिभ्रं श्रीवत्सांकि
तवक्षस्यकौस्तुभादिदिव्यभूषोज्ज्वलं गरुडध्वजमाधारं सर्वस्य जगतः प
तिं आनंदसांद्रं श्रीकान्तं करुणार्द्रं निरन्तरं शंखचक्रगदापद्मवनमा
लाविभूषितं चिंतय अविरतं प्रमादरहितेनैव मनसा यद्यन्तःकरण
शुद्धिवशात्त्वं नैव संततं शक्नोषि मामनुस्मर्तुं ततः स्वान्तविशुद्धये
युद्धादिकं स्वधर्मं त्वं कुरु निष्काममेव तेन सा तेनाशुद्धिक्षयाद्देववासु
देवे मय्यीश्वरे येनार्पिते मनोबुद्धी संकल्पाध्यवसायकौ स त्वमेतादृ
शो नित्यं मच्चिन्तनपरायणः मामेव वासुदेवं श्रीपरमानंदविग्रहं प्रा
प्स्यसि अत्र न संदेहो विद्यते मनागपि सगुणध्यानिनामुक्तमेतत्प्रत्य
भावापेक्षणं ज्ञानिनां भ्रान्तिदाहेन मुक्तिः स्यात्तत्क्षणे यतः सद

गी
टी॰ अ॰ ८

द्वैतेन्द्रतेद्वैत [illegible] यदन्यो न्यैकवीक्षणं तस्मात्कालस्त्वद्वैतबुद्धेरेवनचेत
वि॰ ८ रः तीर्थेगाद्युपविष्टोवारुग्णोवालुटन्नपि मांस्मृतोवात्यजन्नेवप्राणान्प्रा
तिनेसर्वथा इत्युक्तैरपिद्वष्टव्यानितानिविवेचनं यस्मिन्निष्टविविध
विषमजेविभूमिस्वाभाविकान्तेनसेववरिवर्तिनिन्न सार्वत्यमल्पे
[illegible]गुणामेवमहोदयोभ्रीमेस्वांच्छिपमनुगालेतमदेश्रपये ७ ॥

नीलकंठी टीका ॥

यस्मादेवं तस्मात्सर्वेषुकालेषुमामनुस्मरअंतकालेमत्स्मरणमज्ञावश
म्यर्थं युध्यचेतिवकारात्कर्मोपास्मोःसमुच्चयोवगम्यते तानकर्मसमु
च्चयकर्तेरीवनतद्भयानुष्ठानेरपिकस्मिंश्चेवापिकारिणिकर्तव्याकर्तव्य
प्रसंयक्तनविरोधाभावात् मय्यर्पितेमदेकनिष्ठेतोनीतेमनोबुद्धीये
नसमय्यर्पितमनोबुद्धिस्त्वंमसंशयंमामेवैष्यसिप्राप्स्यसि अंतकालेस्म
रणेनेतिशेषः ७॥

श्रीधरी टीका

पूर्वोक्तमेवप्रत्युतःस्फुटयति ॥

यस्मात्सदायायद्भावभावितस्तत्तमेवैतीतितस्मात् सर्वेषुकालेषुवै
मर्षिकेषुव्यावहारिकेषुमोपरमात्मानमनुस्मरानुसन्ध्येहिचपुनःयु
ढ्वचक्रुयुद्धकरणेनवैनेकाविद्वानितिमाह मय्यर्पितमनोबुद्धिरिति
हेतुदर्शनमेतत् मनस्संकल्पविकल्पौबुद्धिरध्यवसायः

रामकंठी टीका

यतएवं तस्मादुक्तात्कारणाद्रामोपदेशप्राप्तिलेणात्पृभृतिसर्वेषुकालेषुका
लशब्देउपलक्षणार्थत्वेनसर्वदेशेषुसर्वेषुकारेषुसर्वावस्थासुयथोक्त
स्वरूपंमोपरमात्मानंपरमेश्वरमनुस्मरसंचिन्तयमन्नस्वरूपध्यानानु
परतनिविष्टवयानोभवयुध्यस्व स्वकर्मानुतिष्ठच येनमय्यर्पितमनो
पकारेणानित्यविनिवेशितान्तःकरणोनिःसंशयंमामेवैष्यसिमदभे
देप्राप्स्यसि अहमेवभविष्यसीत्यर्थः

७

लासिकी [illegible] टीका

कथंचास्यावस्थायामंतकाले विनिवृत्तसक लेंद्रियचेष्टस्य भगवानात्मास्मृतिपथमुपेयादित्युपायमुप
दिशति ॥– यतोनुचिन्तनमेव तत्प्राप्तिहेतुः तस्मात्कारणात्सर्वेषु कालेषु
सर्वास्ववस्थासु व्यावहारिकीष्वपि मामात्मानमनुस्मरणानारतं चिन्त
य व्यवहारदशासु मध्ये प्रक्रांतमुपलक्षणमाह युध्य चेति व्यवहा
रभूतं स्वधर्मं युद्धं चानुतिष्ठ वः सत्युभयेव्यवहारदशास्वपि
यस्य भगवत्तत्वं न हृदयादपयाति तस्य भगवत्येव सकलकर्मसंन्या
सिनः सततं भगवत्परायणस्यावश्यमेव भगवत्तत्वमंतकाले स्मृ-
तिविषयतां यातीति भावः तथा चोक्तमन्यत्र स्वस्थे चेहास्त्वयमर्त्याः
स्मरंति मम नारद काष्ठपाषाणवल्लग्नानंतकाले स्मराम्यहमिति
अन्यच्च स्थिरे चेतसि सुस्वस्थे शरीरे सति यो नरः धातुसाम्ये स्थिते स्म
र्ता विश्वरूपं च मामजं ततस्तं म्रियमाणं तु काष्ठपाषाणसन्निभं अ
ंन हं स्मरामि मद्भक्तं नयामि परमां गतिमिति स्मर्तेत्यत्र ताकीस्तेतन्
अत एव न लोकाव्ययेति कर्मणी षष्ठीनिषेधः ननु व्यवहारदशास्तु न
दनुस्मरणे सत्यपि भवत्प्राप्तिः स[illegible]लभानुमीयते इत्यत आह
मयीति यदा यदा मयि प्रत्यगात्मनि अर्पिते मनोबुद्धी मनः संकल्पा
त्मकं बुद्धिर्निश्चयात्मिका येन सः तथा सन् प्रायो देहाहंभावरहित एव
विधः सन्नित्यानुस्मरणपरस्त्वं भवसि तदा तदा मामेवैष्यसि मद्भे
दं प्राप्स्यसीत्यर्थः [illegible]
[illegible] त्याह १

पंचोलीटीका

यस्माद्देहभावनादेहांतरप्राप्तौ कारणं न च सर्वाभ्यासमंतरेण तदा
नीं चित्तस्य विवशत्वात्सा भावना न संभवति तस्मात्सर्वदैव विस्र
भावना कर्तव्येत्याह तस्मादिति यस्मादेवं सर्वेषु कालेषु यावज्जी
वनं यथाशास्त्रमनुस्मरन् युद्धं युद्धं स्वधर्मं कुरु मयि परमेश्वरे अ
र्पिते मनोबुद्धी येन स त्वं एवंविधः सन् मामेव यथा स्मरन् मामागमि
ष्यसि अत्र मे प्रायः संशयो न विद्यते ८ ॥

उक्तमर्थं विनिगमयन्नर्जुनं प्रस्तुते युद्धे प्रवर्तयति तस्मादिति
यस्मादंतकाले प्राक्तनीना सर्वास्वप्यवस्थास्वव्यभिचारिणीमनु
वनैवोत्क्रांतिकाले पिधानवैषम्यविवशीकृतस्य विनैवोद्यमं मर
नुस्मृति हेतुः तस्मात्कारणात्त्वमपि सर्वेषु कालेषु मामनुस्मर श्र
मो मे पारणमिति बुद्ध्या चिंतय युद्ध्यस्व स्वधर्मभूतं युद्धं चानुतिष्ठ त
तश्च मयि सर्वेश्वरे र्पितं मनः संकल्पात्मकं बुद्धिर्निश्चयात्मिका ये
न तादृशस्त्वं मामेव मत्स्वरूपमेवैष्यसि प्राप्स्यसि असंशयं ना॰
स्यत्र संशयो निश्चितमेतदिति भावः ७॥

मधुभाष्य

७॥

भाषा अनुवाद टीका ॥

पूर्व वासना ही जिसलिये मरण कालके स्मरण से हेतु है और
अन्त समय विवश प्राणी को अपूर्व वस्तुका स्मरण असंभव है
इससे सर्वदा हमको चिन्तन करो परन्तु मेरा चिन्तन भी चित्त शु
द्धि बिना दुर्लभ है सो तुम चित्तशुद्धिके अर्थ युद्धरूप स्वधर्मका अ
नुष्ठान करो और तुमारा संकल्पात्मकमन तथा व्यवसायात्मिका
बुद्धि मेरेमे अर्पित भई है इससे अनायास हम को प्राप्त होउगे
इसमें संशय नही है ७ ॥

दोहा

ताते सर्वहि कालमें सिमर मोहि कर युद्ध मोहि मिलें संदे
ह नहि मोही अर्पे मन बुद्ध ७॥

अभ्यासयोगयुक्तेन चेतसा नान्यगामिना परमं। पुरुषं दिव्यं याति पार्थानुचिन्तयन् ८ ॥

शाङ्करभाष्यटीका

किञ्च अभ्यासेति अभ्यासयोगयुक्तेन मयि चित्तसमर्पणविषयभूते एकस्मिन् तुल्य प्रत्ययावृत्तिलक्षणो विलक्षणप्रत्ययान्तरितोऽभ्यासः स चाभ्यासो योगस्तेन युक्तं तत्रैव व्यापृतं योगिनश्चेतस्तेन चेतसा नान्यगामिना नान्यत्र विषयान्तरे गन्तुंशीलमस्येति नान्यगामि तेन नान्यगामिना परमं निरतिशयं पुरुषं दिव्यं दिविसूर्यमण्डलेभवं दिव्यं यातिगच्छति हे पार्थ अनुचिन्तयन् शास्त्राचार्योपदेशमनुध्यायन्नित्येतत् ८

आनन्दगिरिकृतटीका

इतश्च पूर्वश्लोकोक्तार्थानुष्ठायी भगवन्तमन्तकाले प्राप्नोतीत्याह किञ्चेति अभ्यासं विभजते मयीति नहि चित्तसमर्पणस्य विषयभूते भगवतोऽर्थान्तरे वस्तु सदस्तीति मन्वानो विशिनष्टि चित्तेति अन्तरालकालेऽपि विजातीयप्रत्ययेषु विच्छिद्य विच्छिद्य जायमानेष्वपि सजातीयप्रत्ययावृत्तिर्योगिनोऽपि स्यादित्याशंक्याह विलक्षणेति अभ्यासाख्येन योगेन युक्तत्वं चेतसो विवृणोति तत्रैवेति तृतीयया परामृष्टोऽभ्यासयोगः तस्यापि परामृष्टप्राप्ते ननु प्राकृतानां चेतस्तथेत्याशंक्य विशिनष्टि योगिन इति तच्चेतो विषयान्तरं परामृशेन्न नहि परमपुरुषार्थप्राप्तिहेतुः स्यादित्याशंक्याह नान्यगामिनेति ग्रामादिकं विषयान्तरमपारवश्यमापन्नतां नाक्षीत्यप्रत्ययान्तेन तात्पर्यादिपरामृष्टार्थान्तरेण परमपुरुषनिर्दिष्टेनेत्यर्थः तदेव पुरुषस्य निरतिशयत्वं यदपरामृष्टाखिलानर्थत्वमनतिशयानन्दत्वं तच्च प्रागेव व्याख्यातं नेह व्याख्यानमपेक्षते यश्चासावादित्ये इत्यादि श्रुतिमनुसृत्याह दिवीति तत्र विशेषतोऽभिव्यक्तिरेव भवनं एवंभूतेन चेतसा यथोक्तं पुरुषमनुचिन्तयन् याति तमेवेति सम्बन्धः अनुचिन्तयन्नित्यत्रानुशब्दार्थमाचष्टे शास्त्रेति चिन्तयन्निति व्याकरोति ध्यायन्निति ८ ॥

‸अभ्यासयोगेति

गी- सततंस्मरणस्यचा **स्वामिकृतटीका** भ्यासेंतरंगसाधन‸मितिदर्शयन्नाह ॥

टी-अ ‸अभ्यासःसजातीयप्रत्ययप्रवाहःसएवयोग उपायःतेनयुक्तेनएकाग्रेणात्र
तएवनान्यविषयंगंतुंशीलंयस्यतेनचेतसा दिव्यंद्योतनात्मकंपरमेश्वरंचिं
तयन्हेपार्थतमेवयाति ८ ॥

पिशाचभाष्यंटीका

५३ अभ्यासयोगयुक्तेनेति अभ्यस्यतेइत्यभ्यासः अभ्यासश्चासौयोगश्चेत्यभ्या
‸यो स[यो]गस्तेनयुक्तेनअभ्यासयोगयुक्तेनपरंमश्रेष्ठतमंदिव्यमप्राकृतंयाथा
नुचिंतयन्यातिनेतनान्यंगतिमित्यर्थः ८ ॥

रामानुजभाष्यंटीका

एवंसामान्येनसर्वत्रस्वप्राप्यवाप्तिरंत्यप्रत्ययाधीनेत्युक्तानंतदर्थंत्रयाणा
मुपासनप्रकारभेदंवक्तुमुपक्रमते तत्रैश्वर्यार्थिनामुपासनप्रकारंया-
थोपासनंमंत्यप्रत्ययकारकंचाह अभ्यासेति अहरहरभ्यासयोगाभ्या-
युक्तनयानन्यगामिनाचेतसांतकालेपरमंपुरुषंदिव्यंवक्ष्यमाणप्रका
रंचिंतयन्मामेवयाति आदिभरतमद्गतवदागमिष्यति ऐश्वर्यविशिष्ट-
तयामत्समानाकारोभवति अभ्यासोनित्यनैमित्तिकाविरुद्धेषुसर्वेषुका
लेषुमनसोपास्यसंशीलनं योगस्तुअहरहर्योगकालेनुष्ठीयमाना
यथोक्तलक्षणमुपासनं ८ ॥

अभिनवगुप्तकृतटीका‸ ‸अनुचिंतयन् शरीरभेदानंतरंनिह्नुतकले
वरकृतव्यथः पश्चाद्भगवंतंचिंतयन्निति ८

परमार्थप्रपाटीका

गू‸

सततस्मरणस्याभ्यासोंतरंगकारणमित्याह अभ्यासेति अभ्यासो
नामस्त्रीपुत्रवित्तादिभ्योमनसःप्रत्याहाररूपःयोगोनाममयि‸
योजनंतेनयुक्तंसमाहितं तेनतथाभूतेनचेतसाअतएवअन‸
न्यगामिनापदार्थांतरपरांमुखेनदिव्यंद्योतनात्मकंपरमेश्वरम‸
नुचिंतयन् परमंपुरुषंपरमात्मानंयाति प्राप्नोति ८ ॥

वनमालीटी॰

तदेवं सप्तप्रश्नानांउत्तरमुक्त्वा प्रयाणकाले हरिस्मरणस्य हरि॰
प्राप्तिरूपं फलं वर्णयन्निरतिशयैश्वर्यं निरूपयितुमारभते अ
भ्यासेति अभ्यासो विजातीयप्रत्ययानंतरित सजातीयप्रवा
हः स एव योगः समाधिस्तेन युक्तं तत्रैव व्यापृतं भगवदाका
रवृत्तीतरवृत्तिशून्यं यच्चेतस्तेन चेतसाभ्यासपाटवेन नान्य॰
गामिना न अन्यत्र विषयांतरेषु प्रयत्नं विनापि गंतुं शीलमस्ये
ति तेन परमं निरतिशयं पुरुषं पूर्णगुणं दिव्यमतिवैचित्र्यप्रप
चवैभवं यात्यर्चिरादिमार्गेण प्राप्नोति अनुचिंतयन् शास्त्राचा
र्योपदेशमनुध्यायन् ८ ॥

जह्नुमवैजयन्तीटीका

एवं सार्वकालिक्याः पूर्वसंततेरंतिमस्मृतिकारणत्वमभिस्मृ
तेश्च तदुत्तरप्राप्यावाप्तिहेतुत्वं सामान्येनोक्त्वेदानीमप्याती
दित्रयाणां यथाधिकारमुपासनप्रकारं वदन् निरंतरपूर्वस्मृ
तेरंतिमस्मृतिहेतुतां द्रढयति अभ्यासयोगयुक्तेनेति अ
भ्यासः पुनः पुनः स्मरणवृत्तिरूपः स एव योगस्तेन युक्तेन तेन
नान्यगामिना नान्यानितरदेवादीन्प्राकृतविषयान्वा गंतुं॰
शीलं यस्य तेन चेतसा व्यवसायवता चित्तेन परमं सर्वदेवो
त्कृष्टं दिव्यं सर्वैः प्रार्थ्यैरपि स्तुत्यं पुरुषं चेतनाचेतनांतरात्मा
नं विष्णुमात्मानमनुचिंतयन् अनुक्षणमभ्यासेन भावयंस्तमेव
चिंताविषयं मां याति कीटभृंगन्यायेन मत्समानरूपं प्राप्नो॰
तीत्यर्थः ८ ॥

मधुसूदनीटीका

तदेवं सप्तानामपि प्रश्नानामुत्तरमुक्त्वा प्रयाणकाले भगवद
नुस्मरणस्य भगवत्प्राप्तिलक्षणं फलं विवरीतुमारभते अभ्यासः
सजातीयप्रत्ययप्रवाहो मयि विजातीयप्रत्ययानंतरितः ष
ष्ठे प्राग्व्याख्यातः स एव योगः समाधिस्तेन युक्तं तत्रैव व्यापृ
तमात्माकारवृत्तीतरवृत्तिशून्यं यच्चेतः तेन चेतसा अभ्या

स पाठ्वेन नान्यगामिना न अन्यत्र विषयांतरे निरोधप्रय
त्नं विनापि गंतुं शीलमस्येति तेन परमं निरतिशयं पुरुषं पू
र्णं दिव्यं दिवि द्योतनात्मन्यादित्ये भवं यश्चासावादित्य इति
श्रुतेः याति गच्छति हे पार्थ अनुचिंतयन् शास्त्राचार्यो
पदेशमनुध्यायन् ॥ ८ ॥

सदानंदी टीका

समानान्तरं श्रोच्यज्ज्ञानामधुना हरिः भगवच्चिंतनस्यै
व भगवत्प्राप्तिलक्षणं विवरीतुं फलं चात्र सम्यगारभते
स्फुटं वासुदेवे विभो तैलधारावत्प्रत्ययावृत्तिलक्षणः अभ्या
सस्तेन युक्तं यच्चेतस्तत्रैव न तत्परं गंतुंशीलं न चान्यत्र चे
तसोऽस्येति तेन च युक्तो याति परं दिव्यं सूर्यमंडलमध्यगं
शास्त्राचार्योपदेशेन ध्यायन्नुत्तमपूरुषम् ८ ॥

नीलकंठी टी॰

एतदेव श्लोकत्रयेण विवृणोति अभ्यासेति अभ्यासयोगयु
क्तेन तत्रास्थितौ यत्नोऽभ्यास इति सूत्रितोऽभ्यासः तत्र ध्येये
वस्तुनि चित्तस्य स्थिरीकरणार्थो यत्नः स च विजातीयप्रत्य
यानंतरितसजातीयप्रत्ययप्रवाहीकरणरूपः सोऽत्राभ्या
सः तत्र भाव्यो विषयः सिद्धः विष्णुप्रतिमादिर्विराडादिर्वा
असिद्धस्तु मानसप्रतिमादिः तत्रासिद्धे मनसः प्रतिमा
कारतासंपादनेन तत्र स्थैर्यसंपादने चेति विषयभेदाद्द्वि
गुणो यत्नः कर्तव्यो भवति सिद्धे तु चित्तस्थिरी

कारणार्थ्यपकप्रवयत्नः तत्र यथा स्वतः स्वच्छः स्फटिको जपाकु।
सुमोपरागाल्लोहितः स्फटिक इति तत्र लौहित्याध्यासः तस्यावस्था।
तत्रैव स्फटिकधीप्रमोषे पद्मरागत्वाध्यासः पद्मरागेपि वेदिकाणामि
न्द्रनीलत्वाध्यासस्तत्रैव तदानीमेव किंचिद्दूरस्थे निहीनोपलत्वाध्यासः
इति उत्तरोत्तराध्यासक्रमेण शुद्ध एक एव स्फटिकः पंचविधो भवति एवं
स्वतः शुद्धचैतन्यं मायोपरागात् ईश्वरः मायाशबलस्तत्रैव ईश्वरत्वा
ध्यासप्रमोषे तत्रैव सूत्रात्माध्यासः सूत्रेपि प्रज्ञानदार्ढ्यो हिरण्यध्यासः त
त एव विराडेकदेशे व्यष्टिशरीराहंकारात्मत्वभ्रमः तत्र यथा घटान्तर्गतः
प्रदीपः घटमात्रं भासयति घटच्छिद्रान्तर्बहिर्गतः किंचित्प्रभया स
न्निहितं विषयमवभासयति सर्वात्मना च घटाद्बहिर्गतस्तु कृत्स्नं भवनोदरव
र्ति पदार्थजातं प्रकाशयति तद्वद्देहान्तर्गता चितिः देहमात्रं भासयति
देहच्छिद्रद्वारा तदेव बहिर्गता सती तत्तच्छिद्रसन्निकृष्टं किंचिद्विषयं रूपादिकम
वभासयति सर्वात्मना च कृत्स्नाद्देहकृतपरिच्छेदाभिमानेन मुक्तेन
अपरिच्छिन्ना सती कृत्स्नं विराडात्मानमवभासयति यथोक्तं वासिष्ठे
शेषेपि मणिकुम्भवद्बहुना शमो मसूर्यां दयापि दीप्तिर्विषयमिह स्थले।
बाह्यमुद्योतयति सहजलयसमुन्मेषोन्मेषयोर्ज्योतिरेन त्रिभुवनमपि
सकलमसकलभेदक्रमेणेति सहजलयसमुन्मेष सहजः स्वाभाविको दे
हकृतपरिच्छेदाभिमानत्यागलयमात्रादेव उत्थितं क्रमेण सकलसक्र
मेण सद्रीनणमात्रामिति निर्हेतुत्वात् सर्वस्य शाकसंकल्पादसत्त्वात् त
थाच श्रुतिः स यदि पितृलोककामो भवति संकल्पादेवास्य पितरः समु
त्तिष्ठन्तीति दोषनिमित्तरूपादयो विषयाः संकल्पकृताः स्वल्पादस्य
हेतवो रागादयः तदेवं प्रकाशमाने विराजि अहमेवेदं सर्वोऽस्मीति म
न्यते सोऽस्य परमो लोक इति शास्त्रमाण्डूक्योपासके नगरहीनोऽहंस्थ्यहो
यद्यपि वस्तुतत्त्वापेक्षया श्रौतिरूपमप्यापि स्वाभाविकादेहाहंग्रहात्म
स्वरूपः यथा स्फटिके हीनोपलत्वग्रहापेक्षया इन्द्रनीलत्वग्रहः स्वल्पहन्।
यथा वा स्फटिके प्रणिधीयमाने वस्तुतः तत्स्वरूपादवविहृष्टो इन्द्रनी।
लत्वं वाधित्वा पद्मरागत्वं तद्वाधेन लोहितस्फटिकत्वं तद्वाधेन शुद्धत्वं

गी. चावगच्छति प्रवेशक्रमशक्त्या प्रत्यगात्मनि प्रणिधीयमानं मनोऽस्य श
टी. हिवासे रूपमपोह्य श्रोतरि प्रवर्तिष्यते वरमं विशुद्धं रूपं प्राप्य तत्स्वयमेव वि
अ. लीयते यथोक्तं येनाभ्यसनस्थितं मज्जेति येन मनसा मज्जस्थिविराजदिभाव
नेदपि मनसा मजेत्यर्थः नदेवं व्यवहारायेत्या मसिद्धेतु विराट्स्वज्ञानयो
मिषु मनसः स्थिरीकरणार्थो यत्नोऽभ्यासस्तत्फलभूतो योगः समाधि।
र्थयवस्तमेवचेतसः स्थैर्येनेन युक्तेन युक्तं यत्नेन तस्तेन नान्यगामिना।
अनन्यगामिना नैकधेतिवत्समासः तेन चेतसा परमं सर्वोत्कृष्टं पुरु
षं निरस्ताशेषदोषं यत्सर्वं पूरयत्यात्मस्वभावमनस्थाय तस्मात्पुरुष इ
ति निर्वचनात् दिव्यं द्योतमाने अनुचिंतयन् अहमेव भगवान्सर्वात्मा
वासुदेव इति सततमाचार्योपदेशमनुध्यायन् तमेव नदीसमुद्रमायेन
याति हे पार्थ तथा च श्रुतिः यथा नद्यः स्यंदमानाः समुद्रेऽस्तं गच्छंति।
नामरूपे विहाय तथा विद्वान्पुण्यपापे विधूय परात्परं पुरुषमुपैति।
दिव्यमिति परात्मज्ञात्परं श्रंतर्यामिणं ८ ॥

आनंदीटीका

अत्रोपायमाह ॥ — यमनियमादीनां बहिरंगानां ध्यानधारणासमाधीनां चांतरंगाना
मभ्यासयोगे भ्रूमध्यादिदेशे चित्तं विनस्यबन्धाद्धारणादार्ढ्येन तथा दे
वदेशे परमे पुरुषे ध्येये नवरतं तानैकतानतया ध्यानदार्ढ्येन ध्यान
स्यैव वस्तस्वरूपशून्यत्वात् नानमर्थमात्रनिर्भासनतया समाधिदार्ढ्येन
भ्यासयोगः तद्युक्तेन चेतसा अनपवादनन्यगामिना अन्यविषयम
गच्छता परमं पुरुषं दिव्यमनुचिंतयन्योक्तक्रमेणानुसंदधानस्त
मेव परमं पुरुषं याति ॥

इतिपातिदाद्यार्थमेनमेवार्थं रामकंठीटीका

विवरीतमाह ॥ निमानुस्मरणाय तल्लक्षणं समाधौ पुरुकेन संबद्धेनाः तपद्वाः तस्य
गामिनापथ्यो क्लिन तव्यतिरिक्तवस्त्वन्तरविरतगामिनाः त्तः करणे
नवितयन्सदा ध्यायन् संस्कारबलात्परमं सर्वदेवेभ्यः उत्कृष्टं पुरु
षमेकमात्मानं दिव्यं दिवि परमव्योम्नि स्वभावमयेभवं याति प्रपद्यते
तादात्म्यमुपैति

नमात्मसाधनम् यस्मात्कालिकं प्रतिपाद्ये दानीं प्राणजयादिसा
ध्ययोगसाधनमपरं तं प्रतिपादयितुमाह ८ ॥

यथाजीवद्दशायां मय्यर्पित लासिकी [illegible] टीका मनोबुद्धिर्मामेवैष्यति एवं देहत्यागकालेपि मत्प्राप्ति

रित्याह ॥ अभ्यासयोगयुक्तेन निमानुस्मरणमेवं येनानन्यगामिना वस्त्वन्तर
विरतगतिना चेतसान्तःकरणेनात्मानमनुचिन्तयन् शरीरभेदान
न्तरं निहतकलेवरस्थ यः पश्चाद्ध्यायन्पुरुषादिव्यो योननात्मकं पर
मेपुरुषं पुरुषोत्तमं श्रीपरमेश्वरं याति प्रतिपद्यते तादात्म्यमुपेत्य वि
देहमुक्तो भवतीत्यर्थः [illegible]
[illegible]
[illegible] [illegible]
[illegible]
[illegible] ८ ॥

पंचोलीटीका

परमपुरुषार्थहेतुभूतायाः दृढायाः ध्येयभावनायाः अभ्यास
एव कारणमित्याह अभ्यासेति हे पार्थ अभ्यासयोगयुक्तेन तत्
द्विषयो निरन्तरज्ञानप्रवाहोऽभ्यासः स एव योगस्तेन युक्तेन तस्मा
तेनाभ्यासयोगयुक्तेन चेतसा नान्यगामिना अन्यत्र विषयान्तरेग
मनरहितेन अनुचिंतयन् शास्त्राचार्योपदेशमनुध्यायन् परमे
निरतिशये दिविसूर्यमण्डले भवं दिव्यं पुरुषं याति प्राप्नोति ८

रमणवीरमसिद्धाथिनी ॥

अथ सर्वकालीनानुस्मृतावुपायमाह अभ्यासेति पौनःपुन्येनाभ्ये
कर्मणि प्रवृत्तिरभ्यासः स एव योग उपायस्तेन देहेनायुक्तेन सावधा
यानेन च अत एवानन्यगामिना परमेश्वरात्मकात्प्राप्यान्यं विषयं गंतुं
शीलमस्येति तादृशेन चेतसा दिव्यं द्योतनशीलमत्यद्भुतदीप्ति
विशिष्टं परमं पुरुषं प्राप्नोतीति हि तस्तीति कवाजगद्दस्वाथैतद

पङ्कवकारकउष्टदानवादिहिंसायैवहृतावतारं अथवा परमं परा
सर्वोत्कृष्टमावतनवर्गसंपयस्यते पुरुषं पुरुषोत्तमं सर्वेषां अथ
वा परमं सर्वोत्कृष्टं पुरुषं वासुदेवाख्यं पुरुषं श्रीविस्मयं चिंत
यन् अनुस्मरन् देहपार्थतमेव याति तत्सारूप्यमेवाप्नोति ८॥

46

मधुभाष्य

अभ्यासेति अभ्यासएकयोगोऽभ्यासयोगः दिव्यंपुरुषंपुरि
शायंपूर्णंच सर्वाजयपुरुषः सर्वासुपूर्षु पुरिशयो नैनेन किं
चनानावृतं नैनेन किंचनासंवृतमिति श्रुतेः दिव्यस्वरूपादिक्री
डायुक्तं दिवुक्रीडेति धातोः ध्येयमाह ९ कविमिति कविंस
र्वज्ञं यः सर्वज्ञ इति श्रुतिः तं कविः सर्ववेदनादिति ब्राह्म धाता
रं धारकपोषकं कर्तारं डुधाञ् धारणपोषणयोरिति धातोः

भाषाअनुवाद टीका ॥

और समरण मे परम कारण अभ्यास को देखावते हुये कहते हैं कि अभ्यास कहे समान जातीयकी प्रतीतिका प्रवाह जो धारा वह योग है अर्थात् उपाय है उससे एकाग्र होय जिसकी बुद्धि अन्यविषयोमे न जाय ऐसा मनुष्य उस बुद्धिके द्वारा प्रकाश रूप परमेश्वर को निरन्तर करिके हे पार्थ उस परमेश्वर को प्राप्त होता है ८ ॥

दोहा

अभ्यास योगयुत चितसें अनन्यगामी सें कोय जो पार्थ चिंतन
करे मिलें परमपुरुष दिव सोय ८॥

कविंपुराणमनुशासितारमणोरणीयांसमनुस्मरे
द्यः सर्वस्यधातारमचिन्त्यरूपमादित्यवर्णंतमसःप
रस्तात् ९ ॥

शाङ्करभाष्यटीका

किं विशिष्टञ्च पुरुषं यातीत्युच्यते कविमिति कविं क्रान्तदर्शिनं सर्वज्ञं पु
राणं चिरन्तनमनुशासितारं सर्वस्य जगतः प्रशासितारं अणोः सूक्ष्माद
प्यणीयांसं सूक्ष्मतरं अनुस्मरेदनुचिन्तयेत् यः कश्चित् सर्वस्य कर्मफल
जातस्य धातारं विचित्रतया प्राणिभ्यो विभक्तारं विभज्य दातारमचिन्त्यरू
पं नास्य रूपं नियतं विद्यमानमपि केनचित् चिन्तयितुं शक्यते इत्यचि
न्त्यरूपस्तं आदित्यवर्णमादित्यस्येव नित्यचैतन्यप्रकाशो वर्णो यस्य त
मादित्यवर्णं तमसः परस्तादज्ञानलक्षणान्मोहान्धकारात् परं तमनुचि
न्तयन् यातीति पूर्वेणैव सम्बन्धः ९ ॥

आनन्दगिरिकृतटीका

किं विशिष्टं पुरुषमनुचिन्तयन्निति सम्बन्धः चकारात् कया वा नाड्यो
त्क्रामन्नित्यनुकृष्यते तत्र ध्यानद्वारा प्राप्यस्य पुरुषस्य विशेषणानि
दर्शयति उच्यत इति क्रान्तदर्शित्वमतीतादिदेशेषस्य वस्तुनो दर्शनशा
लित्वं तेन निष्पन्नमर्थमाह सर्वज्ञमिति चिरन्तनमादिमतः सर्वस्य का
रणत्वादनादिमित्यर्थः सूक्ष्ममाकाशादि ततः सूक्ष्मतरं तदुपादानत्वा
दित्यर्थः यो यथोक्तमनुचिन्तयेत् स तमेवानुचिन्तयन् यातीति पूर्वेणै
व सम्बन्ध इति योजना ननु विशिष्टजात्यादिमतो यथोक्तमनुचिन्तने
फलवत्त्वं भवति न त्वस्मदादीनामित्याशंक्याह यः कश्चिदिति फलम
त उपपत्तेरिति न्यायेनाह सर्वस्येति एतदप्रमेयं ध्रुवमिति श्रुतिमाश्रि
त्याह अचिन्त्यरूपमिति नहि परस्य किंचिदपि रूपादि वस्तुतोऽस्ति
अरूपवदेव हीति न्यायात् कल्पितमपि नास्मदादिभिः शक्यते चिन्त
यितुमित्याह नास्येति मूलकारणादज्ञानात्तत्कार्याच्च पुरस्तादुपरिष्टा
द्व्यवस्थितं परमार्थतो ज्ञानतत्कार्यास्पृष्टमित्याह तमस इति ९

पवनः पावयितॄणां सर्वप्राणिकलेश्वरः शस्त्रास्त्रधारिणां मध्ये रा
मो दाशरथिर्विभुः १ सर्वरत्नः कुलधुरी महावीरो हमीश्वरः सात्त्व
हि गुणरूपस्वानेन रूपेणादेहिनां २ चिंतनार्थे दाशरथिः पावनेनेपो
विभूतिषु ३ यज्ञः पाणी रत्नः कुलवनदवाग्निर्द्विजगतिः प्रतापी सा
क्षिप्रजनकनंदनयावाहूलनया शारदेंदुआकारे स्मितमधुरवक्त्रामृत
रुहेदयानो ध्येयो सौरत्नकुलरविर्लक्ष्मणसत्वः ४ कृतज्ञो मेधावी
स्मृतिधृतिनिधिः शांतिजलधिः कृपासिंधुर्वीरो तिरवधिसुखो गारप
दः प्रभुलीवण्या चिंदशरथकुमारो भयदः सदा ध्येयो हीत्यरघु
हृ^ कुलहिमांशुः सद्भये ५ अनेकमत्स्यजातीनां मकराख्योहमीश्वरः च
लजलानां वेगेन गंगाहं सरितां वरा ६ ३१ ॥

नीलकंठीटीका १२

पवतां पावयितॄणां वेगवतां वा रामो दाशरथिः रामादीनां परमेश्वा
राणामपि विभूतिमध्ये गणनं ध्यानार्थं झषाणां मत्स्यादीनां मकरो
जातिभेदः स्रोतसां नदीनां ३१ ॥

आनन्दीटीका

पवतां वेगवतां ३१

रामकंठीटीका [illegible] ३१ स्पष्टार्थमु

लासिकी [redacted]मीटीका

पवतां पावयितॄणां वेगवतां वा श्रीरामो दाशरथिः झषाणां
मत्स्यानां मकरो मत्स्यविशेषः स्रोतसां प्रवहज्जलानाम् ३१

पंचोलीटीका

पवतां पावयितॄणां वेगवतां मध्ये पवनो वायुरहं शस्त्रभृतां
मध्ये रामो दाशरथिरहं च झषाः झषाणां मकरोहं स्रोतसां नदी
नां मध्ये गंगाहं ३१

स्वामिकृतटीका ॥

पुनरप्यनुचिंतनीयं पुरुषं विशिनष्टि कविमिति कविं सर्वज्ञं पुराणं अना
दिसिद्धं अनुशासितारं नियंतारं अणोः सूक्ष्मादपि अणीयांसं अतिसूक्ष्मं
सर्वस्य धातारं पोषकं अपरिमितमहिमत्वात् अचिंत्यरूपं आदित्यवत् स्व
परप्रकाशात्मको वर्णः स्वरूपं यस्य तं तमसः प्रकृतेः परस्तात् वर्तमानं
एवंभूतं पुरुषं अंतकाले भक्तियुक्तः यः स्मरेदिति ९ ॥

मलीमसं
तोपुज्यो

पिशाचभाष्यटीका ॥

कविं क्रांतदर्शिनं सर्वज्ञं पुराणं पुरातनं अनुशासितारं अणोरणीयं सर्व
प्राणिनां स्वधर्मे स्थितिनिमित्तं अणोरणीयांसं सूक्ष्मादपि सूक्ष्मतरम।
तस्मैव यः सर्वस्य धातारमचिंत्यरूपं यस्य तमादित्यवर्णं प्रकाशरूपं त।
मसः परस्तात्परतो वर्तमानं ९ ॥

रामानुजभाष्यटीका ॥

कविं सर्वज्ञं पुराणं पुरातनं अनुशासितारं शिक्षकं अणोरणीयांसं जी
वादपि सूक्ष्मतरं सर्वस्य धातारं सर्वस्य स्रष्टारं अचिंत्यरूपं सकलेतरव।
विसजातीयस्वरूपं आदित्यवर्णं तमसः परस्तात् अप्राकृतस्वसाधारण।
दिव्यरूपं ९ ॥

अभिनवगुप्तकृतटीका

एवमनुस्मरेदिति आदित्यवर्णत्वं वासुदेव
तत्त्वस्य परिच्छेदकमाहृतिकल्पनादिविभ्रा
न्तिमयमोहतमसोतीतत्वाद्विवित्त्वेनोपमा
नमित्याशयः ९

परमार्थप्रपाटीका ॥

अथ चिंतनीयं पुरुषं विशिनष्टि कविमिति द्वाभ्यां कविं सर्वज्ञं पुराणमना
दिसिद्धं अनुशासितारं नियंतारं अणोः सूक्ष्मादप्यणीयांसं सर्वस्य स्थूल
सूक्ष्मप्रपंचस्य धातारं माश्रयभूतं सूक्ष्मत्वेनाचिंत्यरूपं तमसः प्रकृतेः
परस्ताद्वर्तमानं आदित्यवत्स्वपरप्रकाशमयो वर्णः स्वरूपं यस्य एवंभूतं
पुरुषं ९ ॥

वनमालीटीका ॥

पुनरपि मुमुक्षुभिर्ध्येयं मुमुक्षुप्राप्यं पुरुषं विशिनष्टि कविमिति कविं सर्वज्ञं पु
राणं सर्वस्यादिभूतं तस्यस्यादिरहितं अनुशासितारं अंतर्यामिणं अणोरणी

यां संहृत्यात्मन्यपि हृत्स्नं सर्वस्यान्तरं सर्वस्य जीवजडादेर्धारकं पोषकं
चाचिन्त्यरूपं अणुत्वमहत्त्वसर्वकर्तृत्वौदासीन्यसर्वभूतसमसङ्कृतिग्रा
हकत्वमत्वान ग्राहकत्वादीनां लोके एकत्र विरुद्धानां चैतानां तेदा
धृतेन गुणानामालयत्वेन तस्मात् विनाचिन्तयितुमशक्यमित्यर्थः
आदित्यवर्णं सूर्यवत्स्वपरप्रकाशकवर्णायेते नमस्तः प्रकृतेः परस्ता
त् प्रकृतिपरत्वेन नियामकत्वेन तदूर्ध्वस्थत्वेन वा मायेत्त प्रकृतिं विद्या
न्मायिनं च महेश्वरमिति श्रुतेः नमोव्यक्ते शिवे नित्यमजे योनिः स
नातने प्रकृतिर्विकारो प्रलयं प्रधानं प्रभवाप्ययौ अनुद्भिक्तमनूनव
त्वकं प्यमचलं ध्रुवं सदसच्चैव तत्सर्वमव्यक्तं त्रिगुणं स्मृतं ज्ञेयानि
नामधेयानि तस्यैवाध्यात्मचिन्तकैरित्याद्यमेयिकेन मः प्रकृतिश
ब्दयोः पर्यायत्वोक्तेः ५ ॥

ब्रह्मवैजयन्तीटीका ॥

यां शक्तां

ननु योगं विनाभ्यास एव कथं संभवतीत्यपेक्षायां योगमुक्तिमाह यंचभिः कवि
मिति सप्तस्वर्ध्यार्थी भक्तस्तप्युत्तम्यमुपैति गच्छतीत्यनेनैव श्लोक एवान्वयः
कीदृशमित्यपेक्षायां मष्टौ विशेषणान्याह कविं सर्वसामान्यविशेषज्ञा
नवन्तं यः सर्वज्ञः सर्ववित् इति श्रुतिसिद्धमित्यनेन चतुर्मुखस्य कवित्वा
निराकृतं तस्य विशेषसर्वज्ञत्वाभावात् पुराणं पुरातनमित्यनेनाप्यस्य
विधिशिवादिवैसूचितम् यस्माद्ब्रह्मा जायते रुद्रो जायते इति श्रुत्यात
योर्जन्यत्वश्रवणात् अनुशासितारं सर्वेषां ब्रह्मरुद्रेन्द्रादिदेवानामपु
पदेष्टारमित्यनेनाप्यस्य जगद्गुरुत्वं दर्शितम् ननु जीवस्याप्यनादित्वे
न अजो नित्यः शाश्वतोऽयं पुराण इत्युक्तत्वेन च पुराणत्वे देहादिपाल
कत्वेनानुशासितृत्वं च सम्भवत्यतोऽत्र चिन्तनीयः किं जीवः स्यादित्या
शङ्कायामाह अणोरणीयांसमिति अणोरणुपरिमाणकाज्जीवा
दणीयांसं अतिशयेनाणुरणीयांस्तमणीयांसं जीवस्याप्यन्तः प्रवि
ष्टत्वात्सारमित्यर्थः अन्तःप्रविष्टः शास्ता जनानामिति श्रुतेः नन्वण

श्री॰
टी॰ अ
49

रूपात्तुच्छादेर्जीवस्याप्यणीयस्त्वं स्यादिति चेन्न आह सर्वस्य धातारमिति सर्वस्य
चेतनाचेतनात्मकस्य जगतो धातारं स्रष्टारं धारकं वा जीवस्य जगत्स्रष्टृत्व
सत्त्वेणोरणीयस्त्वं नास्तीति भावः ननु ईदृशो वस्तुनो जगत्स्रष्टृत्वं कथ
मुपपद्यते इति चेन्नाह अचिन्त्यरूपमिति चिंतयितुं योग्यं चिंत्यं रूपं यस्य न चिन्त्यं
स्यासौ अचिंत्यरूपस्तम् अवितर्क्यस्वरूपं अचिंत्यरूपं अचिंत्यरूपत्वा
नास्य महतो महीयस्त्वादणोरणीयस्त्वाच्च देहेनो जगत्स्रष्टृत्वं जगद्धारकत्व
वाघटनमेवेत्यर्थः ननु तर्हि किं प्रकृतिर्यतोऽस्याप्यचिंत्यरूपत्वमिति चेन्न
आह तमसः परस्तात् तमःशब्दवाच्यायाः प्रकृतेः परस्तात्पर तत्स्थितमतो
न प्रकृतिरित्यर्थः ननु तर्ह्यस्य किं रूपं स्यादित्यपेक्षायामाह आदित्यवर्णं
स्वयं प्रकाशरूपं आदित्यवर्णं तमसः परस्तात् आश्रनतोत्कवर्ण
मित्यादिश्रुतेः ९

मधुसूदनी टीका ॥

पुनरपि तमेवानुचिंतयितव्यं गंतव्यं च पुरुषं विशिनष्टि ॥
कविं क्रांतदर्शिनं तेनातीतानागताद्यशेषवस्तुदर्शित्वेन सर्वज्ञं पुराणं चिरं
तनं सर्वकारणत्वादनादिमिति यावत् अनुशासितारं सर्वस्य जगतो नियं
तारम् अणोरणीयांसं सूक्ष्मादप्याकाशादेः सूक्ष्मतरं तदुपादानत्वात् सर्व
स्य कर्मफलजातस्य धातारं विचित्रतया प्राणिभ्यो विभक्तारं फलमत
उपपत्तेरिति न्यायात् न चिन्तयितुं शक्यम् अपरिमितमहिमत्वेन रूपं यस्य तं
आदित्यस्येव सकलजगदवभासको वर्णः प्रकाशो यस्य तं सर्वस्य जग
तोऽवभासकमिति यावत् अत एव तमसः परस्तात् तमसो मोहांधकारा
दज्ञानलक्षणात्परस्तात् प्रकाशरूपत्वेन तमोविरोधिनमिति यावत् अ
नुस्मरेत् चिंतयेत् यः कश्चिदपि स तं यातीति परेणैवान्वयः स तं परं पुरु
षमुपैति दिव्यमिति परेणैवान्वयः [illegible]
[illegible] ९

सदानंदी टीका ॥

पुनश्चिंतयितव्यं गंतव्यं चैव स्वरूपं नानाविशेषणैः श्रेष्ठं विशिनष्टि हरिः
स्वयं अतीतानागतादेः सर्वस्यैव वस्तुनः स्पष्टदर्शितया क्रांतदर्शी स
वेड उच्यते तम् अनादितया सर्वकारणत्वाच्चिरंतनं समस्तस्य नियंतारम् आ
काशादेः सूक्ष्मनः तत्कारणतया सूक्ष्मतरं सर्वस्य कारणं सर्वस्य

फलजातस्यविचित्रत्वेनकर्मणां प्राणिभ्यःसंविभक्तारमचिंत्यम
हिमत्वतः नास्यचिंतयितुंशक्यंरूपंकेनापितंतथा आदित्यस्ये
वसर्वस्यप्रपंचस्यावभासकः प्रकाशोयस्यतंतस्मान्मोहांध
तमसःपरं तमित्थंचिंतयेयस्तुसतंयात्यवपुरुषं ९ ॥

नीलकंठी टीका

तदेवंउपासनायाःस्वरूपमुक्त्वाउपास्यस्यस्वरूपमाह कविमिति
कविंक्रांतदर्शिनंसर्वज्ञं पुराणंचिरंतनंअनुशासितारंजगतोंत
र्यामिणं अणोःसूक्ष्मादप्याकाशादेरणीयांसंसूक्ष्मतरंयोनु
स्मरेत् अनुचिंतयेत् सर्वस्यकर्मफलस्यधातारंविभागेनप्रदा
तारं अचिंत्यरूपं नास्यरूपंविद्यमानमपिकेनचिच्चिंतयितुं
शक्यं आदित्यवर्णंआदित्यस्येवनित्यप्रकाशरूपोवर्णोदीप्य
मानतायस्यतं आदित्यवर्णंसर्वजगदवभासकमित्यर्थः तम
सः देहेंद्रियादावनात्मनिआत्माभिमानरूपःविद्यातःपरस्ता
त् पराचीनंसतिदेहाभिमानेनप्रकाशतेयोगयुक्तात्मकेतुत
स्मिन्स्वयमेवप्रकाशतइत्यर्थः ९ ॥

आनंदी टीका

तस्यविशेषणान्याह कविंसर्वज्ञंपुराणंकालेनानवच्छिन्नंपू
र्वेषामपिपूर्वतरमनुशासितारंशास्त्रद्वारेणोपदेशदानात्स्वस्व
कर्मणिनियोजकं अणोरणीयांसम् सर्वत्रांतरनुप्रविश्यप्रे
रकतयातिसूक्ष्मं सर्वस्यविश्वस्यकर्मफलस्यचधातारंकर्ता
रम् अस्थूलमनण्वह्रस्वदीर्घमलोहितमितिरूपादिप्रतिषे
धात् अचिंत्यरूपम् आदित्यवर्णंज्योतिर्मयंसर्वप्रकाशकं
तमसःपरस्तात् अज्ञानमेवतमोतीत्यास्थितम् ९ ॥

रामकंठी टीका

एवमवाधितोपपत्त्युपन्यासपूर्वंयथोक्तात्तत्त्वज्ञानमात्रसाधनं
परमुत्क्रांतिक्रमंप्रतिपाद्येदानींप्राणजयादिसाध्ययोगसाध
नमपरंतंप्रतिपादयितुमाह सएवंविधोयोगीतंदिव्यंदिविप

गी॰
टी॰
अ॰

रमव्योम्निभवमनतएवपरंसर्वोत्कृष्टंपुरुषमीश्वरमात्मानंउ॰
पैतिप्राप्नोति कोसौयोभक्त्याभगवदनुग्रहादित्यलोकप्रभा
सेध्यायासकलपुरुषार्थसिद्धिबीजभूतया तथाप्रत्यक्तत्वरू
पनिरूपणसमाधिसामर्थ्येनयुक्तः संततस्याभ्यासस्यायामच
लेनस्थिरसमाधानेनमनसान्तःकरणेनसर्वस्याधारंपरम॰
कारणमनुस्मरेदन्तकालेनुचिंतयेत् ९ ॥

50

लासिकी टीका

ननुकथमवच्छिन्नस्यात्मनोनुचिन्तनेनानवच्छिन्नपुरुषोत्तमा
वाप्तिरित्याशंक्य पुरुषोत्तमाधिविशेषणानि तदभेदेनात्मनो
प्यतिदिशति कविमिति कविंसर्वज्ञंक्रांतदर्शिनंवापुराणम॰
नादिसिद्धमनुशासितारंनियंतारं अणोःसूक्ष्मादप्याकाशा
देरणीयांसंसूक्ष्ममतिदुर्लक्ष्यं सर्वस्यचराचरस्याधारंधार॰
कंपोषकंच अचिंत्यचिन्तयितुमशक्यममनोगोचरंरूपं॰
यस्यतमादित्यवर्णंस्वप्रकाशंनतुपरप्रकाश्यम् अतएवतम
सोज्ञानरूपादन्धकारात्परस्तात्पृथक्तयावर्तमानम् ९ ॥

पंचोली टीका

तमेवपुरुषंदर्शयति कविमिति यःपुराणंचिरंतनंकविंस
र्वज्ञंअनुशासितारं अणोःसूक्ष्मादपि अणीयांसंसूक्ष्मतरंस
र्वस्यकर्मफलजातस्याधातारंविचित्रतयाप्राणिभ्योविभक्ता
रमचिंत्यरूपंविद्यमानमपिरूपंकेनचिच्चिंतयितुमशक्यंय
स्यतं आदित्यवन्नित्यचैतन्यप्रकाशोवर्णोयस्यतं आदित्य॰
वर्णंतमसः अज्ञानलक्षणान्मोहांधकारात्परस्तात्परत्रव
र्तमानमनुचिंतयेत् ९ ॥

रणवीरसमिद्धोधिनी॥

अथ प्रयाणकाले च कथं ज्ञेयोसि नियतात्मभिरित्यनेन मरण
समये किंप्रकारकस्वरूपेणानुचिंतनीयोसीति निरनुयोगं के
वलमनभिज्ञतयैव प्रयाणकालीनभगवत्स्वरूपप्रकारप्रति
योगिकज्ञानविषयोक्तिः सर्वकं प्रश्नमेवोत्तरयति कविमिति द्वा
भ्यां सतं प्रसिद्धं दिव्यमत्यद्भुतपाक्तिमंतं परं मनोवाचामगो
चरं पुरुषं परमेश्वरमुपैति तत्सारूप्यं व्रजतीति सकृदत्यये
नायांतं विधानाह यः कर्मयोगी अचलेन संकल्पांतरैरदूष्य
स्वोचितकर्मणः सकाशाच्चालयितुमशक्येन तथा भक्त्या यु
क्तेन यज्ज्ञानं सा भक्तिरिति कथ्यते इति लक्षितया तथा योग
बलेन योगोभ्यासउपायरूपायः तस्य बलेन च युक्तः सन् ९

मधुभाष्य

धाता विधाता परमोत संदृगिति श्रुतिः ब्रह्मास्याग्रवित्या
रभ्य तस्य प्रसादादिष्टं ति तदादिष्टफलां गतिमित्यादि च मो
क्षधर्मे तमसो व्यक्तात्परतः स्थितं तमसः परस्तात् इति अव्य
क्तं वै महतः परस्ताद्धि सततं इति पिप्पलादशाखायां मृत्युर्वा
मतः मृत्युर्वै तमो ज्योतिरमृतमिति श्रुतेः वाग्जयादियोग
युक्तानां मृतिकाले कर्तव्यमाह ९॥

51

भाष्य अनुवाद टीका

फेरि भी चिन्तनीय पुरुष का स्वरूप दो श्लोकसे कहते है कि कवि क
हे सर्वज्ञ सकल विद्यों के निर्माण कर्ता पुराण कहे अनादि सिद्ध अन
शासता कहे समस्त जगतके नियन्ता औ अणोरणीयांस कहे सूक्ष्म
से भी सूक्ष्म आकाश काल दिशों से भी सूक्ष्म औ सबके धाता कहे
पोषण कर्ता अपरिमित महिमा से अचिन्त्य रूप अर्थात् मलयुक्त म
नबुद्धि के अगोचर कहे अथवा औ आदित्य वर्ण तथा तम जो प्रका
ति मया तिससे पर ऐसे मेरे रूप को जो स्मरण करै है ९ ॥

चौपई

कविपुराण अनुशासनकर्ता जो अणुसेंसूक्ष्म प्रतिस्मर्ता धा
ता सभको रूप अचिंत आदित्यवर्ण तमपरे अनंत ९॥

52

प्रयाणकालेमनसाऽचलेन भक्त्यायुक्तोयोगवलेन
चैव भ्रुवोर्मध्येप्राणमावेश्यसम्यक् सतंपरंपु
रुषमुपैतिदिव्यं १० ॥

शाङ्करभाष्यटीका ।

किञ्चप्रयाणकालइति प्रयाणकाले मरणकाले मनसाचलेन प्रच
लनवर्जितेन भक्त्यायुक्तो भजनं भक्तिः तया युक्तोयोगवलेनचैव योगस्य
वलंयोगवलं तेनसमाधिजसंस्कारप्रचयजनितं स्वचित्तस्थैर्यलक्षणं
योगवलं तेन च युक्तइत्यर्थः पूर्वं हृदयपुण्डरीके वशीकृत्यचित्तं तत
ऊर्द्ध्वगामिन्या नाड्या भूमिजयक्रमेण भ्रुवोर्मध्ये प्राणमावेश्यस्थाप
यित्वा सम्यगप्रमत्तः सन्सएवं वुद्धिमान् योगीकविं पुराणमित्यादि
लक्षणं तंपरं पुरुषमुपैति प्रपद्यते दिव्यं द्योतनात्मकं १० ॥

आनन्दगिरिकृतटीका ।

इतश्च भगवदनुस्मरणं सफलत्वादनुष्ठेयमित्याह किञ्चेति कदा तद
नुस्मरणे प्रयत्नातिरेकोऽभ्यर्थ्यतेतत्राह प्रयाणकालइति कथं तदनु
स्मरणमित्युपकरणकलापमपेक्ष्यमाणंप्रत्याह मनसेति योनुस्मरेत्
स किमुपैति तत्राह सतमिति मरणकाले क्लेशवाहुल्येपि प्राचीना
भ्यासप्रवृद्धासादितवुद्धिवैभवोभगवन्तमनुस्मरन् यथासं तमेवदेहाभि
मानविग॰न्तरमुपागच्छतीत्यर्थः भगवदनुस्मरणस्य साधनं मनसै
वानुद्रष्टव्यमिति श्रुतमुपदिशन्नाचष्टे मनसेति तस्य चञ्चलत्वान्न
स्थैर्यमीश्वरे सिध्यति तत्कथं तेन तदनुस्मरणमित्याशंक्याह अ
चलेनेति ईश्वरानुस्मरणे प्रयत्नेन प्रवर्त्तितं विषयविमुखं तस्मि
न्नेवानुस्मरणयोग्यं पौनःपुन्येन प्रवृत्त्या निश्चलीकृतं तत्सलना
विकलं तेनेतिव्याचष्टे प्रचलनेति संप्रत्यनुस्मरणाधिकारिणं वि
शिनष्टि भक्त्येति परमेश्वरे परेण प्रेम्णासहितो विषयान्तरविमुखोनु
स्मर्त्तव्य इत्यर्थः योगवलमेवस्फारयति समाधिजेति योगः समाधिः
चित्तस्य विषयान्तरवृत्तिनिरोधेनपरस्मिन्नेव स्थापनं तस्य वलं सं

गी· टी· अ·

53

स्कारमथवा ध्येयैकाग्र्यकरणं तेन तत्रैव स्थैर्यमित्यर्थः चकारस्त्वविनम
क्ष्यमन्वाचष्टे तेन चेति यत्र क्वचन नाड्योत्क्रामन् यातीति तत्राह प्रक्षेपमि
ति चित्तं हि स्वभावतो विषयेषु व्यापृतं तेभ्यो विमुखीकृत्य हृदये पुण्ड
रीकाकारे परमात्मस्थाने यत्नतः स्थापनीयं अथ यदिदमस्मिन् ब्रह्म
पुरे इत्यादिश्रुतेस्तत्र चित्तं वशीकृत्य आदावनन्तरं कर्तव्यमुपदिशति
ततः इतिइडापिङ्गले दक्षिणोत्तरे नाड्यौ हृदयान्निःसृते निरुध्य तस्मादेव
हृदयाद्ग्राहरूर्ध्वगमनशीलया सुषुम्नयानाड्या हार्दं प्राणमानीय कण्ठ
बलबिन्दस्तनसदृशं मांसखण्डं प्रापय्य तेनाध्वना भ्रुवोर्मध्ये तमा
वेश्य अप्रमादवान् ब्रह्मरन्ध्राद्विनिःक्रम्य कविं पुराणमित्यादिवि
शेषणं परमपुरुषमुपगच्छतीत्यर्थः भूमिजयक्रमेणेत्यत्र भूम्यादी
नां पञ्चानां भूतानां जयो वशीकरणं तस्य तस्य भूतस्य स्वाधीनचेष्टा
वैशिष्ट्यं तद्द्वारेणेत्येतदुच्यते सत[illegible]मित्यादि व्याचष्टे स एवमिति १०

स्वामिकृतटीका

प्रयाणकालेऽन्तकाले भक्त्या युक्तो निश्चलेन मनसा योऽनुस्मरेत् मनोनै
श्चल्ये हेतुः योगबलेन च सम्यक् सुषुम्नामार्गेण भ्रुवोर्मध्ये प्राणमावेश्य
ति सतं पुरुषं द्योतनात्मकं प्राप्नोति [illegible] १० ॥

पैशाचभाष्यटीका

प्रयाणकाले मनसाचलेन चलनवर्जितेन भक्त्या च युक्तो योगबलेन चै
व योगस्य बलं योगबलं तेन भ्रुवोर्मध्ये प्राणमावेश्य व्यवस्थाप्य सम्यग
प्यशास्त्र सं तं परं ब्रह्मपुरुषमात्मानं दिव्यमुपैति १०

रामानुजभाष्यटीका

तमेवं भक्तमहरहरभ्यस्यमानभक्तियुक्तयोगबलेनारूढसंस्कारत
याचलेन मनसा प्रयाणकाले भ्रुवोर्मध्ये प्राणमावेश्य संस्थाप्य तत्रा
भ्रुवोर्मध्ये दिव्यं पुरुषं योऽनुस्मरेत्स तमेवोपैति तत्रैव याति तत्समानै
श्वर्यो भवतीत्यर्थः १० ॥

अभिनवगुप्तकृतटीका

प्रणवैनतत्रस्य मार्गीयोगोक्तं निरतःसन्नेवत्र्वाप्युपायं ... उपाच्यत्वंवेति
हृदयस्थितिः एवमनुस्मरेदिति ... [illegible] ...
... [illegible] ...
... भ्रुवोर्मध्ये इति प्राग्वत् १० ॥

परमार्थप्रपा टीका

प्रयाणकालेऽन्तकाले भक्त्यायुक्तः सन् तन्निष्ठीहितयोगबलेन अचलेन
स्थिरीकृतेन मनसा सम्यक् सुषुम्नाविवरेण भ्रुवोर्मध्ये प्राणमावेश्यानु
वै स्मरेत् स तं पुरुषं दिव्यमेति १० ॥

वनमाली टीका ॥

स्वभक्तस्य योगिनः प्रयाणकाले कर्तव्यमाह प्रयाणकाल इति प्रयाणका
लेऽन्तकाले अचलेनैकाग्रेण भगवदाकारातिरिक्तवृत्तिशून्येन मनसा श्रव
णादिवासितेन तं पुरुषं योऽनुस्मरेदित्यनुवर्तते कीदृशः भक्त्या भगवद्वि
षयकप्रेमप्रवाहेण युक्तो योगस्य चित्तसमाधेर्बलेन तज्जनितसंस्कारस
मूहेन व्युत्थानसंस्कारविरोधिना च युक्तः एवं प्रथमं हृदयपुण्डरीके वशी
ऊ कृत्य ततः ऊर्ध्वगामिन्या सुषुम्नानाड्या [illegible] गुरूपदिष्टमार्गेण क्रमे भूभिजय
ण भ्रुवोर्मध्ये आज्ञाचक्रे प्राणमावेश्य स्थापयित्वा सम्यगप्रमत्तो ब्रह्मरन्
ध्रादुत्क्रम्य स एवं तं कविं पुराणमित्यादिलक्षणं परं जगदुदयादिक
ारणं पुरुषं पूर्णगुणादिं द्योतनात्मकमुपैति प्राप्नोति १० ॥

ऊसमवैजयन्तीटीका ॥

किं कृत्वोपैतीत्यपेक्षायां योगप्रकारमाह प्रयाणकाल इति प्रयाणका
ले मृत्युसमये अचलेनैकाग्रेण मनसा प्राकृतविषयसंकल्परहितेन ।
भ्रुवोर्मध्ये आज्ञाचक्रे सम्यक् सावधानः सन् प्राणमूर्ध्वगतिकं वायु
मावेश्य संस्थाप्य भक्त्या श्रवणकीर्तनाद्यात्मिकया च पुनः योगबलेन ।
वा ... योगसामर्थ्येनैव युक्तो मद्भक्तः परं सर्वोत्कृष्टं दिव्यमानन्दात्मकं
पुरुषं विष्णुं मामुपैति गच्छति तन्न लोकस्थ ... वा भवतीत्यर्थः १०

मधुसूदनी टीका

कदा तदनुस्मरणे प्रयत्नातिरेकोऽपेक्ष्यते तदाह ॥
प्रयाणकालेऽन्तकाले अचलेनैकाग्रेण मनसा तं पुरुषं योऽनुस्मरेदित्यनुव
र्तते कीदृशः भक्त्या परमेश्वरविषयेण परमेण प्रेम्णा युक्तो योगस्य समाधे

१ गामिन्या सुषुम्नया नाड्या गुरूपदिष्टमार्गेण भूमिजयक्रमेण भ्रुवोर्मध्ये

गी· वलेन जनितसंस्कारसमूहेन व्युत्थानसंस्कारविरोधिना वक्रक्रमय व
टी·प्र· प्रथमं हृदयपुण्डरीके वशीकृत्य ततः ऊर्ध्वमाज्ञाचक्रे प्राणमावेश्य स्थाप
यित्वा सम्यगप्रमत्तो ब्रह्मरन्ध्राद्भुतक्रमसंपन्नमुपासकं तं कविं पुराणमनु
१मं शासितारमित्यादिलक्षणं परं पुरुषं दिव्यं द्योतनात्मकमुपैति प्रतिपद्यते १नान्य

54 [illegible] १०

सदानंदी टीका

अंतकाले चलेनांतःकरणेनानुसंस्मरेत् भगवद्विषयेणातिप्रेम्णायु
क्तः समाधिना समाधिजन्यसंस्कारसमूहेन पुनः पुनः आदौ हृ
दि वशीकृतमनतो भूमिजयक्रमात् सुषुम्नयोर्ध्वगामिन्या नाड्या गुर्वाचार्योक्त
मार्गेण स्थापयित्वात्मनः प्राणमाज्ञाचक्रे समाहितः ब्रह्मरंध्रात्समुत्क्र
म्योपासकस्तस्य चिंतितं कविं पुराणमित्यादिलक्षणं पुरुषं परं योना
नात्मकमीशानमद्भुतं प्रतिपद्यते १० ॥

नीलकंठी टीका ॥

उपासनायाः फलमाह प्रयाणेति प्रयाणकाले मनसाऽचलेन लक्ष्यांतर
वर्जितेन भक्त्या भगवति वासुदेवे आराध्यत्वबुद्ध्या युक्तो योगबलेन यो
गो मनःप्राणेंद्रियक्रियानिरोधो हृदयपुंडरीके तेषां वशीकरणमित्यर्थः
तस्यैव बलेन युक्तो भूमिकाजयक्रमेण प्रागेव मूलाधारादिब्रह्मरंध्रांत
स्थानेषु आरोहक्रमेण संचारितपवनोंतकाले भ्रुवोर्मध्ये आज्ञाचक्रे प्राण
मावेश्य सुषुम्नया नाड्या मूलाधारादुत्थापनपूर्वकं सम्यगतिवेश्य
स्थापयित्वा स्थापनप्रयोजनं तु अयं विस्मरणपूर्वकं दिव्यपुरुषचिंत
ने तत्त्वं मध्यात्मोपपत्तीयमानेवायोर्मनोमूर्च्छामापद्यतइति तस्याम
वस्थायां न भवतीत्ययमप्रयत्नस्तत्रैव संपाद्यस्तनोर्विराडिमां गोपर्वणा आ
मानं वयपुरुषस्य स्थानविशेषप्रापकस्य प्राप्यस्यानप्पवनस्मिन्नेव स्मर
णं कर्तव्यं न तदा सनावासितं मनोभ्रूमध्या योगिनामूर्ध्वया नाड्या उत्क्रमे
प्राणेभकेषु अवस्यो उरवयंरभिना प्रचलितेमतिलव्यष्टिकं मूलाप्रवेस
स्कार प्रावस्यायोगमाहात्म्याद्दिव्योपायुपेतमविरादिपवेदेवतामि

रभिमुखमानमूर्ध्वरोहं स्थानेभ्यस्तिवायुमानमसमानवेनचक्षु
षेणमेमध्यमानं तेनचयथाभिलषितं स्थानेप्रापितमात्मानंप
रपति नदिव्यमंत्रुवोर्मध्येसम्यक्प्राणमावेश्येति सएवंक्र
मयोगीकविंपुराणमित्यादिलक्षणं परंपुरुषंहिरण्यगर्भाख्यम
वैस्यभक्तज्ञानस्यज्ञानेनपिनारायणादिशब्दप्रतिपाद्यमुपैतिस
मीपंप्राप्नोति तल्लोकंप्राप्नोतीत्यर्थः नहिपौराणिकानामिवविरि
कानांमतेब्रह्मविष्णुरुद्रलोकानांपृथक्परिकल्पनास्ति किंतर्हि
सर्वेहिरण्यगर्भलोकाद्येसत्यलोकएवांतर्भवंति यथाहि सोपास
नकर्मोपजितिहिरण्यगर्भप्राप्तेनेतिबृहदारण्यकेनदृश्यादिवस्त
ष्टं १०॥

आनंदीटीका

प्राणाचारोप देशमाह॥ भक्तोमुपलक्षणात् भक्तिश्रद्धावीर्यस्मृतिसमाधिप्रज्ञाभिर्यो
गिनामुपायप्रत्ययस्य निर्वीजस्यसमाधेर्हेतुभूताभिः प्राप्तेययो
गबलेधारणादिरभ्यासः तेनयुक्तःअतएवाचलेनमनसावशीकृतः
नतप्राप्तेनीतेःस्वरवस्मरन्नेविनिर्जितइतिजयेनभ्रुवोर्मध्येसम्य
क्स्थापयानतया प्राणमावेश्यतेनपरंपुरुषंदिव्यमुपैति [illegible]
[illegible] ॥

रामकंठीटीका

कथंकीदृशोवाभ्रुवोर्मध्येप्राणसंस्थापनीयत्नेशाणमात्रेमाहतेस
मस्तध्यममार्गेणांतःस्थापयाथाः दिव्यवर्णंसर्वतेजोव्याप्तिरिक्तज्यो
तीरूपमनपवनमस्तः उपस्थान् अस्तानुस्मृत्यकथावनेमानंकी
दृशंसर्वस्यधातारमणुमस्मरेत् यदावस्थायांकविमित्यादिविशेषण
विशिष्टत्वादचिंत्यंपरमार्थिकत्वात्स्वभावत्वाच्छिन्नक्रियायाः।
कर्मत्वेनेतमप्रशक्यंयतः पुराणंकविमनादिंदृष्टारंनयाप्रशासितार
सर्वस्यचराचरसर्गस्यतेनतेननियमेननियन्तारमतःसर्वज्ञंसर्वक
र्तारंवेसुक्तंभवति तथासर्वरूपतोणाःस्वतःतेजस्त्वादित्यवर्णत्वा
यांसमतिशयेनाणम् इदमत्रतात्पर्यम् यःप्राणावस्थायामवयस्तांने
कविषयत्वात्स्मरणाख्यायाः विषयभूतस्तसंयोगरूपायामपराव

गी. स्थायां नियतदेशत्वेन नियताकारत्वेन च यो योगी यथोक्तक्रमेण स्म
टी. रति सततमेव पुरुषमुपैति तत्समीपं गच्छति योगक्रमस्यैव परमप
ग्र. दप्राप्तिफलाय यथा भवति तथा समस्तग्रन्थक्रमं प्रतिजानीते १०॥

लासिकी [illegible]टीका

तथान्येषामपि पुरुंस्थितानां मोदनमाप्य मुमुक्षुर्व वद्दित बुद्धीनां लक्षणीयां विदेहमुक्तिं वदर्शयति प्रयाणकाले इति

[illegible] पवे
विशिष्टत्वेन स्वगाभिन्नसत्तमात्मानं अचलेन विषयान्तरानाकृष्टेन
तत्रैव स्थितेनेति यावत् मनसात्ममननात्मकेनान्तःकरणेन प्रया
णकाले दुःखबहुले मरणसमये यो भक्त्या युक्तो योगी अत्र स्मरेत्त
त्वेशाक्त्यात् शक्तिलिङ् ततो योगबलेन समाधिबलेन प्राणमान्त
रेमारुतं भ्रुवोर्मध्ये सुषुम्णामार्गे सम्यग्यथावदावेश्यावेशयित्वा वर्त।
मानः स योगी विदेहमुक्तिं गमिष्यन्निर्वं यो तत्तात्मकं परं पुरुषं पुरु।
षोत्तममीश्वरमुपैति तादात्म्यमापद्यत इत्यर्थः तथा च श्रुतिः एष सं
प्रसादोस्माच्छरीरात्समुत्थाय परंज्योतिरूपसंपद्य स्वेन रूपेणसंपद्यते न
भ्रुवोरिति भ्रूग्रहणं सर्वतोमध्यवर्तित्वात् सुषुम्णानाडीउपलक्षणा
र्थम् तन्तुमध्ये विवक्षितम् यथाहृत्तमनुविधोत्थितेनविशुद्धिमत्र
[illegible] प्रतिजा
नीते १०॥

पंचोलीटीका

परमपुरुषार्थप्राप्तिनिमित्तश्रेयभावनायाः प्रकारमाह प्रयाणा।
कालेइति किंच स ज्ञानी योगी भक्त्याऽनन्यभक्त्या युक्तः प्रयाणका
ले मरणकाले अचलेन चलनवर्जितेन मनसा च युतः योगबलेन
युक्तः योगः समाधिः तस्य बलेन जनितसंस्कारजन्यचित्तस्थैर्यल
क्षणं योगबलं तेन च युक्तः भ्रुवोर्मध्ये प्राणमावेश्य हृदयपुण्डरीके
चित्तं वशीकृत्य तत ऊर्ध्वगामिन्या नाड्या भूमिजयक्रमेणाज्ञाभ्रुवोर्म
ध्ये प्राणं वायुं चावेश्य स्थापयित्वा सम्यक् अप्रमत्तः सन् कविं पुरा
णमित्यादिलक्षणं दिव्यं परं पुरुषमुपैति उपसमीपं गच्छति १०

55

भ्रुवोर्मध्ये प्राणमावेश्येति भ्रूशब्देनात्रहि वचनांतेन मार्दश्या
द्दुन्नकोट्योर्लक्ष्यते तथाचायमर्थः भ्रुवोर्मध्येयन्नुक्रोट्योरंतरे
जीवास्थानेइतियावत् प्राणं बलमावेश्यापविश्यकृत्वा सर्वप्राणे
नपुरणमाकृष्येतियावत् एतेनचभात्रुसंसुखाभिइवर्णंयो
तितं नादप्रास्येवहिमरणंश्रेयस्करमित्युक्तंप्राक् यःकर्मयो
गीप्रयाणकालेदेहोत्क्रांत्यासन्नतरेकाले एवंविधंपुरुषमनु
स्मरेदनुध्यायति किंविधमित्यपेक्षायांतं विशिनष्टिकविमि
ति कविःक्रांतदर्शीत्यतएवोक्तं वेदाहंसमतीतानिवर्तमा
नानिचार्जुन भविष्याणिचभूतानिमांतुवेदनकश्चनेति पुरा
णमनादितं अनुशासितारं यथास्वंकर्माणिविधेयत्वेनानतमा
रं अथवानियंतारंवक्ष्यतिहि ईश्वरःसर्वभूतानां हृद्देशेर्जुनतिष्ठ
ति भ्रामयन्सर्वभूतानियंत्रारूढानिमाययेति तर्हि कथंनोप
लभ्यंतइत्यतआह अणोःसूक्ष्मादणीयांसमतिसूक्ष्मं स्थूलदर्शा
नयासुदुर्दर्शमितिभावः तथा सर्वस्यजगतोधातारंधारयितारं
पोषयितारंच तथा अचिंत्यमनोविदूरंरूपमस्येत्यचिंत्यरूपं
यदिमनसोनविषयंतत्कथमिंद्रियविषयंस्यात् इतिचक्षुरादि
भिरनुपलभ्यस्वरूपमित्यर्थः तथा आदित्यवर्णं आदित्यस्येव
वर्णोयस्यतंसूर्यवत्प्रकाशस्वरूपमित्यर्थः तथातमसः प्रथमा
ध्यायप्रतिपादितस्वरूपस्यमोहस्य तद्धातिलक्षणात् मोहाविष्ट
स्यपरत्वात् दूरेवर्तमानंमोहाविष्टमनस्कैरसाक्षात्कार्यमित्य
र्थः यद्वा सूर्योपमत्वेनमोहापनोदकमित्यर्थः ९ ।।

मधुभाष्य

विशेषतः प्रयाणकालइति वायुजयादिरहितानामपिज्ञान
भक्तिवैराग्यादिसंपूर्णानांभवत्येवमुक्तिः तद्धतं जीवब्रह्मना

यसंपूर्णानामपितिष्ठुरणानांतद्बलात्कथंविद्रवतीतिविशेषः
उक्तंचभागवते यानेननतेदेवकृपाम्तथायाः प्रहृष्टभक्त्यावि
प्रदाप्यायाये वैराग्यसारंप्रतिलभ्यबोधंयथांजसाम्वाष्टव
कुंठधिष्ण्यम् तथापरेचात्मसमाधियोगबलेनजित्वाप्रकृ
तिंबलिष्टं त्वामेवधीराःपुरुषंविशंतितेषांश्रमःस्यान्न
तुसेवयातइति येनतन्नाविनालोकेपकोतितंसमाश्रि
ताः एतदभ्यधिकंतेषांनतेनःप्रविशंत्युत्ततिच मोक्षधर्मे
संपूर्णानांभवेन्मोक्षोविरक्तिज्ञानभक्तिभिः नियमेनतथा
पीरजयादियुतयोगिनां वषपत्वात्मनसत्वीषस्तूवंमथा
प्यनेधुवमितिचव्यासयोगे तदेवसंध्येयंप्रपंचयति १०॥

भाष्यं अनुवाद टीका

प्रपञ्च सहित प्रकृति को भिन्न करिके जोस्थित है ऐसे पुरुष को भ
क्तियुक्त जो पुरुष विक्षेप रहित निश्चल मन से आसन्न काल मे धारा
वाहिक चित्तवृत्ति से स्मरण करै है उस के समरण विषयक मन की
स्थिरता कारण यही है कि सम्पूर्ण योग बलसे सुषुम्नामार्गक्रम से
उस की प्राणवायु भ्रू मध्य मे प्रविष्ट होती है ऐसा पुरुष परमात्मा रू
प प्रकाशात्मक पुरुष को प्राप्त होताहै १० ॥

चौपई

अंत समयमें दृढ़ कर मनसें भक्तियुक्त अथवा योगहिं बलसें
भृकुटि मध्य प्राण स्थित कर जोई तेहिं परं पुरुष दिव्यहिं आ वे लहै
सोई १० ॥

57

यदक्षरं वेदविदो वदन्ति विशन्ति यद्यतयो वीतरा
गाः यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण
प्रवक्ष्ये ॥ ११ ॥

शांकरभाष्यटीका

योगमार्गानुगमनेनैव ब्रह्मविद्यामन्तरेणापि ब्रह्मापत्तिरस्त्येवं प्रागि
दमुच्यते पुनरपि वक्ष्यमाणेनोपायेन प्रतिपित्सितस्य ब्रह्मणो वेद
विदुक्त्यादिविशेषणविशेष्यस्याभिधानं करोति भगवान् यदक्षरमिति
यदक्षरं न क्षरतीति अक्षरं अविनाशि वेदविदो वेदार्थज्ञा वदन्ति तद्वा एत
दक्षरं गार्गि ब्राह्मणा अभिवदन्तीति श्रुतेः सर्वविशेषनिवर्तकत्वेनाभिवद
न्त्य स्थूलमनण्वित्यादि किञ्च विशन्ति प्रविशन्ति सम्यग्दर्शनप्राप्तौ स
त्यां यद्यतयो यतनशीलाः सन्न्यासिनो वीतरागाः विगतो रागो येभ्यस्ते
वीतरागाः यच्चाक्षरमिच्छन्तो ज्ञातुमिति वाक्यशेषः ब्रह्मचर्यं गुरौ
चरन्तीति तत्ते पदं यदक्षराख्यं ब्रह्माख्यं पदं पदनीयं ते तुभ्यं संग्रहेण
संग्रहः संक्षेपः तेन संक्षेपेण प्रवक्ष्ये कथयिष्यामि स यो ह तद्भगवन् म
नुष्येषु प्रायणान्तमोङ्कारमभिध्यायीत कतमं वाव स तेन लोकं जय
तीति तस्मै स होवाच एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोङ्कार
इत्युपक्रम्य यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषम
भिध्यायीत प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते अप्रमत्तेन
वेद्धव्यं शरवत्तन्मयो भवेदित्यादिना वचनेन अन्यत्र धर्मादन्यत्रा
धर्मादित्युपक्रम्य सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च
यद्वदन्ति यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीम्योमि
त्येतदित्यादिभिश्च वचनैः परस्य ब्रह्मणो वाचकरूपेण प्रतिमावत्
प्रतीकरूपेण च परब्रह्मप्रतिपत्तिसाधनत्वेन मन्दमध्यमबुद्धीनां वि
वक्षितस्योङ्कारस्योपासनं कालान्तरमुक्तिफलमुक्तं यत्तदेवेहापि अ
पिहितं कविं पुराणमनुशासितारं यदक्षरं वेदविदो वदन्तीति चोपन्यस्त ८
स्य च परस्य ब्रह्मणः पूर्वोक्तरूपेण प्रतिपत्त्युपायभूतस्योङ्कारस्य का
लान्तरमुक्तिफलमुपासनं योगधारणासहितं वक्तव्यं ॥ ११ ॥

प्र· टी· अ·

58

येनकेनचिन्मंत्रादिना ध्यानकाले भगवदनुस्मरणे आशे सत्यभिध्यान
त्वेन नियन्तृस्वरूपत्वेन प्रकृतपरमपुरुषस्य त्रैविद्यवृद्धप्रसिद्धा प्रा
माणिकत्वमाह पुनरपीति उपायोवक्ष्यमाणओङ्कारः अविषये प्रती
चिब्रह्मणि वेदार्थविदामपि कथं वचनमित्याशंक्याविषयत्वमित्यता
वत्तेवेति मत्वा श्रुतिमुदाहरति नेदेति तथापि तस्मिन्नविषये सर्ववि
शेषशून्ये वचनमनुचितमित्याशंक्याह सर्वेति न केवलं विद्वदनुभा
वसिद्धं यथोक्तं ब्रह्म किन्तु मंत्रोपलभ्यतया मुक्तानामपि प्रसिद्धमि
त्याह किञ्चेति केषां पुनः सन्न्यासिनां तदाह वीतरागा इति ज्ञानार्थं
ब्रह्मचर्यविधानादपि ब्रह्म ज्ञेयत्वेन प्रसिद्धमित्याह यदिति कथं न
हि यथोक्तं ब्रह्म मम ज्ञातुं शक्यमित्याकुलितचेतसमर्जुनं प्रत्या
ह तत्तेपदमिति वक्ष्यमाणेनोपायेनेत्युक्तमर्थं स्फुटीकुर्वन्नोङ्कारद्वारा
ब्रह्मोपासने श्रुत्यकमनुक्रामति सयोहेति सत्यकामेनाभिध्यानफ
ले जिज्ञासुना भगवन्निति पिप्पलादः सम्बोध्याभिमुखीक्रियते नि
यातो न प्रसिद्धमर्थमवद्योतयन्तावभिध्यानस्य फलत्वेन कर्तव्यत्व
मावेदयतः मनुष्येषु मध्ये सयोपिकृतोमनुष्यत्वप्रसिद्धमभिध्याने
यथा सिध्यति तथा सर्ववेदसारभूतमोङ्कारमाभिमुख्येन ध्यायी
त तद्वाभिध्यानमाप्रायणादिति न्यायेन मरणान्तमनुष्ठेयं सचैवम
नुतिष्ठन् प्रकृतेनाभिध्यानेन लोकानां जेतव्यानां बहुत्वात् कतमं
लोकं जयतीति प्रश्ने एवं पृष्टवते सत्यकामाय पिप्पलादनामा किलाऽ
चार्यः प्रतिवचनं प्रोवाच तत्र प्रथमं अभिध्येयमोङ्कारं परापरब्रह्म
त्वेन महीकरोति एतद्वा इति त्रिमात्रेणाकारोकारमकारात्मकेने
ति यावत् योभिध्यायीत तमेव यथाभिध्याने पुरुषमधिगच्छती
त्यादि वचनेनोपासनमोङ्कारस्योक्तमित्यर्थः प्रश्नश्रुतिवत् कठव
ल्ली च तत्रैवार्थे प्रवृत्तेत्याह अन्यत्रेति अक्षवचनेनोपनिषदां व्या
ख्यानेन च कर्मश्रुतीनां परस्मिन्नात्मनि पर्य्यवसानं दर्शयति सर्व इ
ति तपसामपि सर्वेषां चित्तशुद्धिद्वारा तत्रैव पर्य्यवसानमित्याह त
पांसीति तस्यैव च ज्ञानार्थमङ्गं ब्रह्मचर्य्यं तत्र तत्र विहितमित्याह

यदिच्छन्त इति तस्य पदनीयस्य ब्रह्मणः संक्षेपेण कथमोंकारद्वारक
मिति कथयति ओमित्येतदिति ओमित्येतदिति उदाहृत वचनानोक्ता
र्थं दर्शयति परस्येति तस्य वाचकरूपेण वा तस्यैव प्रतीकरूपेण।
वा विवक्षितस्योङ्कारस्योपासने यथोक्तैर्धर्मैरुक्तमिति सम्बन्धः ननु प
रस्मिन् ब्रह्मणि तत्त्वमस्यादिवाक्यादेव प्रतिपत्तिरधिकारिणो भवि
ष्यति किमित्युपासनमोङ्कारस्योपन्यस्यते तत्राह यदिति यद्यपि विशि
ष्टस्याधिकारिणो विनैवोपासनमुपनिषद्भ्यो ब्रह्मणि प्रतिपत्तिरुत्प
द्यते तथापि मन्दानां मध्यमानाञ्च नहि देहत्वेनोंकारो विवक्षितः
तदुपासने ब्रह्मदृष्ट्या श्रुतिभिरुपदिष्टमित्यर्थः तस्य क्रममुक्ति
फलत्वात् तदनुष्ठेयत्वं सूचयति कालान्तरेति भवत्येवं स्तुमीनां प्रवृत्तिस्ता
वता प्रकृते किमायातमित्याशंक्याह उक्तं यदिति तदेवहापि वक्ष्य
मित्युत्तरेण सम्बन्धः उपासनमेवोपास्योपन्यासद्वारा स्फारयति
कविमित्यादिना एवंचोक्तरूपेणाभिधानत्वेन प्रतीकत्वेन चेत्यर्थः
श्रातस्योपासनस्यानुष्ठानस्य सोपस्करत्वं संगिरते योगेति ॥ ॥

केवलाभ्यासयोगा स्वामिकृतटीका दपिप्रणवाधारमभ्यासमंतरंगविधित्सुः प्रतिजानीते ॥

यदक्षरं वेदार्थज्ञा वदंति एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्र
मसौ विधृतौ तिष्ठत इत्यादिश्रुतेः वीता विगता रागा येभ्यस्ते यतयः वीतरागा
ब प्रयत्नवंतो यद्विशंति यत्तान्नमिच्छंतो गुरुकुले ब्रह्मचर्यं चरंति तत्ते प
दं तुभ्यं पद्यते गम्यते इति पदं श्राव्यं संक्षेपतः प्रवक्ष्ये तत्प्राप्त्युपायं
कथयिष्यामीत्यर्थः ॥

पिशाचभाष्यटीका

यदक्षरमिति अक्षरं न क्षरतीत्यक्षरं एतस्य वा अक्षरस्य प्रशासने
गार्गि इति श्रुतेः वेदविदो वदंति विशंति प्रविशंति ब्रह्मचर्यं ब्रह्म
चारिव्रतं चरंतः अनुतिष्ठंति संग्रहेण संक्षेपेण प्रवक्ष्ये ॥

रामानुजभाष्यटीका

गी॰
टी॰ अ

59

अथ कैवल्यार्थिनां स्मरणप्रकारमाह यदक्षरमिति यदक्षरं अ
स्थूलत्वादिगुणं वेदविदो वदंति वीतरागाः यतयो यदक्षरं वि
शंति यदक्षरं प्राप्तुमिच्छंतो ब्रह्मचर्यं चरंति तत्ते पदं संग्रहेण प्रव
क्ष्ये पद्यते गम्यतेऽनेनेति पदं तन्निखिलवेदांतवेद्यं मंतव्यमुपास
नं यथोपास्यं तत्तथा संक्षेपेण प्रवक्ष्यामीत्यर्थः ॥ ॥

अभिनवगुप्तकृतटीका स्पष्टार्थ

परमार्थप्रपा टीका

अथ प्राप्यमेनं प्राप्यवस्तु नवकं प्रतिजानीते यदक्षरमिति वेदविदो
वेदार्थज्ञा याज्ञवल्क्यादयः यदक्षरमिति वदंति न क्षरतीत्यक्षरं अस्थू
लमनण्वह्रस्वमित्यादिश्रुत्या प्ररूपितं तथा यद्वीतरागा विरागवंतो
यतयः प्रयत्नशीलाः विशंति आत्माकारतया तिष्ठंति तथा यदिच्छंतो
ज्ञातुमिच्छंतो गुरुकुले ब्रह्मचर्यं चरंति तत्ते तुभ्यं पदं पद्यते गम्यते प्रा
प्यतेऽनेनेति पदं संग्रहेण संक्षेपेण प्रवक्ष्ये ॥ ॥

वनमाली टीका

ध्यानकाले येनकेनचिन्मंत्रेणानुस्मरणे प्राप्ते सर्वे वेदा यत्पदमामनं
ति तपांसि सर्वाणि च यद्वदंति यदिच्छंतो ब्रह्मचर्यं चरंति तत्ते पदं संग्र
हेण ब्रवीम्योमित्येतदित्यादिश्रुतिप्रतिपादितत्वेन प्रणवेनैवाभि
धानेन तदनुस्मरणं कार्यं नान्यमंत्रेणेति नियमाय प्रक्रमते यदि
ति यदक्षरमुत्पत्त्यादिषड्विकारशून्यं सदेकाकारं ब्रह्म वेदविदो व
दंति एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदंत्यस्थूलमनण्वह्रस्व अ५
मदीर्घमित्यादिवचनैरितरजीवतः स्थूलत्वादिधर्मनिषेधपूर्वया
एतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चेत्याकाशादिसर्वजग
दाधारतया अस्याक्षरस्य प्रशासने सूर्याचंद्रमसौ विधृतौ तिष्ठत
इति सूर्यादिनियामकतया च वदंति न केवलं प्रमाणकुशलैस्त
रेव ज्ञातं किं तु मुक्तैः प्राप्यतयानुभूतमपीत्याह विशंति यद्यत
यो यत्नशीलाः संन्यासिनः वीतरागा इहामुत्रभोगनिस्पृहाः अशे
षाविद्यानिवृत्तिपूर्वकं प्राप्नुवंति प्रवेशः खगादीनां हत्ताद्दिषि

रसंश्लेषविशेषः स एव सायुज्यमद्वा यो मोक्षः सह भुनक्तीति सयुक्स
युजो भावः सायुज्यमिति श्रुत्यतेः अथ पुनर्मे संजयंति ब्रह्मणः सायु
ज्यं गच्छतीत्यादिश्रुत्यास्तामप्यनूपमेव सायुज्यमुक्तेन तस्य तद्रूपैक्यं यदे
वानामेव महिमानं गत्वादित्यस्य सायुज्यं गच्छति पितॄणामेव महि
मानं गत्वा चंद्रमसः सायुज्यं गच्छति अग्नेर्वायोरादित्यस्य सायुज्यानि
गच्छतीत्यादिश्रुति च सायुज्यशब्दस्य सांधर्म्यं वाच कत्वदर्शनात् म
केः श्राद्धपरेणापि जीवानामभेदानंगीकारादेकत्रैक्यं प्राप्तानामन्य
त्र गमनासंभवाच्च सायुज्यं सांधर्म्यं सारूप्यं समानरूपत्वं चतुर्भुजत्वा
दिना सामीप्यं विग्रहविशेषनिकटस्थत्वं सालोक्यं समानलोकस्थ
त्वमिति चतुर्धा मुक्तिः तत्र केषांचिच्चतस्रोपि केषांचित्तिस्रः केषां
चिद्द्वे केषांचिदेकैव उत्कर्षेणाल्पमहाचटानामिव [illegible]
[illegible] सर्वेषां स्वर्गोत्वादिः शेषाद्विधा दिव्हतैश्व
ताद्रूप्यादि स्वर्गेणेतराणामपि तेषां मेच्छिको विग्रहः संकल्पादेव तत्कु
नेरिति श्रुतत्वात् यदि पितृलोककामो भवति संकल्पादेवास्य पितरः
समुत्तिष्ठंतइत्यादिश्रुतेश्च अथय इहात्मानमनुविद्य व्रजंति तप
तेषां सत्यान्कामांस्तेषां सर्वेषु लोकेषु कामचारो भवतीति श्रुत्या
मुक्तानामिच्छातः कार्यान्वयेन तद्धर्मस्य हेतः परमेभिधानादिति
सूत्रेण सर्वकार्याणां प्रलये स्वाधीनेन स्वामि तावन्तमेव तेन सहास्त्र
नस्तत्र मुखात्परं गच्छतीत्यर्थः केनेसोश्नुते सर्वान्कामान् सह ब्रह्मणा
विपश्चितेति श्रुत्या च मुक्तो भोगोक्तेः स एतान् ब्रह्म गमयतीति श्रुत्या
चतुर्मुखस्य मोक्षप्रापकत्वोक्तेः ये च मुक्ता भवंतीह नराभरतसत्तम
तेषां लक्षणमेतत् यच्छ्वेतद्वीपनिवासिनां तत्र नारायणपरा मान
वाश्चंद्रवर्चसः अनिंद्रिया अनाहारा अनिष्पंदाः सुगंधिनः एकांतिनस्ता
लेपुरुषाः श्वेतद्वीपनिवासिनः तत्र च पुरुषाः सर्वे पंचेंद्रियविवर्जि
ताः प्रतिबुद्धाश्च ते सर्वे भक्ताश्च पुरुषोत्तमं अर्चयंति सदा देवं ते सार्धं र
मते च सः न तत्राभ्यधिकः कश्चित्सर्वे ते समतेजसः कृतांजलिपुटा
श्लिष्टा नमस्यंत्येव वादिन इति मोक्षधर्मे मुक्तानां प्राकृतेंद्रियाद्यभावादि
त्या प्राकृतदेहेंद्रियादिकं वोक्त न केवलं मुक्तेभ्यः साधकानामपि स

गी॰ देशयासस्तदर्थं इत्याह यदित्यक्षरं नैयत्नाने नैष्ठिकाब्रह्मचर्यं गुरुकुलवा-
टी॰ प्र॰ सादिनियमं चरंति यावज्जीवं तदक्षराख्यं पदं पदनीयं प्राप्यं ते तुभ्यं सं-
ग्रहेण संक्षेपेण प्रवक्ष्ये वेदविदो इत्यादिना ब्रह्मणः सर्वशब्दावाच्यत्वं श्रुत्वं ततो- पा
निरस्ताः न च यतो वाचो निवर्तंत इत्यादिश्रुत्या वाच्यत्वं निषिद्धं तस्याः
साकल्येनावाच्यत्वपरत्वात् यतस्तनेनैव वाच्यत्वाच्च न च लक्ष्यमे
व स्यात् ब्रह्मात्र तदुपासनाविषयीभूतं तेमंदाधिकारिणाम स्थूलं स्व
रूपमक्षमितिवाच्यं अत्रोपासनबोधकपदाभावात् [illegible] प्राप्य
त्वबोधकपदसत्वाच्च सर्वशब्दवाच्यत्वेन प्रणवास्थत्वादस्य भवाच्च
वेदस्य सर्वैरहमेव वेद्य इत्युक्त्वा प्रणवकारेण सर्वेश्वरस्य देनेन गुणात्मत्वं वा
सुदेवभिन्नस्य सर्ववेदवेद्यतायाः निराकरिष्यमाणत्वाच्च ॥ ॥

ऊसम वैजयन्ती टीका

एवमेष स्वर्थार्थिनो प्राप्य प्रकारमुक्त्वेदानीं केवल्यार्थिनां प्राप्यं तत्प्रकार
माह यदक्षरमिति वेदविदो वदन्ति सहस्यान्माङ्गा सोपनिषदा न विदंति
गुरुमुखोपध्याश्रुतमर्थं याथात्म्येन जानन्ति ते वेदविदः न तु पदक्रमादि
पाठमात्रविदः यद्ब्रह्माक्षरं वाचकं प्रणवस्य वाक्यत्वं वस्य प्र शासने गार्गि सू
र्याचंद्रमसौ विधृतौ तिष्ठतः अस्थूलमनणुमह्रस्वमदीर्घमलोहितमच्छाय
मित्यादिश्रुति प्रतिपाद्यगुणविशिष्टं वदंति कथयंति वीतरागाः विशेष
णेनागतो रागः प्राकृतविषयस्नेहो येभ्यस्ते न यायतन्यः प्राप्यवस्तु प्रा
प्तये यत्नशीलाः यद्ब्रह्माभूतं ब्रह्म विशंति प्राप्नुवंति यद्भयविधेयवाच्य
वाचकरूपं ब्रह्मज्ञातुमिच्छंतो नैष्ठिकाब्रह्मचारिणो ब्रह्मचर्यं ब्रह्मावा
प्त्युपायं गुरुकुलवासादिलक्षणं वरति आचरणं कुर्वंति तेनेन्यतस्य
दं पद्यते गम्यतेऽनेनेति पदं प्राप्यं सर्ववेदवेद्यं मनस्वरूपं संग्रहेण संक्षे
पेण यद्वा सम्यगागच्छंतेनेत त्वमनेनेति निरुक्तेः संग्रहः साधनं तेन सह
प्रवक्ष्ये यथा नायासेन तत्त्वं विधास्यथा ह प्रकर्षेणावक्ष्यामीत्यर्थः ॥

इदानीं येन केन विदभि यत्पदमामनंति तं पासि मधुसूदनी टीका यानेन ध्यानकाले भगवदनुस्मरणे प्राप्ते सर्वे वेदा सर्वाणि च यदहं इति यदिच्छंतो ब्रह्मचर्यं चरंति तत्ते पदं+

यदक्षरमविनाशि ॐकाराख्यं ब्रह्म वेदविदो वदंति एतद्वै तदक्षरं गार्गि
ब्राह्मणा अभिवदंत्यस्थूलमनण्वऽह्रस्वमदीर्घमित्यादिवचनैः सर्ववि
शेषनिवर्तनेन प्रतिपादयंति न केवलं प्रमाणकुशलैरेव प्रतिपन्नं किं

+ संग्रहेण वक्ष्यामीत्यतदित्यादिश्रुतिप्रतिपादितेन प्रणवेनेवाभिधानेन तदनुस्मरणं कर्तव्यं नान्येन मंत्रादिनेति नियंतुमुपक्रमते ॥+

तमुक्तोपायस्यानयातैरप्यनुभूतमित्याह विशंति स्वरूपतयासम्यग्दर्शनेनय
दक्षरंयतयोयतनशीलाःसंन्यासिनोवीतरागानिस्पृहाः नकेवलंसिद्धैरनु
भूतंसाधकानामपिसर्वोपिप्रयासस्तदर्थइत्याह यदिच्छंतोनैष्ठिका
ब्रह्मचारिणोब्रह्मचर्यंगुरुकुलवासादितपश्चरंति यावज्जीवंतदक्षराख्यं
पदंपदनीयंतत्तेतुभ्यंसंग्रहेणसंक्षेपेणाहंप्रवक्ष्ये प्रकर्षेणकथयिष्यामि
यथातवबोधोभवतितथा अतःतदक्षरंकथंमयाज्ञेयमित्याकुलोमा
भूरित्यभिप्रायः अत्रचपरस्यब्रह्मणोवाचकरूपेणप्रतिमा वत्प्रती
मात्रे करूपेणचयःपुनरेतत्त्रिगुणमित्यनेनैवाक्षरेणपरंपुरुषमभिध्या
यीतसतमधिगच्छतीत्यादिवक्ष्यतेभेदमध्यमबुद्धीनांक्रममुक्तिफल
कमुपासनमुक्तं तदेवेहापिविवक्षितंभगवताऽतोयमथावर्णसहि
तमोंकारोपासनंतत्फलंस्वस्वरूपंततोपुनरावृत्तिलक्षणमार्गद्वयंत्वर्थे
जातमुच्यते यावदध्यायसमाप्तिः [illegible]
[illegible] ॥ ॥

महानंदी टीका ॥

प्रणवेनाभिधानेनवेदोक्तेनप्रधानतः भगवत्स्मरणंकार्यमित्याहभग
नाय वान्स्वयं अविशियदोंकाराभिधंब्रह्मवदंतिच वेदार्थज्ञाभिदाभ्रांतित्यक्ता
मानविदोबुधाः यत्स्वात्मैकविधयाधीरानिस्पृहायतयःविशंतिमुमु
क्षुपुरुषैःप्राप्यत्वेनमतंपदं यदिच्छंतःपरिज्ञानेनैष्ठिकाब्रह्मचारिणःब्र
ह्मचर्यंगुरोरंतेनिवासादिचरंतिच संक्षेपेणप्रवक्ष्यामितत्तुभ्यंपदमेश्व
रेकथंतदक्षरंज्ञेयंमाभूरित्याकुलस्त्वतः ॥ ॥

नीलकंठी टीका ॥

भ्रुवोर्मध्येप्राणमावेश्यसम्यक्केनकिंकृत्वाकर्तव्यंतत्कृत्वाचकिंकर्तव्यमि
सेनद्वयंवदिष्यन्नत्रप्रतीकत्वेनचिंत्यंप्रणवंनामवाच्यवाचकयोरभेदविव
क्षयास्तौति यदक्षरंप्रणवाख्यंवाचकंवेदविदोवेदार्थविदोवदंति यद्वाय
दक्षरंब्रह्मतद्वाच्यं यतेहैनदक्षरंगार्गिब्राह्मणाअभिवदंत्यस्थूलमनण्व
गः ह्रस्वमदीर्घमित्येवंलक्षणंवावेदविदउपनिषद्विदोवदंति यद्वायतयोवि
शंतिब्रह्मप्रतीकत्वेनशरणीकुर्वंति यत्तेसम्यग्दर्शनेनसतिसरित्सागर

न्यायेन यत्नविशेषेण नियतय: यदक्षरमिच्छंतो ब्रह्मचर्यं चरंतीति य।
तद्द्वयेऽपि समाने तत्तेपदं वर्णात्मकं पदनीयं वाप्यान विष्णो:परमं
पदं संग्रहेण प्रवक्ष्ये अर्थं च वाच्यवाचकयोरभेद:श्रुतिकारया गम्यते।
अन्यत्र धर्मादन्यत्राधर्मादिति सर्वधर्मातीतब्रह्मप्रकृत्य सर्वे वेदा यत्पद
मामनंति तपांसि सर्वाणि च यद्वदंति यदिच्छंतो ब्रह्मचर्यं चरंति तत्ते पदं
संग्रहेण ब्रवीम्योमित्येतदित्योंकारेणोपसंहारात्तस्यालंबप्रतीकाभा
वात् ओंकारप्रतीकत्वेन प्रकल्प्य तद्द्वारा शुद्धं शबलं वा ब्रह्म प्रतिपत्त
व्यं तथा च श्रुत्यंतरे एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोंकारस्त
पक्रम्य तस्मादेवं विद्वानेतेनैवायतनेनैकतरमन्वेतीति इहं आयतनं
सालयामवत् प्रतीकं तेन ॥ ११ ॥

अस्य पदस्य दुस्साध्यत्वेन दुरधिग **आनंदीटीका** मत्वात् पुनः पुनरुपायं दर्शयति ॥

सम्यग्गृह्यते निश्चीयते नेनेति संग्रहउपाय: सततसततामाभ्यासरू
भिनवद्यमयादा: ११ ॥

रामकंठीटीका

तत्पदं योगिभि:प्राप्यं धाम संग्रहेण संक्षेपेण ते तुभ्यमभिधास्ये किं
तदोमक्षरं वेदविदो वेदार्थविशारदा अक्षरं नित्यं विद्वांसो वदंति प्रवचने
न प्रतिपादयंति यच्च यतयोऽत्यंतनैकनिष्ठा विशंति समाप्नुयंति यदि
च्छंत:श्रमकामा ब्रह्मचर्यं ब्रह्मणो वेदस्याध्ययनश्रवणादिना चर्यमा
चारं चरंति समाश्रयंते के चिदिच्छंतीति पाठं पठंत्यवमेतद्यावदंतन
यथावेदविदूक्षणेन रहस्यावान प्रख्या:प्रतिपादिता: यतस्तेषां स्वोक्त
क्रियानुष्ठाननिष्ठाता: सततमदं विदंति जानंति प्राप्यत्वेनाध्यवस
ति यतयस्तु कृतकृत्यत्वाद्विशंति तत्प्रख्या:प्रतिपादिता: यतस्तेषा
स्वोक्तक्रियानुष्ठाननिष्ठाता: सततमदं विदंति जानंति प्राप्यत्वेना।
ध्यवस्यंति यतयस्तु नारान्यमा प्रवंति ब्रह्मचारिणस्तु तत्प्राप्तिका।
मा:स्वाध्यायपरा स्नातकार्यं वा धार्दिनिष्ठा व्रतं विशेषं भजंते इति यथा प्रत्ता ति
तमभिधानमाह ११ ॥

लाभिकी [illegible]टीका

अथास्यैवात्मनो दुर्लभता व्यापनपूर्वं प्राप्त्युपायं सम्यग्वक्तुं प्रतिजानीते ॥

वेदविदोवेदांतज्ञायमदमक्षरंवेयोपरागेपिस्वभावचलनरहितं
वदन्ति तथाचश्रुतिः तद्वापतदक्षरंगार्गिब्राह्मणाअभिवदन्तीति
तथावीतरागावैराग्यवन्तोयोगिनोयतयः प्रयत्नशीलाआत्माका
रप्रत्ययाहृत्तिंनित्यमभ्यस्यन्तः यमक्षरंविशन्तिसम्यग्विशन्तितदभेद
मुपलभन्ते तथायमक्षरमिच्छन्तः पुरुषायमादिष्टंवेविनहृत्तिनिरो
धंचरन्तिकुर्वन्ति ब्रह्मचर्ययमादीनांचित्तहृत्तिनिरोधलक्षणयो
गांगानामुपलक्षणम् तत्पदंपद्यतेगम्यतेइतिपदंप्राप्यंधामसंग्र
हेणसंक्षेपेण अथवासम्यगग्रहीतेनिश्चीयतेनेनेतिसंग्रहउपाय
स्तेनाभियास्ये [illegible] ११ ॥

पंचोलीटीका

पुराणपिवक्ष्यमाणेनोपायेनप्रतिपित्सितस्यब्रह्मणोविशेषणा
णांतरविशिष्टस्वरूपंनिरूपयति यदक्षरमिति वेदविदोवेदार्थ
ज्ञाः यदक्षरमविनाशितंवदंतिविगतरागाः संन्यासिनोयतयः
यदक्षरंविशन्तियज्ज्ञातव्यंज्ञातुमिच्छन्तः गुरौब्रह्मचर्यंचरंति त
दक्षरंपदंप्राप्यतेनेनतंसंग्रहेणप्रवक्ष्येकथयिष्यामि ११ ॥

रणवीरसमिद्धोधिनी ॥

अथयथावर्णाश्रमनिष्ठकर्मयोगएव परमपदप्राप्तेरुपायोय
थाभवति तथा सम्यक्तंविदिष्यवक्तुंप्रतिजानीतेयदक्षरमिति
अव्यक्तादीनंप्रत्येवोपदेशस्यावश्यत्वात् अत्यनेनक्षत्रियजातिविशि
ष्टत्वेनगर्भीकृतवताक्षत्रियजातेस्तवतक्रमसंन्यासः परमपद
प्राप्तावुचित उपायः क्षत्रियान्प्रतितस्याधर्मत्वात् इतिज्ञापयति
तथाचायमर्थः अक्षरंतेवेयंक्षत्रियजातये क्षत्रियजातेरूदिष्यपति
यावत् पदं पद्यतेप्राप्यते यदितिव्युत्पत्त्यापदंव्यवोसतिब्राह्मणस्या
नन्तस्यक्षत्रियक्षात्रिति कोब्राह्मणप्राप्यंधामसंग्रहेणसंक्षेपेण प्र
थवसमंताटहणति केपादिषुपरस्पदंभटायथोति सम्यक्तात्तुदः पा

ग्रुजिघांसया गुर्वादीनां परिग्रहो यद्वेति संग्रादो गुह्यं तेन गुह्येनैव प्र
वक्ष्ये कथयिष्यामि तस्य च पदस्य गुह्यकरणकं कथनमसंगतं
मगुहुद्भूपोपायोपेयताकथने पर्यवस्यति. तथा च गुह्यमयेनैवो
पायेनोपेयं कथयिष्यामि तत्त्वाम्नुपायभूतं गुह्यप्रकारमुपायांत
रादतिस्वकरं वक्ष्यामीति यावत्. एतेन च पूर्वं प्रतिपाद्य प्रायेण
प्रोक्तस्य गुह्यकरणक परमपदकर्मकलाभस्य पुनरुक्तिदोषइ
ति निरस्तं तत्प्रकारकथनस्याप्रपद्यमानत्वात्. पूर्वं विस्तरस्य क
थनादुद्वेगशायित्वेनालब्धहृदयांतःप्रवेशस्य तस्य संक्षेपेण क
थयिष्यमाणत्वाच्च अत एव विग्रहेणेत्यादि तु प्रसिद्धपदपरित्या
गेन संग्रहेणेत्य प्रसिद्धं पदमुपात्तं तच्चानंतरेण संक्षेपसमर्थोऽभ
यार्थप्रतिपादकं किं तत्पदं यत्प्राप्तिरूपेयत्वेनाभिधास्यते भवते
त्याकांक्षायामाह वेदविदः वेदप्राह्वोपत्रयीपरः तथा च वेदान्वि
दंति जानंतीति वेदविदस्त्वध्यायिका विप्रास्त्रयीधर्मारणोऽग्रदस्या
वानप्रस्थाश्च यत्पदमक्षरमनश्वरं वदंति प्रथमावः यस्य याज्ञो
नित्यताज्ञानेनमतिताम्रास्वर्थं त्रयीधर्ममवतिष्ठंतीति तथा वीतरा
गाः रागोऽस्युपलक्षणं द्वेषादेरपि तथा च रागद्वेषादिरहिता यतयः
संन्यस्तत्रयीधर्माणो यत्पदं विशंति तादात्म्येन प्राप्नुवंतीति कोऽर्थः
यत्नाद्रात्म्या वा मयि पूर्वं त्रयीधर्ममनुष्ठायानंतरं विरक्ता ह्युज्ज्ञाता या
सर्वसंन्यासं कुर्वंतीति संन्यासाधिकारश्च ब्राह्मणानामेव मुख्यः
क्षत्रियादीनां गौणः अतो विप्रास्त्वेव क्रमसंन्यासउपायतया
विहितो बोध्यः तथा यत्पदमिच्छंतोऽभिलषंतो हिनाब्रह्मचर्यं ब्र
ह्मणाविवेधाश्रुयंमध्ययनश्रवणादिनाचरणं तल्लक्षणं ब्रह्म
चारिव्रतं चरंति समाश्रयंत इति प्रथमत्र संग्रहाच्च: हिमेर्यस्व
रूपज्ञानार्थं यथास्वमनुष्ठितं तदनिंदं शमेवलाय तन्त्र्यादि
धारणापूर्वं गुरुकुलउषित्वा यथावर्णविभागमनुष्ठितं तदेव
ध्ययनादिरूपं ब्रह्मचर्यं यथाकालं चरित्वा नेतरं स्वरूपज्ञानेना
नेयत्वात्स्वर्गादेः स्य संगी कृत्य तदाश्रमी यथमेषः सन्यग्नुपा

स्य यथाज्ञानमस्य तामाश्रित्य तत्रोक्तां यमीश्वानुष्टाय जातायां वि
त घृष्णो यत्समावेशार्थं सर्वसंन्यस्यते इति महतोपायाउं वरेणा
ति कष्टेनु चिरकालेन च यद्धाम प्राप्यते तद्दृढैनैव केवलेन स.
म्यक्कीद्य प्राप्यते इति तदुपायं संक्षिप्याभिधास्य इति ॥११॥

मधुभाष्य

यदक्षरमित्यादिना प्राप्यते मुमुक्षुभिरिति पदं स्वरूपं पद
गतावितियाततो: तद्विष्णो: परमं पदमिति श्रुतेश्च गीयते
पदमित्येवमृषिभि: यत्पदं यत्तदिति वृनारदीये ब्रह्मनाडी
विना यद्यन्यत्र गच्छति तर्हि विना मोक्षं स्यानान्तरं प्राप्नोती
ति सर्वद्वाराणि संयम्य निर्गच्छन् स्वदक्षपादमूर्धादिप्राः प्रोत्रेण
वैवृद्धीत्यादिवचनाद्ध्यानसंयोगे मोक्षयमेव हृदिनारायणे
ध्रियते च यथाजगद्यस्माद्धृदित्येवं प्रभाष्यम इति पाठे न हि मू
र्ध्नि प्राणे स्थिते हृदि मनसः स्थितिः संभवति यत्र प्राणो मनस्त
त्रैव जीवः परस्तयेति ध्यानसंयोगे योगधारणामास्थितः
योगभवस्य पवा भियुक्त इत्यर्थः नित्ययुक्तस्य नित्योपायव
तः योगिनः परिपूर्णयोगस्य न तत्प्राप्तिं स्तोति ॥११॥

63

भाष्य अनुवादटीका ॥

जिस प्रकाश पुरुष की प्राप्ति का हेतु अभ्यास योग की अपेक्षा प्र
णव अभ्यास को अंतरंग करि श्रेष्ठ साधन करने की इच्छा रखते हु
ये भगवान इसके कहने की प्रतिज्ञा करते है कि हे गार्गि यही
अक्षरस्वरूप परब्रह्म की शिक्षा क्रमसे सूर्य औ चन्द्र मे नियुक्त हो
य स्थिति करते है यह श्रुतिके कहने से वेदवित लोग जिसको अ
क्षर कहते है और जिसके राग आदि गत भये हैं ऐसा यती करे
यत्नकारी पुरुष जिसमे प्रवेश करते और जिसके जानने के अर्थ।
गुरुकुलमे वास करि ब्रह्मचर्य करते हैं सोई ब्रह्मपद तुम को
संक्षेप से कहता हूं ॥ ॥

चौपई

वेदविद जेहिं अक्षर कहईं वीतराग संन्यासी जेहिं लहईं जिहई
च्छा ब्रह्मचर्यहिं गहईं तिहपद कों संक्षेपहिं तोहिं कहै ॥१॥

64

सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणाम् ॥१२॥

शाङ्करभाष्यटीका

प्रसङ्गानुप्रसङ्गं च यत्किञ्चिदिदमेवमर्थं उत्तरो ग्रन्थ आरभ्यते सर्वेति सर्वद्वाराणि सर्वाणि च तानि द्वाराणि च सर्वद्वाराणि उपलब्धौ तानि सर्वाणि संयम्य संयमनं कृत्वा मनो हृदि हृदयपुण्डरीके निरुध्य निरोधं कृत्वा निःप्रचारमापाद्य तत्र वशीकृतेन मनसा हृदयादूर्ध्वगामिन्या नाड्या ऊर्ध्वमारुह्य मूर्ध्न्याधायात्मनः प्राणमास्थितः प्रवृत्तो योगधारणां धारयितुं ॥१२॥

आनन्दगिरिकृतटीका

ननु किं कथमनन्यचेताः सततमित्यादि वक्ष्यते तत्राह प्रसङ्गेति ओङ्कारोपासने प्रसक्ते तदनन्तरं तत्फलमनुप्रसक्ते तद्द्वारा वायुनारोहादि वक्तव्यकोटिनिविष्टमित्यर्थः उक्तार्थं समनन्तरग्रन्थमुत्थापयति इदमेवमर्थं इति श्रोत्रादीनां कुत्र द्वारत्वं तत्राह उपलब्धाविति तेषां संयमनं विषयेषु प्रवृत्तानां दोषदर्शनद्वारा तेभ्यो वैमुख्यापादनं कार्यं मनसो हृदये निरोधस्तत्राह निःप्रचारमिति मनसो विषयाकारवृत्ति निरुध्य हृदि वशीकृतस्य कार्यं दर्शयति तत्रेति ऊर्ध्वमित्यत्रापि हृदयादिति सम्बध्यते सर्वाण्युपलब्धिद्वाराणि श्रोत्रादीनि संनिरुध्य वायुमपि सर्वेभ्यो निगृह्य हृदयमानीय ततो निर्गतया सुषुम्नया कण्ठभ्रूमध्यललाटक्रमेण प्राणं मूर्ध्न्याधाय योगधारणामारूढो ब्रह्म व्याहरन् मां च तदर्थमनुस्मरन् परमां गतिं यातीति सम्बन्धः ॥१२॥

स्वामिकृतटीका

सर्वेति द्वाराणि सर्वाणीन्द्रियद्वाराणि संयम्य प्रत्याहृत्य चक्षुरादिभिर्बाह्यविषयग्रहणमकुर्वन्नित्यर्थः मनो हृदि निरुध्य बाह्यविषयस्मरणमकुर्वन्नित्यर्थः मूर्ध्नि भ्रूमध्ये प्राणमाधाय योगधारणां स्थैर्यमास्थितः आश्रितवान्सन् ॥१२॥

गी॰ पैशाचभाष्यटीका

टी॰ अ॰ सर्वद्वाराणि नव द्वाराणि संयम्य सम्यग्वशीकृत्य हृदि हृत्कंडरीके मनः [illegible] ईन्या
धायात्मनः प्राणमास्थितः प्रवृत्तः योगधारणां योगाभ्यासं धारयितुं तत्रैव धारयन् १२

65

रामानुजभाष्यटीका

सर्वाणि श्रोत्रादीनींद्रियाणि ज्ञानद्वारभूतानि संयम्य स्वव्यापारेभ्यो निवर्त्य
हृदयकमलनिविष्टे मय्यक्षरे मनो निरुध्य योगाख्यां धारणां समास्थितः म-
य्येव निश्चलां स्थितिमास्थितः १२ ॥

अभिनवगुप्तकृतटीका स्पष्टार्थं १२ ॥

परमार्थप्रपा टीका ॥

अथ प्रतिज्ञातमर्थं सोगमाह सर्वद्वाराणीति द्वाभ्यां सर्वद्वाराणीन्द्रियद्वा
राणि चक्षुरादीनि संयम्य विषयेभ्यः प्रत्याहृत्य न केवलं नेत्रनिमीलन-
मात्रेण किंतु मनो हृदि निरुध्य बाह्यविषयानस्मरन्नित्यर्थः मूर्ध्नि भ्रूमध्ये
स्वस्य प्राणं नाथायस्यात्मनो योगधारणां स्थैर्यमास्थितः आश्रितः अ
निरपिरूरू कृशावीवया प्रवासवासाः परिवीत आगात् स उ श्रेयान् भ
वति जायमानः तं धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्त इति
ऋग्वेदभाष्ये बाल्यवार्द्धकाद्यैर्देहविकारैर्विरहितो युवा मुख्यप्राणो सुवा
वासः आवरणं यस्य स वाकारेण करणेन वृत्ति प्रतिविंवितः परिवीतः शरीरा
वृतः सन् आगात् जीवदृशां प्राप्तः उ इति निश्चयेन स जायमानः प्रादुर्भू
तः सन् श्रेयान् सत्कर्मनिरतो भवति स्वाध्यः सुखेनाराध्यः तमेव विधि
द४ धीरासः दृढव्रताः कवयः अन्तर्दर्शिनो ज्ञानिनः देवयन्तो देवत्वं प्राप्तुमि
च्छन्तो मनसा सह उन्नयंति सुषुम्नाविवरेण ऊर्ध्वं नयंति अत्रार्थे बाल्याण
सवा४ मपि युवासाः परिवीत आगादित्यत्र मयापरिदृष्टानि प्राणो वै युवा स
वासाः सोयं प्राणैः परिवृत इत्यादि अथर्ववेदस्थाग्नानि शानैवेकास्मद
यस्य नाड्यस्तासाम् ऊर्ध्वमभितिः स्तनैका तयोर्ध्वमायन्नमृतत्वमेति
नृ४ विष्वग्ङन्या उत्क्रमणे भवंतीति भाष्यशरीरांतर्वर्तिनो नाड्यः संति तासां म
ध्ये हृदयस्य आधारभूता एकाधिकशतं नाड्यः संति तासां मध्ये एका
नाडी मूर्धानमभिलक्ष्य निःसृता निर्गता तया नाड्या ऊर्ध्वमायन्नुग
च्छन् प्राणः अमृतत्वं प्राप्तिमुक्तो भवति उत्क्रमणे प्राणोत्क्रमणे तत्पत्ता उ

कनाद्यो विषयकृ सर्वाश्रयि मूर्द्धानमभिनिःसरति १२ ॥

वनमाली टीका ॥

प्रवक्ष्य इति प्रतिज्ञातार्थमाह सर्वेति द्वाभ्यां सर्वेंद्रियद्वाराणि संयम्य
विषयेभ्यो दोषदर्शनाभ्यासेन प्रत्याहृत्य बाह्येंद्रियैरपि मनसः प्रचारः नियं
स्यात्तत्राह मनो हृदि निरुध्य च हृदये मनो निरुध्य अंतःप्रचारेण समाधिप ता
येन मनः प्राप्य एवं वहिरंतरुपलब्धिद्वाराणि सर्वाणि निरुध्य क्रिया
द्वारं प्राणमपि सर्वतो निरुध्य क्रमेण मूर्द्ध्याधाय भ्रुवोर्मध्येन तदुपरि
वगुरूपदिष्टमार्गेण वैष्णवात्मनः परमात्मनो योगस्य धारणामास्थितः १२

अथ वैजयन्ती टीका ॥

ननु केन साधनेनाहं तत्त्वं दिष्टामीत्यपेक्षायां साधनयोगप्रकार
माह सर्वद्वाराणीति सर्वद्वाराणि सर्वाणि द्वाराणि मनो वहिर्नि
स्सरणद्वारभूतानि श्रोत्रादीनि पंच ज्ञानेंद्रियाणि संयम्य शब्दादिभ्यः य
पंचविषयेभ्यः प्रत्याहृत्य वपुनश्च ततः पश्चात् हृदि हृदयमध्ये हृत्
रूपे मनस्तत्त्वरूपे मनो ज्ञानद्वारभूतं निरुध्य निवेश्य तेनो मूर्द्धि प्राणं
क्रियाद्वारभूतं प्राणमाधाय स्थाप्य आत्मनो समयोगधारणां पादत
लादारभ्य शिखापर्यंतस्य भावनारूपां आस्थितः आसमंतात्स्थि
रत्वेन मनस्तत्त्वरूपेण वस्थित इत्यर्थः १२ ॥

तत्र प्रवक्ष्य इति मधुसूदनी टीका ॥ प्रतिज्ञातमर्थं सोपकरणमाह द्वाभ्यां ॥
सर्वाणींद्रियद्वाराणि संयम्य स्वस्वविषयेभ्यः प्रत्याहृत्य विषयदोषा
दर्शनाभ्यासात् हृदि मुखवितामापादितैः श्रोत्रादिभिः शब्दादिविषयग्रह
णमकुर्वन् बाह्येंद्रियनिरोधेपि मनसः प्रचारः स्यादित्यत आह मनो हृ
दि निरुध्य च अभ्यासवैराग्याभ्यां बहिर्ध्यानोन्नाभ्यां हृदयदेशे मनो नि
रुध्य निर्वृत्तिकतामापाद्य च अंतरपि विषयचिंतामा
कुर्वन्नित्यर्थः एवं वहिरंतरुपलब्धिद्वाराणि सर्वाणि निरुध्य क्रियाद्वा सर्वा
रं प्राणमपि सर्वतो निगृह्य भूमिजयक्रमेण मूर्ध्न्याधाय भ्रु
वोर्मध्येन तदुपरि च गुरूपदिष्टमार्गेण वैष्णवात्मनो योगधारणां आ
त्मविषयसमाधिरूपां धारणामास्थितः आत्मन इति देवतादिव्यावृत्त्यर्थं १२

सदानंदी टीका ॥

प्रत्याहृत्येंद्रियद्वाराणिविलातिं विवेकतः सम्यक्समस्तभोगेभ्यो
दोषदृष्ट्याविशेषतः वैराग्याभ्यासयोगेननिर्हेतिकमनोयथा भवेत्तथा
स्वस्वदेशेसंयम्यातिप्रयत्नतः क्रियाद्वारेतथाप्राणंसर्वतोविनिरुद्धंचगुरू
पदिष्टमार्गेणतथाभूमिजयक्रमात् स्थापयित्वाभ्रुवोर्मध्येधारणा
मात्मगोचरां समाधिलक्षणांकर्तंप्रवृत्तस्तांसमास्थितः १२ ॥

नीलकंठी टीका ॥

भ्रुवोर्मध्येकथंप्राणमावेश्य येदित्यतआह सर्वेति सर्वाणिशब्दा·
दिविषयग्रहणद्वाराणींद्रियाणिसंयम्यनिरुध्य तथाहृदिमनोपि
निरुध्य तेषांकंचुकभूतंप्राणंमूर्द्ध्न्यनाड्यासुषुम्नयाधियामूर्ध्निभ्रु
वोर्मध्येआधायकथं योगधारणांयोगशास्त्रोक्तांधारणामनसो·
देशविशेषनिर्वंधिनीमास्थितःअनुतिष्ठन्सन् १२

आनंदी टीका

श्लोकोयंप्रागदर्शितोत्क्रांतिलक्षणेनगतार्थः सर्वद्वाराणिसंय·
म्येतिधारणाध्यानसमाधिभिःक्रमेणसर्वेभ्योनवभ्योद्वारेभ्योवा
प्राणंनिरुध्य १२

रामकंठीटीका

सयोगीपरमांगतिंपूर्वोक्तंप्रकृष्टंपदंयातिप्रतिपद्यतेकोसौयए
वंदेहंत्यजन् यात्युत्क्रामति कीदृशोमामनुस्मरन् योगधारणा
मास्थितोमांयथोक्तस्वरूपपरमकारणमोंकारवाच्यंब्रह्मतत्वम
नुध्यायन् योगस्यैकस्यचित्तसमाधेरालंबनीभूतेहृतेर्थेचित्तनियम
रूपंधारणांभूमिकामाश्रितःकथमास्थितःप्रथमतरंसर्वद्वाराणि
चक्षुरादीनिचित्तवृत्तिप्रसरवर्त्मानिसंयम्ययथास्वंविषयेभ्यःप्र
त्याहृत्यमनश्चपदेशाधिगतेहृदिसर्वसंविदधिकरणभूतेदेहैक
देशेनिरुध्यप्रतिषिद्धेंद्रियविषयप्रचारंकृत्वातथाप्राणमंतश्चरं
मारुतंमूर्धिब्रह्मरंध्रेब्रह्मप्रागर्गलभूतभ्रूमध्यग्रंथिभेदाल्लब्धमार्गं
संतमादायकृत्वातथोमितिप्रसिद्धैकाक्षररूपंब्रह्मशब्दतत्वंव्या
हरन्नुच्चारयन् १२ ॥

लासिकी टीका

अथ प्रतिज्ञातं विवृणोति युग्मेन ॥

योयोगी विदेहमुक्तिमिच्छन् १२

पंचोली टीका

इदानीं मंदमध्यमबुद्धीनां कविधृणां यदन्तरमित्यादिना पूर्वोक्ते
परब्रह्मप्रतिपत्तमशक्तानां क्रतौ तन्त्रासिसाधनत्वेनोक्ते काला
तरमुक्तिफले योगधारणासहितोंकारस्योपासने प्रतिपादयि
तुं प्रसक्तानुप्रसक्तं च किंचिदुक्तं तदर्थमुत्तरग्रंथमारभ्यते स
णी र्वद्वारीति सर्वद्वाराणि विषयोपलब्धिद्वाराणि सर्वेन्द्रियाणि संय
म्य नियमनं कृत्वा मनः हृदि पुंडरीके निरुध्य तन्निर्व्यापारं कृत्वा आ
त्मनः प्राणं प्राणवायुं हृदयादूर्ध्वगामिन्या नाड्या ऊर्ध्वमारुह्य मू
र्ध्न्याधाय योगधारणां धारयितुमास्थितः प्रवृत्तः सन् १२

रणवीरसमिद्बोधिनी

अथ प्रतिज्ञातं परमपुरुषार्थोपायभूतं समरप्रकारमेवाह सर्वद्वा
राणीति द्वाभ्यां सर्वाणि सर्वेदिक्षु वर्तमानानि द्वाराणि प्रवेशनिर्गममा
र्गान् प्रचारत्वपूर्वाः संयम्य सम्यक्प्रज्ञाबलवीरपुरुषाग्रदकान्विय
स्य कपाटेरपिहितानि कृत्वा तथा ग्रहहृदि प्रभावे स्वल्पभावे च सार
रूपे च विपर्यये ऊर्ध्वायामपि नन्नू जयो विशिष्टो च प्रभो भक्तिश्च ग्रयमि
द्वितोक्तावादिशब्द संगृहीतदेशेष्वथैर्त्रनन्नू तथा च उक्तं हृदयं यस्य
सोऽस्तु तु उद्दिन्न पात्रमित्यर्थः तस्मिन्विषये वृथाभिप्रायेण प्रहृतं म
नो निरुध्य वश्यत्वनिश्चयेन रुद्धं कृत्वा न पुनः स्वेच्छया नादि विचारण
दिना प्रत्यावर्त्य तथा प्राणानिति प्राणपाशेनाद्यातिप्रियत्वेन रक्षणी
यत्वेन च प्रजालक्ष्यं ते तथा च प्राणान् प्राणतुल्याः प्रजा प्रात्मनः प्रा
णा वै पुत्रनामासीति श्रुतेरात्मजस्य मूर्ध्नि भारमिवाधाय रक्षार्थं समर्प्य
तथा प्राशुद्धृतमित्यादिवत्कार्येकारणोपचारात् प्राणान् प्राणनति

मितभूतान् आत्मनः आत्मायत्तो प्रतिर्वृष्टिः स्वभावोऽत्र स्वबर्ध्यवे
ति कोपशत्रुदिधृतियत्नात् भूमिं पिपासि आपाय पृत्वा शिरःकं
पनाभिनं घ्राणीकृत्येति यावत् तृष्णादिविषयं परित्यज न्हि पशुभि
रेवहन्यतेऽति तेषां प्राणान निमित्तमव्याहतमिति तथा प्राणान्
प्राणंतिजीवंतियेस्ते प्राणा हिंसादिभिः प्रयुक्ता आशीर्वादात्मकान्
आत्मनः स्वस्य भूमिं आयाय स्वी कृत्येति यावत् तथा प्राणो व लंवि
यते येषां ते प्राणाः अर्थाप्राणच् नान्या प्राणान ति बलिष्ठान् आत्मनः
आत्मा वै पुत्रनामासीति श्रुतेः पुत्रान् भूमिं अग्रभागे ण्यस्तै सैन्यानां आ
यायकृत्वा सैन्याग्रे स्वरान्विधापयेति यावत् तं शरणे वैतेषाम अथीना
मवगमः एवं प्रकारेणायोगधारणयोगः सन्नहनोपाय ध्यानः
संगतिपुक्तिशिष्यन्न पाशनात् योगः सर्वं सन्नहनं तस्य धारणा
मनुष्ठानलक्षणमास्थितः आश्रितवान् ॥१२॥

मधुभाष्य

१२॥

भाष्य अनुभाट टीका ॥

ब्रह्म पद प्राप्तिकी अङ्ग समेत उपाय दो श्लोक से कहते है कि इंद्रियों को प्रत्याहरण पूर्वक अर्थात् वस्त्र आदिसे वाह्य रूपादि विषयों का ग्रहण छोडि मनको हृदयमे रोध करके अर्थात् विषय का स्मरण त्याग करत भौंहके मध्य भृकुटी देशमे वायुके स्थापन करने के अनन्तर योग का धारण रूपजो धैर्य उसका अवलंवन करके १२ ॥

दोहा

सर्वद्वारकोबंधकर हृदे महिमनको रोध मूर्द्ध चढायप्राण।
निजकरें योगस्थित सोय १२ ॥

62

ॐमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् यः
प्रयाति त्यजन्देहं सयाति परमां गतिं ॥१३

शाङ्करभाष्यटीका

तत्रैव च धारयन् ओमिति ओमित्येकाक्षरं ब्रह्मणोऽभिधानभूतमो-
ङ्कारं व्याहरन्नुच्चारयन् तदर्थभूतं मामीश्वरमनुस्मरन्ननुचिन्तयन् यः प्रया-
ति म्रियते सत्यजन् परित्यजन् देहं शरीरं त्यजन् देहमिति प्रयाणवि-
शेषणार्थं देहत्यागेन प्रयाणमात्मनो न स्वरूपनाशेनेत्यर्थः सए-
वं त्यजन् प्रयाति गच्छति परमां प्रकृष्टां गतिं १३ ॥

आनन्दगिरिकृतटीका

यथोक्तयोगधारणार्थं ब्रह्मलोमूर्ध्नि प्राणमाधाय धारयन् हि
किं कुर्यादित्याशङ्क्यानन्तरश्लोकमवतारयति तत्रैवेति एकञ्च त-
दक्षरं चेति एकाक्षरमोमित्येवं रूपं तत्कथं ब्रह्मण इति यः प्रया-
तीति मरणमुक्ता त्यजन्देहमिति ब्रुवता पुनरुक्तिराश्रिता स्यादि-
त्याशङ्क्य विशेषणार्थं विवृणोति देहेति एवमोंकारमुच्चारयन्तदर्थं
चाभिध्यायन् ध्याननिष्ठः सप्रमानित्यर्थः परमामिति गतिविशे-
षणं क्रममुक्तिविवक्षयादृष्टव्यं १३ ॥

स्वामिकृतटीका

ॐमित्येकं यदक्षरं तदेव ब्रह्मवाचकत्वाद्ब्रह्म प्रतिमादिवत् ब्रह्मप्रतीक-
त्वाद्वा ब्रह्मतद्व्याहरन्नुच्चरन् तद्वाच्यञ्च मामनुस्मरन्नेवं देहं त्यजन् यः प्र-
कर्षेण याति अर्चिरादिमार्गेण सपरमां श्रेष्ठां सद्गतिं याति प्राप्नोति १३
[illegible] १३ ॥

पिशाचभाष्यटीका

ॐमित्येकाक्षरं प्रधानाक्षरमित्यर्थः ब्रह्मप्रतिहेतुत्वात् व्याहरन्नुच्चा-
रयन्मामनुस्मरन्प्रयाति प्रतीत्यनेन त्यजेद्देहं परमां गतिं याति १३ ॥

रामानुजभाष्यटीका

गी॰ टी॰ अ॰

ॐमित्येकाक्षरं ब्रह्म मद्वाचकं व्याहरन् वाच्यं मामनुस्मरन्नात्मनः प्राणं मू
र्ध्न्याधाय देहं त्यजन् यः प्रयाति स याति परमां गतिं प्रकृतिवियुक्तं मत्समानाका
रमपुनरावृत्तिमात्मानं यातीत्यर्थः यः स सर्वेषु भूतेषु नश्यत्सु न विनश्य
ति अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिमित्यनन्तरमेव वक्ष्यते १३ ॥

अभिनवगुप्तकृतटीका स्पष्टार्थः १३ ॥ परमार्थप्रपाटीका

त्वं एवमुत्क्रान्तिसमये स्मर्तव्यमाहमित्युपदिष्टं अथ जाप्यं किमित्याह ॐमिति
ॐमित्येकमक्षरं यस्य तदेकाक्षरं ब्रह्म एकाक्षरात्मको वेदः मात्रात्रयेण प्र
वीकृत्य जप्यमेव त्रयात्मकं व्याहरन्नुच्चारयन् तथा तदर्थरूपं मामनुस्म
रन् यो जीवः देहं त्यजन् प्रकर्षेणार्चिर्मार्गेण यात्यफल्गुमनेन स परमां गतिं या
ति १३

वनमाली टीका

ॐमित्येकाक्षरं ब्रह्मवाचकत्वाद्ब्रह्म व्याहरन् तदर्थं सदनन्तालौकिकवृन्दार
ण्यकं मामनुस्मरन् सस्नेहाविच्छिन्नमनोवृत्तिधाराविषयीकुर्वन् ब्रह्मरन्ध्रे
ण देहं त्यजन् यः प्रयाति सोऽर्चिरादिमार्गेण [illegible] विरजादेव परमा
त्मस्वरूपानन्दाविर्भावरूपां गतिं मुक्तिं याति प्राप्नोति प्रतीकोपासकस्तु
ब्रह्मलोकं गत्वा तद्भोगान्ते मध्येन सर्वव्यापकानन्तगुणवत्त्वस्य ध्यानेन
जातस्वयोग्याशेषविशेषापरोक्षस्तद्वयपि वार्चिरादिमार्गेण मध्येनाधि
कारिणां नारदादीनां व्यापकोपासनया ज्ञानतद्ब्रह्मापरोक्षाणामध्य
धिकारान्ते मोक्षः विदेहकैवल्यप्रतिबन्धकानामारम्भककर्मणां सत्त्वा म॰
त् नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपीति श्रुतेः १३ ॥

अस्मभैवैजयन्ती टीका ॥

किंच ॐमिति ॐमिति एकाक्षरं एकं प्रधानं च तदक्षरमविनाशि वे
से काक्षरं ॐ तत्सदिति निर्देशो ब्रह्मण इति वक्ष्यमाणाद्ब्रह्म ब्रह्मवाच
कं प्रणवं व्याहरन्नुच्चारयंस्तन्मात्रद्वाच्यं ब्रह्मरूपं परमात्मानमनु
स्मरन् ध्यायन्सन् देहं स्थूलसूक्ष्मरूपं त्यजन् सन् यो मद्भक्तः प्रयाति प्र
कर्षेण गच्छति सः पुरुषः परमां सर्वोत्कृष्टां गतिं प्राप्यरूपां याति मत्सा
मानाकारं पुनर्जन्माभावमात्मानं प्राप्नोतीत्यर्थः १३ ॥

मधुसूदनी टीका ॥

ॐमित्येकमक्षरं ब्रह्मवाचकत्वात् प्रतिमावद्ब्रह्मप्रतीकत्वाद्वा ब्रह्म व्या

हरन्नुच्चरन् ॐमितिव्याहरन्नित्येतावतैवनिर्वाहे एकाक्षरमित्यनाया
सकथनेनहृत्स्थं ॐमितिव्याहरन् एकाक्षरमेकमद्वितीय[illegible]मा
विनाशिसर्वव्यापकंब्रह्म मां ॐमित्यस्यार्थंस्मरन्नितिवा तेनप्रणवेनजप्य
मानतदभिधेयभूतंचमांचिंतयन् मूर्धन्ययानाड्यादेहंत्यजन्यः प्रयाति
सयातिदेवयानमार्गेणब्रह्मलोकंगत्वातद्भोगांतेपरमांप्रकृष्टांगतिम
दूषयांप्रपतंजलिनातीव्रसंवेगानामासन्नः समाधिलाभइत्युक्त्वाईश्व
रप्रणिधानाद्वेत्युक्तंप्रणिधानंचव्याख्याते तस्यवाचकःप्रणवः तज्जपः त
दर्थभावनमिति समाधिसिद्धिरीश्वरप्रणिधानादितिच इहतस्माद्वादे
वततःपरमगतिलाभइत्युक्ते तस्मादविरोधाय ॐमित्येकाक्षरंब्रह्मव्या
हरन्मामनुस्मरन्नात्मयोगधारणामास्थितइतिव्याख्येये विचित्रफल
त्वायपत्तेर्वा नविरोधः [illegible]
[illegible] १३ ॥

सदानंदी टीका ॥

ब्रह्मणोवाचकत्वात्प्रतीकत्वाद्वा उच्चरन् ॐमित्येकाक्षरंब्रह्म सर्वव्या
पकमद्वयं ॐमित्यस्यार्थंमीश्वरंमांचसम्यगनुस्मरन् नाड्यामूर्द्धन्यया
देहंत्यजन्धीरः प्रयातियः सदेवयानमार्गेणब्रह्मलोकमुपासकः ग
त्वाभोगावसानेचमद्रूपांगतिमुत्तमां प्राप्नोतिब्रह्मणासार्द्धंसंप्राप्तेप्र
तिसंचरे १३ ॥

नीलकंठी टीका ॥

मूर्ध्निप्राणमाधायकिंकुर्यादित्यत आह ॐकाररूपमेकाक्षरंएकंचतत्
दक्षरंचवर्णोब्रह्मवाचकतद्व्याहरन्उच्चरन् मांचब्रह्मभूतंअनुस्मरन्योहि
देवदत्तंस्मृत्वातन्नाममव्याहरतितस्मैदेवदत्तोभिमुखोभवत्येवंब्रह्मणो
नामोच्चारणेनसन्निहिततरंव्यापकंब्रह्मसाधकस्यसन्निधीयते सन्नि
हितेचब्रह्मणियोदेहंत्यजन्म्रियमाणःप्रयातिऊर्ध्वनाड्याउत्क्रामा
ति सपरमांगतिंसन्निकृष्टब्रह्मरूपांयाति ब्रह्मैवप्रकृत्यपद्यते यथा
स्यपरमागतिरेषास्यपरमासंपदेषोस्यपरमआनंदइति तामेवगतिं

शुद्धंब्रह्मैवप्राप्नोतिब्रह्मलोकप्राप्तिद्वारा १२

आनंदी टीका

अथोंकारस्योच्चारः ओंकारव्याहृतेरन्तर्मुख्या प्राणेन समाहरेदिति संहि
तोक्तेः प्राणसंहारा योदानो हृदनाय चेति रहस्यविदः वैष्णवपदप्राप्त्यु
पायजपतयेतिश्रुतिविदः गुरवस्तु अपानसमाहार उदानो ह्यथः
परप्राप्त्युपायपतञ्जपश्चेति समुदितत्रयमेव हेतुरित्याहुः तथा चैत
त्तिरीयश्रुतौ ओमितिब्रह्म ओमितीदं सर्वमित्यादौ व्याख्यातं श्रुतिवि
द्भिः परपदप्राप्त्युपायत्वं [illegible]

रामकंठीटीका

एवं प्राणस्य मूर्ध्नि धारणं प्रणवस्योच्चारणं प्रणववाच्यस्य च मत्स्वरू
पस्यानुस्मरणं चेति सर्वेंद्रियमनोनियमपूर्वकं युगपत्त्रितयमेतत्सं
पादयन् यो देहविसर्गं करोति स योगी परमं पदं प्राप्नोतीति तात्पर्यम्
[illegible] १३

लासिकी [illegible] टीका

ओमिति यत्प्रसिद्धमक्षरं तदेव ब्रह्मवाचकत्वाद्ब्रह्म तदुक्तं तस्य वाच
कः प्रणव इति तज्जपस्तदर्थभावनं चेति तदेवोच्चारयन् तद्वाच्यं च म
मात्मानमनुस्मरन्निरन्तरं विमृशन् तदुक्तं अदृष्टविग्रहो देवो भावग्राह्यो
मनोमयः तस्योंकारः स्मृतो नाम तेनाहूतः प्रसीदतीति इति तथा सर्वाणी
न्द्रियद्वाराणि संयम्य प्रत्याहृत्य चक्षुरादिभिर्बाह्यविषयग्रहणमकृत्वे
त्यर्थः मनश्चात्ममननात्मकं हृदि सर्वसंविदधिकरणे उपदेशाधिगा
ने देहैकदेहे हृत्पुण्डरीके निरुध्य विगतप्रचारं कृत्वा ततो मूर्ध्नि सुषुम्णया ग्रं
थिभेदेन सर्वं ब्रह्मरंध्रे हृदयादूर्ध्वगामिन्या सुषुम्णानाड्या प्राणमन्तश्च
रमारुतमाधाय कृत्वा एवमात्मनो योगधारणां समाधिविशेषमास्थि
तः सन् देहं त्यजन्प्रयाति यथायतनमप्रवेश [illegible] निर्गच्छति देहात्
स योगी परमां गतिं विदेहमुक्तिं प्राप्नोति [illegible]

पंचोली टीका

किंच ओमितियः योगी ओं इतिएकाक्षरं ब्रह्म ब्रह्मवाचकं व्या
हरन् तदर्थभूतं मां ईश्वरमनुचिंतयन् देहं त्यजन् प्रयाति म्रिय
ते स परमामुत्कृष्टां गतिं याति १३ ॥

रणवीरसमिद्धोधिनी॥

ओमित्येकाक्षरमिति श्रुतिप्राह स्वरूपद्योतकः ओमिति ओंकारस्व
रूपं एकाक्षरमेकवर्णं ब्रह्मप्रापकं ब्रह्म व्याहरन् कोर्थः वेदसार
भूतमोंकाराख्यमेकवर्णं मंगलावहमुच्चारयेति कार्यारंभे हि निर्वि
घ्नतासिद्धये मंगलमाचरंतीति सदाचारः ओमित्युच्चार्यैव चोत्तिष्ठं
तीति सर्वानुभवसिद्धं ओंकारस्यच मंगलावहत्वं ब्रह्मवाचकत्वा
च्चास्य प्रसिद्धं यत आहुः प्राञ्चः ओंकारः सिद्धशब्दश्चद्वावेतौ ब्रह्मणः
पुरा कंठं भित्त्वा विनिर्यातौ तेनोभौ मंगलावहाविति वक्ष्यते च भग
वता ओंतत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृत इति ओमित्यनाव
तैव विवक्षितार्थसिद्धावेकाक्षरं ब्रह्मेत्यनेन तत्स्तुतिः प्रतीयते वेदोक्त
स्वस्त्ययनसूक्तपाठादिकं विधायैव कार्यांतरं द्विजैरारंभणीयं स
मरप्रस्थितस्य त्वत्रस्य पुनरोंकारमात्रेणैव सर्वं वेदोक्तसूक्तपाठादि
कं विहितं भवत्यन्यथा कालविलंबेन स्वार्थहानिरिति तथा मामनु
स्मरन् ओंकारवाच्यं मां परं ब्रह्म सर्वार्थसाधकमनुचिंतयन् यः क्ष
त्रियप्रवरो नृपतिः प्रयाति प्रकर्षेण याति प्रयाणं करोति कीदृशः सन्
देहं त्यजन् दिह्यत उपचीयते सा चितिश्च्युत्यते देहशब्देनात्र कोषा
भिधीयते तस्य कोषस्य ह्रविरोलक्षणा तथाच देहं कोषस्थं इ
षिरं त्यजन् त्यागो विहायितेदानमिति नामानुशासनात् द्विजाति
भ्यः परमेश्वरप्रीत्यर्थं भटेभ्यः प्रोत्साहनानिमित्तं ददत् अथच

वामार्थं स्त्रीशरीरस्य दक्षिणार्थं स्तनं तत्त्यजेत्यादि मित्युक्तो केदेहं ना
या पुत्रादिकं त्यजन् प्रहृतिनिरोधकं प्रत्याहृतिनिमित्तं च तत्त्विष
यं स्वदेहं परित्यजन् स राजा परमां परेषां प्राप्नुयात् सर्वपितृनीमां ग
त्य लक्ष्मी यातिम्राप्नोति किंभूतां तां गतिं गम्यते प्राप्यते यातां ग्रा
मं योग्यामिति यावत् कर्मणिक्तिन् ॥ १३॥

मधुभाष्य

१३॥

भाषा अनुवाद टीका

ओंकाराख्य एक जो अक्षर सो ब्रह्मका वाचक [illegible] अथवा ब्रह्म प्रतीक कहे प्रतिमा केसमान इन दोनोंहेतु से ब्रह्म है ऐसे प्रणव कहे ओंकार के उच्चारणपूर्वक तद्वाच्य रूप हमको स्मरण करि देहत्यागकरते जो मनुष्य अर्चिरादि मार्ग अर्थात चन्द्र सूर्य मार्गसे गमन करतेहैं तेई सर्वोत्तम मेरी गति को पावते हैं १३ ॥

दोहा

ओं एकाक्षर ब्रह्महि पढत स्मरत मोहि कोय जो त्यजदेह दिंगा
त है जात परम गति सोय १३॥

72

अनन्यचेताः सततं यो मां स्मरति नित्यशः तस्या
हं सुलभः पार्थ नित्ययुक्तस्य योगिनः १४ ॥

शाङ्करभाष्यटीका

किञ्च अनन्येति अनन्यचेता नान्यविषये चेतो यस्य सोयमनन्यचेता यो
गी सततं सर्वदा यो मां परमेश्वरं स्मरति नित्यशः सततमिति नैरन्त
र्यमुच्यते नित्यश इति दीर्घकालत्वमुच्यते न षण्मासं सम्वत्सरं वा किं त
र्हि यावज्जीवं नैरन्तर्येण यो मां स्मरतीत्यर्थः तस्य योगिनोहं सुलभः
सुखेन लभ्यः पार्थ नित्ययुक्तस्य सदा समाहितस्य योगिनः यत एव
मतोनन्यचेताः सन् मयि सदा समाहितो भवेत् १४ ॥

आनन्दगिरिटीका

ननु वायुनिरोधविधुराणां उदीरितया रीत्या स्वेच्छापूर्वकोत्क्र
मणासम्भवाद्दुर्लभा परमा गतिरापतेदिति तत्राह किञ्चेति इतश्च
भगवदनुसरणे प्रयतितव्यमित्यर्थः सततं नित्यश इति विशेषण
योरपुनरुक्तत्वमाह सततमित्यादिना उक्तमेवार्थोनकृत्कि व्यक्तीक
रोति नेत्यादिना जितासुरिच्छया देहं त्यजति तदितरस्तु कर्मक्षये
णैवेति विशेषं विवक्षन्नाहयत इति १४ ॥

एवंचांतकालधारण स्वामिकृतटीका यामन्याभिः नित्याभ्यासवत एव भवति नान्यस्येति पूर्वोक्तमेवानुस्मार
यति ॥ नान्यस्मिन् चेतो यस्य तथाभूतः सन् यो मां सततं नित्यशः प्रतिदिनं स्म
रति तस्य नित्ययुक्तस्य समाहितस्याहं सुखेन लभ्यास्मि नान्यस्य १४
१४ ॥

पिशाचभाष्यटीका

अनन्यचेता यो मां स्मरति नित्यशः सुलभः सुखेन लभ्यः नित्ययुक्तस्य
नित्ययुक्तो नित्ययुक्तस्तस्य योगिनः १४ ॥

रामानुजभाष्यटीका

गी·
टी·अ·

एवमैश्वर्यार्थिनः कैवल्यार्थिनश्च स्वप्राप्त्यनुगुणं भगवदुपासनप्रका
रमुक्तः अथ ज्ञानिनो भगवदुपासनप्रकारं चाह अनन्यचेता इति सततं सर्वकाल न:४
मनन्यचेता यः स्मरति अत्यर्थं मत्प्रियत्वेन मत्स्मृत्या विना आत्मधारणमा
लभमानो निरतिशयप्रियं मां यः स्मरति तस्य नित्ययुक्तस्य नित्ययोगं
काङ्क्षमाणस्य योगिनो हं सुलभः अहमेव प्राप्यः न मद्भावः ऐश्वर्यादि
कः न हि वियोगमसहमानो हमेव तं वृणे मत्प्राप्त्यनुगुणोपासनविपा
कं तद्विरोधि निरसनं मत्प्रियत्वादिकं चाहमेव ददामीत्यर्थः
यमेवैष वृणुते तेन लभ्य इति श्रूयते वक्ष्यते च तेषां सततयुक्तानां भ
जतां प्रीतिपूर्वकं ददामि बुद्धियोगं तं येन मामुपयान्ति ते तेषामेवा
नुकम्पार्थमहमज्ञानजं तमः नाशयाम्यात्मभावस्थो ज्ञानदीपेन भा भा४
स्वता इति च १४ ॥

अभिनवगुप्तकृतटीका स्पष्टार्थं १४ ॥

परमार्थप्रपाटीका ॥

एवं मद्भक्तस्य नाहं शीघ्र दशामहमेव संपादयामीत्याह अनन्येति स
ततमनवरतेन अन्यं मदतिरिक्तं चेतसि यस्य स तथाभूतः सन् यो जी
वद्दशायां नित्यशः मां स्मरति तस्य समाहितमनसो हं सुलभः सुखे
न प्राप्यो नान्यस्य ध्यानादिक्लेशराहित्येनापि स्वयमाविर्भूय प्रक
टो भवामीत्यर्थः १४ ॥

वनमाली टीका ॥

य एवं ब्रह्मलोकं प्रेम्णा विहाय देहं त्यक्तुं न शक्नोति किं तु कर्मणा येनैव परव
शो देहं त्यजति तस्य किं स्यात् तत्राह अनन्येति न विद्यते मदन्यविषये
चेतो यस्य सोनन्यचेताः सततं निरन्तरं नित्यशो यावज्जीवं यो मामति
प्रेम्णा स्मरति तस्य स्ववशतया परवशतया वा देहं त्यजतोपि नित्य
युक्तस्य सततं समाहितचित्तस्य योगिनो हं सर्वेश्वरो जगद्गुर्वादिकर्ता
न्यस्याति दुर्लभोपि सुलभः सुखेन लभ्यः हे पार्थ न त्वमन्न मित्रस्या
हमति सुलभ इति भावः यावज्जीवं विशेषतोन्तरन्तरस्मृत्यतया हरेः स्थितत्वमे
व परमगतिहेतुर्ब्रह्मलोकं प्रेम्णा स्वश्च योग्य कर्मणा भवतु न वेति नामावा

हः तदनुस्मरणं विना व्रजत्वं प्रेण्णोत्क्रमणमपि न मोक्षदमिति भावः ॥ १४

ऊसमवैजयन्ती टीका ॥

एवमार्त्तादित्रयाणामुपासनप्रकारं मोक्षप्रकारं च प्रतिपाद्याधुना नि
त्यानिन्द्योपासनप्रकारस्याप्यप्रकारं चाह अनन्यचेता इति सततं निरंत
रं देशकालवस्त्ववस्थादिशुद्ध्यशुद्धिविचारापेक्षारहितेन नित्यशो दिह
वहः अनन्यचेताः अन्येषु प्राकृतिकैहिकामुष्मिकविषयभोगसाध
नादिषु देवान्तरेषु वा चेतो यस्य सोऽन्यचेताः नान्यचेताः अनन्यचेताः
निरवच्छिन्नतैलधारावन्मत्स्वरूपलग्नचित्तः सन् मज्ज्ञानवान् मद्भक्ति
योजनः मां सर्वात्मानं सर्वेश्वरं स्मरति निरतिशयप्रेम्णा चिंतयति हे पा प्रिय
र्थ पृथापुत्र तस्य नित्ययुक्तस्य नित्यमेव मत्पदे प्रतिक्षणमेव मद्योगेच्छा
वतो योगिनो मन्मित्रादिसम्बन्धवतो हं सर्वेश्वरः सुलभः सुखेनैव ल।
भ्यः प्राप्यः न तु दुःखेन रसायनापेक्षासद्गृहीकविवशाभूत्वा ज्ञानयोगस्य
त्वामेवाधिटटामीत्यर्थः वक्ष्यते च ददामि बुद्धियोगं तं येन मामुपया
न्ति तेषामित्यादिना श्रुतिरप्याह यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा।
वृणुते तनूं स्वामित्यादिः ॥ १४ ॥

यएवं वायुनिरोधेचे धैर्येणाभ्रुवोर्मध्ये प्राणमावेश्य मूर्धन्ययानाडया
देहंत्यक्तुं स्वेच्छया न मधुसूदनी टीका ॥ शक्नोति किंतु कर्मक्षयेणैव परवशो देहं
त्यजति तस्य किं स्यादिति

तत्राह ॥ न विद्यते मदन्यविषये चेतो यस्य सोऽनन्यचेताः सततं निरंतरं नित्यशो याव
ज्जीवं यो मां स्मरति तस्य स्ववशपतया परवशतया वा देहं त्यजतो पि नि
त्ययुक्तस्य सततं समाहितचित्तस्य योगिनः सुलभः सुखेन लभ्यो हं प
रमेश्वरः इतरेषामतिदुर्लभो पि हे पार्थ तवाहमतिसुलभो माभैषी
रित्यभिप्रायः अत्र नित्यशोयं सर्वसामान्येकतरिन लोके त्या न
दिनानि पाद्यात् अत्र चानन्यचेतस्त्वेन सत्कारो त्यादरः सततमिति
नैरंतर्यं नित्यशः इति दीर्घकालत्वं स्मरणस्योक्तं तेन सत्कारदीर्घकाल
नैरंतर्यसत्काराससेवितो दृढभूमिर्भवति पातंजलमतमनुसृतं भवति न
न तत्र [illegible] अभ्यास [illegible] कोपि स्मरणपर्यवसायी तेन
यावज्जीवं प्रतिक्षणमविच्छेदेन तरम्यान्यतया भगवद्ध्यानवितनमेवं रम प
भूते गति हे [illegible] नाडयात्स्वेच्छया प्राणोत्क्रमणं भवतु न वेति ना न
नीवाग्रहः [illegible] ॥ १४

प्रा

सदानंदी टीका ॥

यएवंस्वेच्छयादेहंत्यक्तुंशक्नोतिनेतरोजनः किंतुकर्मतत्परेणैवदेहंपरवशस्सन्‌ रोगादिभिस्त्यजत्यस्यकिंस्यादित्युच्यते स्मरण मदन्यविषये चेतोनास्तियस्यसएकधीः योमांनिरंतरंयावज्जीवंस्मरतितस्यव स्वेच्छयात्यजतोदेहंपराधीनंयाप्यवा समाहितधियोनित्यंयोगिनोमत्परस्यसः अनायासेनलभ्योस्मियोन्येषामतिदुर्लभः हेपार्थेतिसर्वेवैनैवलभ्यस्तेहंमयंत्यज १४ ॥

नीलकंठी टीका ॥

इयंगतिरतीवदुर्लभेतिमामंस्याइत्याह अनन्येति नास्तिअन्यत्रचेतोयस्यासौअनन्यचेताइत्यनेनस्मरणेआदरउच्यते सततमिति नैरंतर्यं योमांस्मरतिनित्यशःइतिदीर्घकालत्वं यावज्जीवंस्मरतीत्यर्थः तस्याहंसुलभःपार्थनित्ययुक्तस्यनित्ययोगिनामवश्यकेयुक्ताहारविहारादौयमनियमादौचयुक्तस्यावहितस्ययोगिनःयोगमनुतिष्ठतः १४

आनंदी टीका

अत्रसततताभ्यासस्यावश्यकर्तव्यत्वमाह ॥ अनन्यचेताःसततंयोमांस्मरतिधारणादिनास्थिरीकृतचित्तःयोयोगीसततंनिरंतरंनित्यशोदीर्घकालंयावज्जीवंवास्मरतिपार्थतस्ययोगिनोनित्ययुक्तस्यसदानिरंतरंचयोगाभ्यासिनोहंसुलभः अत्रश्रीमदभिनवगुप्तपादाचार्यस्यार्थान्तरमप्याहुः सर्वद्वाराणीचक्षुरादीनिसंयमप्रत्याहारादिविषयेभ्योव्यावर्त्यनतुद्वाराणिविद्याख्यानादीनिमनः प्राणमार्गेविनिमिश्याशान्त्यात्मनिमूर्ध्निसकलतत्त्वातीतेधारयन्नितिकायनियमेन ओमिति जपन्नितिवाङ्नियमेनमामनुस्मरन्नितिचेतसोनन्यगामिनोनियमेनप्रयातिदिनाहिनमपुनरावृत्तयेगच्छतिसततंपरबोधमयरूपतामात्मनेवधारयति पुनरिदंसकलापत्यानेजन्ममाभूयादितीयेयोमामनन्यचेताःस्मरतिसततंसमभावमेवयातिनत्वन्योत्क्रान्तिमात्रेहहेयोव्यासमस्यस्वस्मादैतपदोपतेपविरोधीयुक्तः तथाचोक्तंव्यापिन्यांशिवसत्तायमुत्क्रान्तिर्नामनिष्कला अव्यापिनिशिवेनामनोत्क्रान्तिःशिवदा

१४

यिनीति [illegible] १४

तस्मिन्प्रयाणकाले तात्कालि

कथं तं समाधिं साधयेदित्यत्र

रामकंठी टीका

कावस्थाविसंस्थूलचित्तो योगी

पूर्वोक्तं कारणमाह ॥

तस्य नित्ययुक्तस्याविच्छिन्नसमाधेर्योगिनो हं नित्यशः सर्वावस्था
सु सुखदुःखादिकात्मिका सुसुलभः सुप्रापः कस्य यः सततम
व्यवधानेन मां यश्चोक्तयोगाभ्यस्तान्तर्ये के तत्त्वे परमात्मानमनन्य
चेता अन्यतो मद्व्यतिरिक्ताद्वस्तुनो निवृत्तान्तःकरणः स्मरत्यात्म
त्वेन प्रत्यवमृषति यं यं भावं स्मरन्वापीत्यादिनोक्तोपपत्त्या सर्वात्म
कमत्स्वरूपप्रत्यवमर्शाभ्यासदृढसंस्कारस्य योगिनस्तस्याम
वस्थायामहमात्मभूतत्वात्कथं दुष्प्राप इति तात्पर्यं [illegible] १४

ननु मरणकाले तात्का

लालसिकी [illegible] टीका

लिकदुःखादिविसंस्थूल

चित्तो योगी कथमेवंविधं समाधिं साधयेदित्याशंक्य पूर्वोक्तमेव कारणमाह ॥

यो योगी अनन्यचेता नान्यस्मिन्साध्ये फलादौ विषये वात्मानं विना
यं प्रसरश्चेतो यस्य स तथाविधो नित्यशो यावज्जीवं प्रतिदिनं सततं
निरंतरं यथा भवति तथा मां प्रत्यग्वं स्मरति आत्मत्वेन प्रत्यवमृ
शति हे पार्थ तस्य तस्य योगिनो नित्यं व्यवहारदशास्वपि युक्तस्या
त्मनो समाहितस्य अहमक्षरः पुरुषोत्तमो वा सुलभः सुखेन लभ्यो
स्मि नान्यस्याप्रमत्तस्य एवं सति तस्य दुःखनिबंधनायामप्यवस्था
यामात्मभूतत्वात्कथमहं दुष्प्राप इति तात्पर्यं यत एवमतोऽनन्यचे
ताः सन्मयि सदा समाहितो भवेदिति [illegible] १४

पंचोली टीका

किंच अनन्यचेता इति हे पार्थ यः सततं निरंतरमनन्यचेता न अ
न्यविषयं चेतो यस्य स अनन्यचेताः मां परमेश्वरं नित्यशः दीर्घका
लं यावज्जीवं स्मरति तस्य योगिनः नित्ययुक्तस्य योगिनः सदा स
माहितचित्तस्य अहं सुलभः सुप्राप्यः १४ ॥

नन्वप्रयाणमात्रेण शत्रुसंबंधिराज्यलक्ष्याक्रांतिरसंभविनीत्य
र्जुनाभिप्रायमाशंक्य प्रतिज्ञातार्थमेतयैव पूर्वप्रपञ्चितलक्ष्याह
त्यातां साधयति भगवान् तथाहि सर्वद्वाराणि संयम्य परशुरस
मीपप्रमोसत्यां तत्संबंधिनः सर्वदिक्स्थान्सर्वेषानिगमनमार्गा
न्विभुत्वकपाटान्कृत्वा हृदयस्थां स्वरत्नकान्विहृत्य तथा मनः म
नो वदति जवं रथाश्वादिकं हृदि हृदयदेशे ध्यात्वा रथ्यानि रुध्य प्र
तिषिद्धप्रसरं कृत्वेति यावत् तथा मूर्ध्नि समरशिरसि प्राणान् प्राणेन
बलेन सहितान्नातिबलानिति यावत् आत्मनः पुत्रान् यद्वा आत्मनः
स्वस्य संबंधिनः प्राणान् प्राणा विद्यते येषामिति प्राणिनः प्राणिनः
सुभटान्स्वस्य वादीश्वाधायस्य पर्थितवायेह्यकृत्वेति यावत् योगधार
णां योगः कर्मसु प्रवृत्तिलक्षणास्य धारणामनुष्ठानलक्षणामा
स्थितः शस्त्रप्रहरणादिकं कर्म कुर्वन्निति यावत् ओमित्येकाक्षरं
ब्रह्म ओंकारलक्षणां प्रणवं वेदमंत्रमुच्चारयन् मां चेश्वरमनुस्मरन्
परमेश्वरमेवममशरणमित्यविरतमनुध्यायन् यः क्षत्रियः प्रया
ति शत्रुसंमुखमभिवाताय गच्छति स विजयति तदा देहं शत्रुश
रीरं त्यजन् प्राणविमुक्तं कृत्वा भूमौ पातयन् परमां गतिं प्राप्य
शत्रुराज्यलक्ष्मीं प्राप्नोति यथा च राज्यसुखमुपभुज्य देहं त्यजन्
आयुरवसाने स्वपरीराज्ञकामत्वन् परमां गतिं मसत्युन्यल
क्षणं प्राप्नोतीति सति न ये व्याख्याः स वै क्षत्रुभिरेव पराजीयते त
तस्मरमध्यप्रवसंमुखमरणादेहं स्वशरीरं परित्यजन्परमां ग
तिं महामलक्षणं प्राप्नोतीत्यर्थः यद्वा व्यूहरचनाव्यवहारस्याग्रा
वगम्यते संक्षेपेणोक्तत्वात् एषपवृद्धिसंक्षेपो यदस्मीयसार्थे
न बहूनामर्थानां प्रतिपादनं प्रतत्संग्रहणी प्रयत्नसेनाक्के ते स
वव्यूहरचनाप्रकाशो यथा सर्वद्वाराणि भटानां प्रवेशातिर्गमार्थाः
पद्धतीः प्रथीद्यूहस्य संयम्य संयतानि निषिद्धमहनिर्गमप्रवेशा

निरुह्वा तथा मनः मनःप्राधान्येनचास्मात् हृषयलक्षणाया सेनानीर्ल-
क्ष्यते यथा चक्षुरादीनां मध्ये मनो यदिन्द्रियमनुवर्तते तेन देव स्व
विषयग्रहणे समर्थं भवति नत्वन्यत् एवं सेनानीरपि यमेव सै
न्यभागं यस्मिन्नेव कार्ये नियुंक्ते स एव तदेव कार्यं करोति नान्य
दिति साद्धृपयात्मनः सेनानी: तं सेनान्यं हृदि व्यूहमध्ये निरुह्य
स्थापयित्वा च यद्वा मनो वदति चपलानि कातराणीति यावत्
अर्थात् सैन्यानि हृदि व्यूहमध्य एव निरुद्ध संस्थाप्य यदुक्तं व्यूह
कलनायां पुरो देयाः शूरतति निर्भीरु व्रटनां सेनापरं तत्कृतिविति
यद्वा संयम्य मनः इति च्छेदः यथा श्रो भिन्नक्रमो नः इत्ययमेनान्वेति
तथा चायमर्थः सर्वद्वाराणि प्रोक्तलक्षणानि निरुह्य निरुह्य इति
कृत्वा तथा हृदि व्यूहमध्ये संयम्य संयमयित्वा स्थित्वमस्वे: सं
योजयित्वा योग्यं मनः स्वकीयं स्वयं च निरुद्ध संस्थापयित्वा तथा
मूर्ध्नि व्यूहस्याग्रभागे आत्मन इति ल्यब्लोपे पंचमी तथा च आत्मा
नं यत्नं स्वभावं शरीरं वा विचार्येत्यर्थः प्राणान्बलानीति प्राय प्रा
णिनः शूरान् इति यावत् आयायस्थापयित्वा कोर्ध्वहस्वप्रांशुत्वा
दिकं शूरताभिव्यंजकमवेक्ष्याभीरुस्वभावं प्रयत्नातिशायं च पा-
रीक्ष्य शूरान्भटानग्रेदत्वेति यदुक्तं प्रथमं योजयेच्छूरान्संग्रा
मकर्मणीति एवं योगधारणा योगः सैन्यानां यथोचितस्थानेषु
स्थापना रूपो व्यूहलक्षणयाधारणां कलनामाश्रितः व्यूहकलन-
या सैन्यानि विन्यस्तवान् इति यावत् एषा च व्यूहस्थापना प्रथ
माध्याय व्याख्याने तत्र तत्र व्यूहकलनाप्रकारप्रदर्शने सव्या-
ख्यानं विस्तरेण प्रपंचिता स्वबलत्वक्षणं च हृस्वप्रांशुवनप्रकोपन
कलिप्रीता इत्यादिना तत्रैव दर्शितमिति नतत एव सर्वमवधार्य-
मिति एवं कृत्वा यः कश्चित्क्षत्रियप्रवरो राजा ओं इति स्वरूपमेका
क्षरं ब्रह्ममंगलावहं परब्रह्माभिधानं व्याहरन् प्रयाति प्राड्विवू-
हान्तरं गच्छति सदेहं स्वकीयं परकीयं वा शरीरं त्यजन् जयपराज-
ययोरन्यतरस्यावश्यंभावित्वादिति भावः परमां गति प्राड्विराज्य

लक्ष्याक्रममत्स्वरूपं मत्सायुज्यलक्षणं वा याति प्राप्नोति तत्र हे
तुः मामनुस्मरन्निति पूर्वेण समानः इति सूक्ष्मकलनया व्या
ख्याते अथेदानीं धारणस्थानेऽलक्ष्यपातनेनैकाग्रतालक्षणया
धारणया पिङ्गलनाड्यैव व्याख्यायते तथाहि पायुसम्मुख
प्राप्तामत्यां सर्वद्वाराणि चक्षुरादीनि प्रवृत्तिनिरोधकमुद्र्या
दिनिमित्तकारव्यतानिश्चयनवर्णितरोचितभिन्नावालिन्या
दियुमविकीर्णात्मकचित्तवृत्तिप्रसरवत्संभूतानि संयम्य ग्य
यास्वविषयेभ्यः प्रत्याहृत्य मनश्च संकल्पात्मकं हृदि हृदयदेश
एव निरुद्धहत्वा तथात्मनः आत्मानं बुद्धिमवरुद्ध्येति ल
क्षेपे पंचमी बुद्धावसरेणेति यावत् प्राणानन्तं स्वजायाबहुव
चनं मूर्ध्निरन्ध्रिमसि आधाय धृत्वा कोऽयं मीति पूर्वकं पुरुष
विधायेति यतउक्तं कात्स्न्यकेवलानीति प्रोर्ध्वं वा पतनेच्छितं
अतः सिद्धिसमेताभ्यामुभाभ्यामन्वियोषसहइति तथायोगे धार
संधानलक्षणे धारणामेकाग्र्यात्मिकामास्थितः सन् ओमित्ये
काक्षरं ब्रह्म ओंकारमात्रमस्य देवतामंत्रं व्याहरन् मां चोंकार
वाच्यपरब्रह्मलक्षणमनुस्मरन् यः प्रयातीति पूर्वेण समाने
॥ तनुदेहोत्क्रान्तिकालेतादृशावस्थाविसंस्थुलचित्तः
कर्मयोगी कथं भवेत् मनुस्मरेदित्यत्र पूर्वोक्तमेवकारणमाह
नन्यचेता इति यः कर्मयोगी सततं नित्यं वैधानेन मां परमात्मानं
स्मरति धारणायेन भावयति कथंभूतः अनन्यचेताः नाविषये म
स्मिन्मत्तो व्यतिरिक्ते इव तातदाग्रे चेतो यस्य तादृशो मादृते देव
तादेः सकाशान्निवर्तितात्मवतः करणइति यावत् तस्य नित्ययु
क्तस्य नित्यं सर्वदायुक्तस्य स्वोचितेषु कर्मसु प्रवृत्तस्य योगिनः
कर्मयोगिनो नित्यशः सर्वासु सुखात्मिकासु दुःखात्मिकासु
चावस्थासु जीवदवस्थायां मरणसन्तरे काले सुलभः सुखप्राप्यो
स्मि योहि निरंतरं मां स्मरति तस्य निरंतरस्मृत्यैव मा प्राप्तिः सिद्धैव
नच बलवद्दुःखावेगेन स्मृतिविनाशोऽपिदृष्ट इति वाच्यं नित्या

भ्यासस्य त्तणंस्मृतिनिरोधानेपितत्कालमेवपुनरपिस्मृत्याधा
यकत्वादितिभावः १४ ॥

मधुभाष्य

१४॥

77

भाषा अनुवाद टीका ॥

ऐसे ही अन्तकाल मे धारणा क्रम से नित्य अभ्यास कारी पुरुष को मेरी प्राप्ति होती और को नही एतावता एवं वचन ही को स्मरण करावते हैं कि हे पार्थ जिस मनुष्य का चित्त भगवतको छोडि और मे नहीं है ऐसा अनन्य चित्त होय जो निरन्तर या प्रतिदिन हम को स्मरण करै है उसी समाहित पुरुष को हम अनायास मिलते हैं और को नहीं प्राप्त होते हैं यह जानो १४ ॥

दोहा

जो मोहि चित अनन्यसें स्मरत निरंतर कोय पारथ ताको सुलभ मे योगयुक्त नितजोय १४॥

78

मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतं नाप्नुवन्ति
महात्मानः संसिद्धिं परमां गताः १५ ॥

शाङ्करभाष्यटीका

तत्र सौलभ्येन किं स्यादित्युच्यते शृणु तन्मम सौलभ्येन यद्भवति माम्
उपेत्येति मामीश्वरमुपेत्य मद्भावमापद्य पुनर्जन्म पुनरुत्पत्तिं न प्राप्नुवा
न्ति किं विशिष्टं पुनर्जन्म न प्राप्नुवन्ति तद्विशेषणमाह दुःखालयं दुःखा
नामाध्यात्मिकादीनामालयमाश्रयं आलीयन्ते यस्मिन् दुःखानि तं दुः
खालयं जन्म न केवलं दुःखालयमशाश्वतमनवस्थितस्वरूपं च नाप्नु
वन्तीदृशं पुनर्जन्म महात्मानो यतयः संसिद्धिं मोक्षाख्यां परमां प्रकृ
ष्टां गताः प्राप्ताः १५ ॥

आनन्दगिरिकृतटीका

अनन्यचेतस्त्वं समाहितचेतस्त्वं [illegible] प्रतीश्वरस्य सौलभ्यमेवमि
मुच्यते किं त्वां प्राप्तास्त्वय्येवावतिष्ठन्ते किम्वा पुनरावर्तन्ते चन्द्रलोका
दिवेति सन्देहात् पृच्छति तत्रेति तत्रोत्तरश्लोकेन निश्चयं दर्शयति उ
च्यते इतीश्वरोपगमने न सामीप्यमात्रमिति व्याचष्टे मद्भावमिति पु
नर्जन्मनोऽनिष्टत्वं प्रश्नद्वारा स्पष्टयति किमित्यादिना महात्मत्वं प्र
कृष्टसत्त्ववैशिष्ट्यं यतयस्तस्मिन्नेवेश्वरे समुत्पन्नसम्यग्दर्शिनो भूत्वेतिशेषः १५

स्वामिकृतटीका

यत्त्वेवं त्वत्सुलभोऽसि ततः किमत आह मामिति ॥
उक्तलक्षणा महात्मानः मद्भक्ता मां प्राप्य पुनर्दुःखाश्रयमनित्यं च जन्म
न प्राप्नुवन्ति यतस्ते परमां सम्यक्सिद्धिं मोक्षमेव प्राप्ताः पुनर्जन्मनो दुः
खानामालयं स्थानं मामुपेत्य न प्राप्नुवन्तीति वा [illegible]
[illegible] १५ ॥

पिशाचभाष्यटीका

मामुपेत्येति संसिद्धिं परमां मोक्षं १५ ॥

रामानुजभाष्यटीका

गी· टी·अ

अतः परमध्यायशेषेणज्ञानिनः कैवल्यार्थिनश्चापुनरावृत्तिमैश्वर्या-
र्थिनः पुनरावृत्तिं चाह मामिति मां प्राप्य पुनर्निखिलदुःखालयमस्थिरं
जन्म न प्राप्नुवन्ति यत एते महात्मनः महामनसो यथावस्थितमत्स्वरूप-
ज्ञाना अत एव मत्प्रियत्वेन मया विनात्मधारणमलभमाना मय्यासक्त-
मनसो मदाश्रया मामुपास्य परमसंसिद्धिरूपं मां प्राप्ताः १५ ॥

79

अभिनवगुप्तकृतटीका

गु

समाहितचेते निश्चीयते येनेति निग्रह उपायः तेनोपायेनैतत्सत्यमभिधास्य ११
उपायमत्र सततनाभ्यासायवदेय द्वाराणीन्द्रियाणि हृदीत्येनेन विषयसंगा-
भावउच्यते ततविहास्यानाधिष्ठाने आत्मनः प्राणमात्मसारथ्यमिच्छाश-
क्त्यात्मनि मूर्ध्नि सकलतत्त्वातीते धारयन्निति कायनियमः ओमिति जपनि-
ति वा नियमः मामनुस्मरन्निति चेतसानन्यगामिना यः प्रयाति हि नैहि न
मपुनरावृत्तये गच्छति तथा च देहत्यजन्कथं मे पुन [illegible] रिदं म
ना कलापत्यानं शरीरं मयादिति एवं यो मामनन्यचेताः स्मरति सततं मे
वयानिसमङ्गावेनत्वत्र मनेः परंबलाद्धेतपेदापत्सपविरोधोऽउक्तो नामरः ति
तथा चोक्तं व्यापिन्यां शिवसत्तायामुत्क्रान्तिर्नाम निष्कला अव्यापिनि
शिवेनामनोत्क्रान्तिः शिवदायिनीति यदि वा सततनाभ्यासोपि येन कु-
तस्तथापि जनतश्चिदीश्वरेच्छादेर्निमित्तात्तस्य एव ह्लाणोयदाताहृ ध्या-
वो जायते तदायमुत्क्रान्तिलक्षण उपायः संस्कारोनवप्रतिष्ठ्यकउ-
क्तः अत एव यदक्षरमित्यादिनाभिदास्यइत्येतेन प्रतिज्ञाकृता
लक्षणमात्रस्यापि भगवदनुचिंतनमयस्य सकलसंस्कारविध्वंसनल-
क्षणमद्भुतहेतुत्वं प्रतिपादयितुं यदाहुराचार्यवर्याः निमेषमपि यद्यै-
कमिति अत एव प्रयाणकाले स्मरणेन विनाखेदनेतियघांशकाता-
न्वीतशंकाकाङ्क्षमुक्तमनन्यचेताः सततमिति अन्यत्र फलादेशाकाङ्क्षे-
यस्य न चेतइत्यर्थः तस्याहं सुलभ इति तत्स्यनक्विंचित्प्रयाणकालोचि-
त्यपर्येषणं तीर्थसेवा उत्तरायणमायतनसंशयः सत्त्वविशुद्धिस्सवि-
तकर्कविषवदादिगुणपकालोदिनं अकृतमपवित्रम् पवित्रहः
स्त्रेहमलविहीनेदेहतात्प्रद्भवस्ताद्विग्रहइत्यादयः क्लेशोभ्यर्थनीयइत्य-
र्थः यत्स्यागुक्तं तीर्थे श्वपचगृहेवस्यादि ततमक्षावयातीतक्तं तत्किं
प्राप्तेपि पुनरावृत्तिरस्तीत्याशंक्याह मामुपेत्येति अन्यतस्सर्वत्र

वपुनरावृत्तिरस्तीतिसमनंतरेणश्लोकेनप्रतिपादयिष्यते मांतुप्राप्य
नपुनर्योगिनोजन्मादिज्ञासमाप्नुवंति १५

परमार्थप्रपा टीका

सुलभत्वेकिंभवतीत्याह मामिति एवमुक्तलक्षणामहात्मानोमहा
नुभावाः मांपरमात्मानंप्राप्यदुःखालयंसर्वदुःखनिदानंअशाश्वतंन
श्वरंपुनर्जन्मनप्राप्नुवंति यतस्तेपरमांसंसिद्धिंगताः १५ ॥

वनमाली टीका ॥

मद्दर्शनगुणेनवासुदेवप्रसन्नमुपेताहीभूतेप्राप्यन्ननिवर्तन्तइत्याह
मामितिमांसर्वेश्वरंप्राप्यपुनर्जन्मनमनुष्यादिदेहसंबंधंकीदृशंदुःखा
लयंगर्भवासयोनिनिर्गमनाद्यनेकदुःखस्थानमशाश्वतमस्थिरंना
प्नुवंति पुनर्नावर्तन्ते यतोमहात्मानोमहाशयागंभीराशयाः प्राकृ
तभोगेभ्योनिवृत्तचित्ताइत्यर्थः मांप्राप्यमत्प्रसादात्स्वस्वरूपावि
र्भाववद्रूपांसम्यक् सिद्धिंपरमांनिवृत्ताशेषप्राकृतांशतयाविदेहकै
वल्यरूपांध्वस्तलिंगतयापुनरावृत्तिरूपांगताः परंज्योतिरुपसंपद्य
स्वेनरूपेणाभिनिष्पद्यतसतत्रपर्येतिजक्षन्क्रीडन्रममाणइत्या
दिश्रुतेःविहारोपदेशादितिभावः १५

कुसुमवैजयन्ती टीका

नन्वीदृशायेज्ञानवंतस्तेकिंफलंप्राप्नुवंतीत्यपेक्षायामाह मामुपे
त्येति तेसकलकल्याणगुणार्णवंसर्वसुखसिंधुंसर्वेश्वरमुपेत्य
प्राप्यपुनरस्मिन्संसारेदुःखालयंदुःखान्यध्यात्मादीन्यालीयंतेय
स्मिंस्तथासर्वदुःखाश्रयंकेवलंदुःखालयमेवनास्तिकिंतुअशाश्वत
मनित्यंशाश्वतस्तुध्रुवोनित्यइत्यमरकोशात् जन्मप्रादुर्भावंनेमतत्व
रूपगुणशक्त्यादिज्ञानवंतोमद्भक्तानाप्नुवंतियतस्तेषांमहात्मानोले
नजन्मप्रदानिसंचितक्रियमाणानिकर्माणिभस्मीभूतानिसुवर्णतः
कारणाभावात्कार्यस्याप्यभावस्यादित्यर्थः कीदृशास्तेमहात्मानोम
होदारमानसाः आत्मात्मीयादिसर्वस्वनिरतिशयप्रेमास्पदंसकल

गी॰ मुखभोगमयमेव समर्पितवंत इत्यर्थः अप्येवंपरमां सर्वोत्कृष्टां संसि
टी॰ अ॰ द्धिं मुक्तिं गताः सर्वफलरूपं मां प्राप्ता इत्यर्थः १५

मधुसूदनी टीका

भगवंतं प्राप्ताः पुनरावर्तंते न वेति संदेहे नावर्तंत इत्याह ॥

मामीश्वरं प्राप्य पुनर्जन्म मनुष्यादिदेहसंबंधं कीदृशं दुःखालयं गर्भ-
वासयोनिद्वारनिर्गमनाद्यनेकदुःखस्थानम् अशाश्वतम् अस्थिरं दृष्टनष्ट-
प्रायं नाप्नुवंति पुनर्नावर्तंत इत्यर्थः यतो महात्मानः रजस्तमोमलरहितां-
तःकरणाः शुद्धसत्त्वाः समुत्पन्नसम्यग्दर्शनाः मल्लोकभोगांते परमां
सर्वोत्कृष्टां संसिद्धिं मुक्तिं गतास्ते अत्र मां प्राप्य संसिद्धिं गता इति वदता
पासकानां क्रममुक्तिर्दर्शिता [illegible]
[illegible]
[illegible] १५ ॥

सदानंदी टीका ॥

यस्मादेवं ततो नित्यं समाहितमना मयि अनन्यधीः स्यादात्मयोगेन
तन्मत्परायणः मद्भावं वैष्णवं तत्त्वं प्राप्य धीरा मुमुक्षवः नाप्नुवंति पुन-
र्देहसंबंधं दुःखमंदिरं गर्भवासभगद्वारनिर्गमादिश्रमाकरं दृष्टनष्ट-
प्रमागारं जन्म दुःखालयं ते शुद्धसत्त्वा महात्मानो जातसम्यग्धियो बु-
धाः सर्वोत्कृष्टां विमोक्षाख्यां संसिद्धिं मां समागताः १५ ॥

नीलकंठी टीका ॥

ब्रह्मलोकेऽपि किं स्यादत आह मामिति मामुपेत्य पुनर्द्वितीयवारं जन्म
नाप्नुवंति यज्जन्म दुःखानामालयभूतं मूकदृष्ट्या किंचित्सुखालय-
त्वेऽपि अशाश्वतं नश्वरं तत्क्षणिकमित्यर्थः के नाप्नुवंति महात्मानो योगेन
जितचित्ताः यत एव परमां संसिद्धिं मोक्षं गताः अगताश्चेदपि मामा सत्त्व-
[illegible] नयाब्रह्मलोकगतानां क्रमप्रस्थिते ब्रह्मणा सह ते सर्वे
संप्राप्ते प्रतिसंचरे परस्यांते कृतात्मानः प्रविशंति परं पदमिति श्रुति
संचरे ब्रह्मप्रलये परस्य ब्रह्मणः अंते नाशे १५ ॥

आनंदीटीका [illegible] ॥

ग्रपाश्वतमनवस्थितस्वरूपम् १५

ये चानेन क्रमेण मां प्रपन्ना रामकंठी टीका

स्ते ॥ महात्मनो यथोक्तज्ञानपरिशीलनभावात्महत्सर्वातिशायी परमे
श्वरएवात्मा येषां तेन यातएव मां यथोक्तया भक्त्या समाश्रित्य परां
सिद्धिमभेदसमापत्तिलक्षणां परमां फलसंपत्तिमितः संसाराद्गताः संता:
पुनर्भूयो जन्मदेहान्तरग्रहणं नाप्नुवन्ति न लभन्ते कीदृशं जन्म दुःखा
नामाध्यात्मिकादीनां संग्रहात्त्रिप्रकाराणां विस्तारतो नन्तभेदानामा
लयमास्पदं तथाशाश्वतमवश्यमनुषक्तदेहेन्द्रियादिसर्वस्वविना
शमतान्मवात्तमप्रमयनिबन्धनासर्वदुःखयोगिता जन्मविनाशा
दिविकारसंबन्धनाच्च जीवानां सामान्यं परमकारणमेकमात्मानं मा मा
महत्तया प्रतिपन्ना नो पुनर्नेसंभवतीति तात्पर्ययम [illegible]
[illegible] १५ ॥

नन्वसन्तासौम्यन लासिकी [illegible] टीका दासंपन्नोभवतीतिश्रुतेः सृष्टसोसद्भावमापन्नोपि
यथा पुनः संसरति तथैव भगवद्भावमापन्ना अपि जन्मयान्तीतियंदाशंकास्या

श्लोके राह ॥ मामीश्वरं परमस्वरूपगतिमुपेत्य प्राप्याहमेवब्रह्मेत्यस्थि योगिनः पु नन्निराकरणेयसंप्रभिः
नर्जन्म न लभन्ते दुःखानामाध्यात्मिकादीनामालयं तत्राप्यशाश्वतम
नित्यं दृष्टनष्टप्रायं जन्मदेहपरिग्रहं नाप्नुवन्ति कृतत्रयमतो हेतुग
र्भं विशेषणमाह महात्मन इति महान्व्यापको हमेवात्मा येषां ।
ते तदुक्तम् विततस्य कुतः क्व वा सरणमिति ननु देहस्यापरिग्रहे
५प्र किं स्वरूपं प्राप्यते इत्याशंक्याह परमामत्युत्कृष्टां संसिद्धिं सर्वा ।
त्मकत्वलक्षणां मदभेदसमापत्तिरूपां मोक्षाख्यां प्राप्ताः [illegible]
[illegible] १५ ॥

पंचोली टीका

भगवत्संलभ्मेन यद्भवति तदाह मामुपेत्येति महात्मनो यत

गी ये परमांप्रकृष्टांसंसिद्धिंमोक्षाख्यांगताःप्राप्तामामीश्वरमु
भ॰टी॰ पेत्यमद्भावमापद्यदुःखानामाध्यात्मिकादीनामालयमाश्र
येअशाश्वतमनित्यंजन्मउत्पत्तिंपुनर्नाप्नुवंति १५ ॥

81

रगवीरसमिद्बोधिनी॥

ननुदेवतांतरभक्तोतत्तल्लोकादिप्राप्नोतित्वद्भक्तस्त्वामस्त्येवेति कोविशेषोभवल्लाभेयेनतान्परित्यज्यत्वल्लिप्साविधेयेत्याह मामुपेत्येति संसिद्धिप्रकृतीतिमेस्वरूपंचस्वभावश्चेतिकोषात् संसिद्धिशब्देनस्वभावोभिधीयते तथाच परमांसंसिद्धिंपरमा सून्नीनंतिदिसंत्यनयेतिव्युत्पत्त्याशब्दवाच्येप्रवर्तयितृसंसिद्धिस्व भावंगताःप्राप्तामहात्मानोनिश्चयात्मकप्रज्ञातिशयशालिनो तिगंभीरहृदयाऐश्वर्यातिशयवंतोनिजवर्णाश्रमोचितकर्मविषय यत्नादिकवंतश्चमदतिसर्वातिशायिनिपरमेश्वरएवात्मामनोयेषामितिवा वैयधिकरण्येपिपूर्वपदस्यच्छांदसत्वात्साधुत्वं तादृशाःकर्मयोगिनोमामुपेत्यशुद्धसत्त्वमरणेनवाप्रादुर्भूतजि॰ ज्ञान्यायेनप्रज्ञाः संस्थराज्यसुखंवाअनुभूययथाकालंप्राणत्या गेनवामत्सारूप्यंप्राप्यपुनर्जन्मपुनर्योनिसंक्रमणंनाप्नुवंति नप्राप्नुवंति कीदृशंजन्मदुःखालयं दुःखानांनिवासभूतं तथा प्यशाश्वतमचिरस्थायि अयमाशयः देवतांतरलोकान्गत्वा तत्रत्यसुखंवाअनुभूयपुनरपिजन्मप्राप्यदुःखमेवोपभुज्यते अयंत त्रमत्परांविदायाद्दमेवसर्वलोकेश्वरोनित्यसुखदातावससाम तिच्यइतिभावः १५॥

मधुभाष्य

मामितिपरमांसिद्धिंगताहिनइतिसम्बद्धेनः महामेकस्यब्रह्म सदनमारभ्यनपुनरावृत्तिः तथोक्तंनारायणगोपालकल्पे प्रामेकब्रह्मसदनाद्दजनतान्नजनिर्भवेत् तथाप्यभावःसर्वत्र॰ प्राप्येवब्रह्मदेवजमिति मांप्राप्यनपुनरावृत्तिरितिस्थापयितुं

मव्यक्तात्स्वात्मसामर्थ्यं दर्शयित्वं प्रलयादि दर्शयति २५

82

भाषा अनुवाद टीका ॥

जो तुम स्वभक्त को ऐसे अनायास मिलते हो तो फिरि उसका क्या हो
ता है इस शङ्कापर कहते हैं कि पूर्वोक्त महात्मा लोग मेरी भक्ति से
मेरे को प्राप्त होय कर दुःख का भवन औ अनित्य जो जन्म तिस को फि
रि नहीं प्राप्त होते हैं क्यों कि वे परम सिद्धि को प्राप्त भये अर्थात् जी
वन्मुक्त होय जन्म मरण संसार दुःख से छूटि जाते हैं १५ ॥

दोहा

मोहि मिले फिर जन्म दुखद अस्थित कोय प्राप्त न होत
महात्म नर परम सिद्धि गत होय १५॥

आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन मा
मुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते १६ ॥

शाङ्करभाष्यटीका

ये पुनर्मां न प्राप्नुवन्ति ते पुनरावर्तन्ते के पुनस्त्वत्तोऽन्ये प्राप्ताः पुन
२ रावर्तन्त इत्युच्यते आब्रह्मेति आब्रह्मभुवनाद्भवन्ति यस्मिन् भूतानी
ति भुवनं ब्रह्मभवनं ब्रह्मलोक इत्यर्थः आब्रह्मभुवनात् सहब्रह्म
भुवनेन लोकाः सर्वे पुनरावर्तिनः पुनरावर्तनस्वभावाः हे अ
र्जुन मामेकमुपेत्य तु कौन्तेय पुनर्जन्म पुनरुत्पत्तिर्न विद्यते १६

आनन्दगिरिकृतटीका

भगवन्तमुपगतानामपुनरावृत्तौ ततो विमुखानामनुपजाततत्त्वसा
क्षिणां पुनरावृत्तिरर्थसिद्धेत्याह ये पुनरिति अपाम सोममम्रता अ
भूमेतिश्रुतेः स्वर्गादिगतानामपि समानैवानावृत्तिरिति आश
ङ्क्य ते के पुनरिति अर्थवादश्रुतौ कर्मिणाममृतत्वस्यापेक्षिक
त्वविवक्षितत्वात् परिहरति उच्यत इति एतेन भूरादिलोकचतुष्टय
प्रविष्टानां पुनरावृत्तावपि जनादिलोकत्रय प्राप्तानामपुनरा
वृत्तिरिति विभागोक्तिर प्रामाणिकत्वादेव हेयत्वमवधेयं न
हि तत्र देवस्वं प्राप्तानामपि पुनरावृत्तिः शङ्क्यते नेत्याह मामि
ति यावन्मां प्राप्तानां तन्निवर्तनं प्राप्तानां निवृत्ताविद्यानां पुनरा
वृत्तिरप्रामाणिकीत्यर्थः १६ ॥

ततदेवं सर्वेषु पितृलो स्वामिकृतटीका केषु पुनरावृत्तिं दर्शयन् निर्धारयति ॥
ब्रह्मणो भवनं वासस्थानं ब्रह्मलोकः तमभिव्याप्य सर्वे लोकाः पुन
रावर्तनशीलाः ब्रह्मलोकस्यापि विनाशित्वात् तत्र प्राप्तानां ज्ञानां
तत्रत्यानामनुत्पन्नज्ञानानामवश्यंभावि पुनर्जन्म यथैवक्रममुक्ति
फलाभिरुपासनाभिः ब्रह्मलोकं प्राप्ताः तेषामेव तत्रोत्पन्नज्ञाना

गी॰
टी॰ अ॰

८५

नां ब्रह्मणास हमोहो नान्येषां मामुपेत्य वर्तते मानानां तु पुनर्जन्म नास्तेव
स्पर्थः ॥ ननु च तपस्विनो दानशीला वीतरागास्तितिक्षवः त्रैलोक्यादुप
रिस्थानं लभंते शोकवर्जितमित्यादिपुराणवाक्यैः त्रैलोक्याः सकाशा
त् महर्लोकादीनामुत्कृष्टत्वं गम्यते विनाशित्वं च सर्वेषाम विशिष्टं क
थमेषां विशेषः स्यादित्याशंक्य बहुकालावस्थायित्वनिमित्तो
विशेष इत्याशयेन स्वमानेन शतवर्षायुषो ब्रह्मणो हस्यहनि त्रिलो
क्या उत्पत्तिर्निशि निशि च लयो भवतीति दर्शयिष्यन् ब्रह्मणः अ
होरात्रयोः प्रमाणमाह १६ ॥

पिशाचभाष्यटीका उपक्रम स्पष्टार्थं
१६

रामानुजभाष्यटीका

ऐश्वर्यगतिप्राप्तानां भगवंतं प्राप्तानां च पुनरावृत्तावनावृत्तौ च हेतु
मनंतरमाह आ इति ब्रह्मलोकपर्यंता ब्रह्मलोकांतर्वर्तिनः स
र्वे लोका भोगैश्वर्यादिरूपाः पुनरावर्तिनः नाशिनः अत ऐश्वर्य
गतिं प्राप्तानामपि पुनस्यान्नाशित्वसंगाभावात्तेषां पुनर्जन्म न वि
द्यते १६ ॥

अविनाशित्व मवर्जनीयं मांस
र्ववितं सत्यसंकल्पं निखिलजग
दुत्पत्तिस्थितिलयलीलं पर
मकारुणिकं सदेकरूपं प्राप्ता
नांवि +

अभिनवगुप्तकृतटीका

ब्रह्मलोकं प्राप्तानामपि पुनरावृत्तिरस्तीति सर्वैर्व्याख्यातं एतद्भ्युपगमे
च तदुपरितनलोकगतिर्मुक्तिरित्यभिहितं स्यात् न च न हृदयंगममिति
संशयमहामोहकलुषीकृतानां तद्दशामस्माकं प्रतिभातीयमागमा
धिगताव्याख्यावर्तिः आब्रह्मयावद्ब्रह्मपदं प्राप्ता तावद्यस्मात्कस्माच्चि
न्निर्येन्मूर्धायत्नाद्भुवनान्नरावर्तंते चक्रवत्स्थानांतरमविरतं आम्या
तो विपरिवर्तंत इति १६ ॥

परमार्थप्रपाटीका

अथाध्यावीतरसिद्धीशाश्वतं सुखं वदं च देहमये त्वमाणानां तु पुनरावृत्ति
रस्तीत्याह आब्रह्मेति ब्रह्मणो भवनं वासस्थानं ब्रह्मलोकस्तम
भिव्याप्य ये लोका महर्लोकाद्यास्तेपि पुनरावर्तिनो भवंति ननु त
पस्विनो दानशीला वीतरागास्तितिक्षवः त्रिलोक्या उपरिस्थानं।

ल[stain]भंते शोकवर्जितमिति पुराणेन कृत्वा कथमुक्तं पुनरावर्तिरिति त
त्रोच्यते सुखेन चिरकालं जीवितमप्येतस्य सामवेदोक्तबृहद्रथंतरवैरूप
वैराजशाक्वररैवतनौधसकालेयायघर्षसामात्मिकामांसदीप्तसोमा
महतीस्वच्छसुधास्यसाम्राज्यभोज्यस्वराज्यादिक्रमेणपारमेष्ठ्यसा
त्यलोकं प्राप्य स्थित्यापुरहोरात्रनिद्रामंगलादिलौकिकव्यवहारवता
स्यनश्वरावर्तनमेवं श्रु[stain]तिरपि प्राणपथ्यो यो वा एतदक्षरमविदित्वा
गार्ग्यस्मिन्लोके जुहोति ददाति तपस्तप्यपि बहूनि वर्षसहस्राण्यं
तवानेवास्य स लोको भवतीति भाष्यं अत्र वाचक्नवीं प्रतियाज्ञव
ल्क्यो वदति भो गार्गि गर्गकन्ये वाचक्नवि यः पुरुष एतदनुभूयमाने
अक्षरं परं ब्रह्म अविदित्वा अज्ञात्वा अस्मिन्लोके जुहोति यागं करोति द
दाति तपस्तप्यति कृच्छ्रचान्द्रायणादिना एवं च लोकार्थमे
तावनुष्ठायः स लोकोऽस्य पुरुषस्य बहून्यनेकानि वर्षसहस्राणि सेव
मानोऽपि अन्तवानेव पुनरावर्तनाय भवति अथोक्तप्रमेयप्रतिपादके
अर्कशर्यावीयब्राह्मणे च अथातः पैन्द्रो महाभिषेकस्ते देवा अब्रुवन् स
प्रजापतिका अयं वै देवानामित्यादि तथापस्तंभसंहितास्वपि सु
पर्णोऽसि गरुत्मान् त्रिवृत्ते शिरो गायत्रं चक्षुरित्यादि ग्रंथविस्तरभ
या न लिखितं शतश्लोकभाष्ये स्वामिभिः सविस्तरं प्रोक्तमस्ति अथ
ये वेत्यन्तवत्तानि तल्लेमहूपता प्राप्य विस्तरेण सकलव्यवहाराः
संसरणावीनभूतं जीवत्वं परिहाय ब्रह्मरूपास्ते तां पुनर्जन्मना
प्नोत्याह मामुपेत्येति तथा च विसत्ववद्विनराशादि सकलव्यव
हारत्वमेव मत्वा [stain] स्तिव्यजनकं श्रुतिरपि सपर्यामैथवविकल्पउद
के प्रात्सतं उदकमेवानुविलीयेत नाहास्योद्ग्रहणायेव स्यादिति तथा
न तस्य प्राणा उत्क्रामंत्यत्रैव समवलीयंत इति १५ ॥

वनमाली टीका ॥

भगवंतं प्राप्तानां धस्तत्लिंगत्वादपुनरावृत्तिमुक्त्वा सम्यग्भेदर्शनहीना
नामत एव तद्प्राप्तानां संप्यलोकंगतानामपि लिंगदेहस्य सत्वेन पुनरावृ
त्तिर्भवतीत्याह आब्रह्मेति भवंत्यत्र भूतानीति भुवनं लोकः आब्रह्मभुवना

गी
टी॰ ३९

९८

दित्यत्राभिविधावाकारः ब्रह्मलोकेन सह सर्वेपि लोकाः सम्यक्क्रमदर्शनब्र
सादहीनानां सम्यगनुष्ठितब्रह्मचर्यसंन्यासादीनां भोगार्थाः ब्रह्मभुवना
दितिपाठे भवनं वासस्थानमिति स एवार्थः मां सर्वेश्वरमशक्तत्वेन भवबु
पेत्य प्राप्य पुनर्जन्म न विद्यते मामुपेत्येत्युक्त्या पुनरुक्तिर्दोषोद्धृथः ब्र
चिरादिमार्गेण गतानां ज्ञातव्यापकब्रह्मापरोक्षाणां ब्रह्मलोके गतानां
मपि तत्र ब्रह्मणा एव मुक्तिर्न तत्रावस्थाने परिच्छिन्नतया प्रतिमादिषू
पासकानां ब्रह्मलोके वस्थानं भोगो नैव मुक्तिः भक्तिं विना केवलं न्या सं
सादिनैव गतानां पुनरावृत्तिरिति विवेकः १६

अतमैवैजयन्ती टीका

ननु ये त्वद्भक्तिज्ञानवर्जितास्तका मास्तेषां का गतिः स्यादित्यपेक्षायामाह
आब्रह्मभुवनादिति हे अर्जुन आब्रह्मभुवना[illegible] दिति आकारोऽभिविधौ
ब्रह्मणोऽस्तन्मुखस्य भुवनं सत्यलोकमभिव्याप्यैतस्माद् ब्रह्मभुवनेन तस्मात
ये लोकाः सपाला स्वर्ग्यादयः सर्वे पुनरावर्तिनः तथा हि स्वः सप्त
लोकादीनि भूलोकपर्यन्तानि स्थानानि लयं यान्ति [illegible] तद्वर्तिनो
जीवास्तु पुण्यकर्मभोगक्षये सति पुनः पृथिव्यां जन्म प्राप्नुवन्ति तत्रा
येन भगवद्भक्तास्तान्तितत्त्वलोकजनितपुण्यकर्मोद्भवस्वभोगभुक्ता
नदवसानेतत्त्वलोकपाले ब्रह्मादिभिः साकं विस्मलोके प्राप्नुवन्तीत्या
शयः ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे परस्यान्ते कृतात्मानः प्रवि
शन्ति परं पदमिति स्मृतेः हे कौन्तेय कुन्तीपुत्र त्वमेन यतो मद्भक्तियुक्ता
याः मत्पितृष्वसुः कुन्त्याः त्वं पुत्रो मद्भक्तस्त्वतः इदं रहस्यं तुभ्यं वदा
मीति सूचितम् तु पुनः ये सर्वे प्राकृतविषयं हित्वा मां सर्वकारणं सर्वा
धिपतिं सर्वेश्वरं सर्वात्मानमुपेत्य प्राप्य ब्रह्मलोकादिभूलोकान्त
सकलब्रह्माण्डनिरयतुल्यं मन्यमाना मदर्पितात्मानोऽमीयमरामावि
नात्मधारणेऽप्यसमर्था मत्प्रियास्तेषां पुनर्जन्म पुनरावृत्तिर्न विद्यते
न भवति १६ ॥

भगवंतमुपागतानां स मधुसूदनी टीका म्यग्दर्शिनामपुनरावृत्तिर्लोकधितायां
ततो विशुद्धानामसम्य ग्दर्शिनां पुन रा वृत्तिरर्थसि
द्धेत्याह ॥ आब्रह्मभुवनात् भवन्त्यत्र भूतानीति भुवनं लोकः अभिविधावाकारः

ब्रह्मणः भुवनं ब्रह्मभुवनं
ब्रह्मभुवनादा इति आब्रह्म
भुवनं तस्मात्

ब्रह्मलोकेन सह सर्वेऽपि लोका मद्विमुखानां मम स्यद्दर्शिनां भोगभूमयः पु
नरावर्तिनः पुनरावर्तनशीलाः ब्रह्मभवनादिति पाठे भवन्त्यत्रेति वासस्थानमिति
सप्तवार्थः हेऽर्जुन त्वं तु प्रसिद्धमहापुरुषकितवद्देववंशोद्भवानामपि पु
नरावृत्तिरित्याह मामीश्वरमेकमुपेत्य तु शब्दो लोकान्तरेभ्यो वैलक्षण्यद्योत
नार्थः अवधारणार्थो वा तु शब्दः मामेव प्राप्य निवृत्तानां हे कौन्तेय मात
तोऽपि प्रसिद्धमहानुभावपुनर्जन्म न विद्यते पुनरावृत्तिर्नास्तीत्यर्थः अत्रा
र्जुन कौन्तेयेति संबोधनद्वयेन स्वरूपतः कारणतश्च शुद्धिरेतानं सम्पन्नया
सूचिता अत्रेयं व्यवस्था ये क्रममुक्तिफलाभिरुपासनाभिर्ब्रह्मलोकं
प्राप्तास्तेषामेव तत्रोत्पन्नसम्यग्दर्शनानां ब्रह्मणा सह मोक्षः येतु पंचाग्नि
विद्यादिभिरतत्क्रतवोऽपि तत्र गताः तेषामवश्यंभावि पुनर्जन्म अतएव
क्रममुक्त्यभिप्रायेण ब्रह्मलोकमभिसंपद्यते न च पुनरावर्तते अनावृत्तिः
शब्दादिति श्रुतिसूत्रयोरुपपत्तिः इतरत्र तेषामिह न पुनरावृत्तिरिह मा
मानवमावर्तं नावर्तन्त इतीहेममिति च विशेषणाद्भुमनाधिकरणक
ल्पान्तरे पुनरावृत्तिः प्रतीयते [illegible]
[illegible] १६ ॥

सदानंदी टीका ॥

भगवंतं गतानां च सम्यग्ज्ञानवतां तेषां मुक्तिस्तद्विमुखानां तु पुनरावृ
त्तिरुच्यते ब्रह्मलोकेन सहिता लोका ये भोगभूमयः असम्यग्दर्शिनां सं
ति पुनरावर्तिनोऽखिलाः कर्मभिर्निर्मिता नो हि स्थायित्वं नास्ति कर्हिचि
त् कर्मभिर्निर्मिता लोकास्तु ब्रह्मलोकादयोऽखिलाः मामनंतपदं प्राप्य पुनरा
वृत्तिवर्जिते न विद्यते पुनर्जन्म पुनरावृत्तिलक्षणं १६ ॥

नीलकंठी टीका ॥

त्वल्लाभेऽपि किं स्यादत आह आब्रह्मेति आब्रह्मभुवनात् ब्रह्मलोकमभि
व्याप्य ब्रह्मलोकेन सहैव सर्वे लोकाः पुनरावर्तिनः पुनरावृत्तिस्वभा
वाः हेऽर्जुन शेषं स्पष्टं अत्रेयं व्यवस्था ये क्रममुक्तिफलाभिर्दहरादि
विद्याभिः ब्रह्मलोकं गतास्ते तत्रैव ज्ञानं प्राप्य ब्रह्मणा सह मुच्यन्ते येतु पं
चाग्निविद्याभिर्ब्रह्मलोकं गतास्ते उपासितपरमेश्वराः पुनरावर्तन्त
इति १६ ॥

श्रानन्दीटीका

ब्रह्मणः षट्त्रिंशत्कल्पमहाविष्णोर्भवंतेनेन सहैकरूपतापत्तिस्तामर
स्पतस्मात् ज्ञानपर्यन्तम् यावत्तावत्प्रमयेन निर्बीजसमाधिनाक्का
न्तिरूपेण कैवल्यमाप्यते तावत् लोकाः लोक्यन्तेहत्यन्ते च तर्विंशतत्त्व
संबंधानापेत्तिणः जीवाः पुनरावर्तिनः पुनर्जायन्ते म्रियन्ते च मानुषेषु
पुनर्नौन्पयन्ते विवेकख्यातिमासद्यैकीभूय पेत्तकवदवस्थितानामपवर्गो
भवतीत्यर्थः तथा चोक्तं ज्ञानेन चापवर्गो विपर्ययादिष्यते बन्ध इति
प्रस्तावः तावदेव प्रकृतिर्भोगमारभते यावत्तत्र विवेकख्यातिः विवे
कख्यातिमोचयतीति विपर्ययात् तत्त्वज्ञानाभावात् बन्धः स च त्रिविधः
प्राकृतिको वैकृतिको दाक्षिणश्च तत्र येषां प्रकृतावेवात्मबुद्धिस्तेषां
प्राकृतिको बन्धः ते शतं युगसहस्रमव्यक्तकेऽस्थिताः पुनरावर्तन्ते वैकृ
तिको बन्धस्तेषां ये देहकारादीनेव पुरुषत्वेन जानन्ति ते हि दशमन्वं
तराणीह तिष्ठन्ति इन्द्रियचिन्तकाः भौतिकास्तु शतं पूर्णं सहस्रं त्वा
भिमानिकाः बौद्धा दशसहस्राणि तिष्ठन्ति विगतज्वराः इतीष्टयोगि
नां सांख्यानां चानुशासनेन पुरुषतत्त्वानभिज्ञाः प्रकृत्याद्यौ विलीय पु
नरावर्तन्ते इत्यर्थः तथा च विलयधर्मं ध्रुवन्तं प्रतिमार्कण्डेयः प्रथमे
काण्डे त्रिसप्ततितमेऽध्याये पूर्णं वर्षशतं सर्वं ब्रह्मा जीवति यावद्ब्रह्मा
युषापरिच्छिन्नः पौरुषो दिवसः स्मृतः रात्रौ तस्याश्च लीनायां पुनरेव ज
गत्पतिः सर्वं विधत्ते सर्वं तत्पथा पूर्वमुदाहृतम् ॥

एवं यथोक्तनयेन मतमाश्रय रामकंठीटीका

णमेकं उपायं वर्जयित्वा नान्यत्किंचिदपुनरा

इतिकारणं संभवतीत्याह ॥ परमप्रकृष्टतपोयज्ञदानादिपुण्यकर्मप्राप्यो ब्रह्मणः प्रजापतेर्लोक
स्तमवधिं कृत्वा यानि कानिचित्पुण्यकर्मप्राप्याणि लोकान्तराणि सभ
वन्ति ते पुण्ये लोकास्तत्क्रियानुष्ठानत्वाल्लभ्योपपतपोजनास्तपथोक्त
तानन्त्यत्वात्तासां क्रियाणामनुष्ठितानामन्तवत्त्वे सति पुनरावर्तिनः ।
न मोपुनर्यथोक्तज्ञाननिर्मलभक्तिमात्रैकोपायगम्यपरब्रह्मस्वरूपं परमेश
रसुपेमनादात्म्यप्रतिपत्तिपर्यन्तमाश्रित्य पुनर्जन्मसंसारभ्रमाव्रजन्ति
नेविषयत्वं मामुपेत्य भूयो न जायन्ते इत्युपायजननक्रिययोरेकक
देकत्वमवगन्तव्यम

[illegible] १६ ॥

ननु शास्त्रे [illegible] किञ्चित् ... लासिकी [illegible] टीका धीपरिगणिता सालोक्यं सामीप्यं सार्ष्टिता सायुज्य गृह्यते इत्याशंक्य सायुज्यमेव तद्द्वतनीन्यदि मितिसा... पि जन्म प ... रि

त्याह॥ ब्रह्मलोकग्रहणं विश्वलोकाद्युपलक्षणार्थम् आब्रह्मभुवनाद्
ब्रह्मलोकादीनभिव्याप्य आब्रह्म यावद्ब्रह्मपदं प्राप्तमिति वा यस्मात्
सात्त्विनिर्यण्मूर्धाग्रलाड्कमाप्त्वाग्निविद्यादिभिरानन्तकनव
स्तत्रगतास्तु पिलोकाद्युपिकारिणो जनाः क्रियाणामनन्तत्वान्नरा
वर्तिनो भूयो भूयश्चक्रवत्संनिभ्रमन्तो भवन्ति तर्हि किं त्वयमेवेत
त्वं पृथग्वधारणे वा मामीश्वरं रूपेणमया सह पुष्कात्मत्वेंजन्मशरी
रपरिग्रहो न विद्यते [illegible]
विश्चेतमाह १६ ॥

^ तत्संसार

^ न प्रतिपद्यन्ते ते योगिनः हे कौन्तेय पुनरुत्पन्नम्

पंचोली टीका

सर्वेभ्यो लोकेभ्यः पुनरावृत्तिं दर्शयन्नमेवार्थं द्रढयति आब्र
ह्मेति हे अर्जुन सर्वे लोकाः आब्रह्मभुवनात् सह ब्रह्मभुवनेन
पुनरावर्तिनः पुनरावर्तनस्वभावाः तु पुनः हे कौन्तेय मामेक
मुपेत्य पुनर्जन्म पुनः उत्पत्तिर्न विद्यते १६॥

श्रावीरसमिद्धेधिनी॥

मत्प्राप्तिरेव पुनरावृत्तेरुपायो नान्यत् किं विदिति प्रतिपिपादयिषु
रुक्तमेवार्थं द्रढयति आब्रह्मभुवनादिति ब्रह्मणो भुवनं वासस्था
नं ब्रह्मभुवनं ब्रह्मलोकः प्रकृष्टतपोयज्ञदानादिपुण्यकर्मप्राप्य
त्वमवधिं कृत्वा यानि कानि विद्युण्यकर्मप्राप्यानि लोकान्तराणि स
भवति ते पुनःस्थिताये लोका जनास्ते पुनरावर्तिनो भवंति तत्तल्लोक
प्राप्त्युपायभूतानां तत्तत्कर्मणामनंतत्वात् अनपबोमे साक्षात्
व तत्फलं तेषांत्तद्वत्यत्यमेव मामिति मां पुनरुपेत्य स्ववर्णा॰

श्रमोचितेन कर्मणा मत्सायुज्यं ब्रह्मत्वाप्य पुनर्जन्म भूयः संसारभू
मावुत्पत्तिर्न विद्यते न प्राप्यते कर्माधिकारिभिः कर्मयोगिभिरि
ति भावः विद्वल्लाभेऽप्यस्य कर्मणि तदि. विद्यते प्रतिरूपं तथा व्या
ख्यानेनैव मदुपाय पुनर्जन्मलाभक्रिययोरेककर्तृकत्वात्काप्र
त्ययसमीचीनता यद्वा न विद्यते नास्त्येव मामुपेत्य भूयो न जायं
तइत्युपायजननाक्रिययोरेककर्तृकत्वमप्यवगंतव्यं १८॥

मधुभाष्य

१८॥

भाषा अनुवाद टीका ॥

इस तरह और और लोक मे भी उन भक्तों को पुनर्जन्म का अभाव
देखाय कर अनन्तर आवृत्ति निर्धारण करते है कि हे अर्जुन ब्रह्मा
के लोक पर्यन्त प्राप्त होके भी प्राणी पुनर्वार संसारगामी होते है
क्यों कि ब्रह्मलोक का भी एक दिन नाश है और क्रम मुक्ति जो
कहा है सो किसी विरले को उपासना के द्वारा ब्रह्मलोक मे जा
य ज्ञान प्राप्त होय ब्रह्मा के साथ मुक्ति मिलती है परन्तु हे कौ
न्तेय मद्रूप को प्राप्त मेरे भक्त का पुनर्जन्म तो नहीं होता है १६

दोहा

ब्रह्मभुवन लों लोक फिर अर्जुन जन्महिं देत मोहि मिल
हि जो कुंतिसुत सो फिर जन्म न लेत १६॥

88

सहस्रयुगपर्य्यन्त महर्यद्ब्रह्मणोविदुः रात्रिंयुग सहस्रान्तां तेहोरात्रविदोजनाः १७ ॥

शाङ्करभाष्यटीका

ब्रह्मलोकसहिता लोकाः कस्मात् पुनरावर्त्तिनः कालपरिच्छिन्नत्वात् कथं सहस्रेति सहस्रयुगपर्य्यन्तं सहस्राणि युगानि पर्य्यन्तः पर्यवसानं यस्याह्नस्तदहः सहस्रयुगपर्यन्तं ब्रह्मणः प्रजापतेः विराजोविदुः रात्रिमपि युगसहस्रामहःपरिमाणामेव के विदुरित्याह तेऽहोरात्रविदः कालसंख्याविदो जना इत्यर्थः १७ ॥

आनन्दगिरिकृतटीका

यस्य स्वाभाविकी वैशप्रयुक्ता वा स्थितिस्तस्यैवोक्तेऽर्थे बुद्धिरुदेतीति मत्वा सबुद्धिस्थं ब्रह्मलोकसहितानां पुनरावृत्तौ हेतुः प्रश्नद्वारा दर्शयति ब्रह्मेति उक्तमेव हेतुमाकाङ्क्षापूर्वकमुत्तरश्लोकेन साधयति कथमित्यादिना यथोक्ताहोरात्रावयवमासर्त्वयनसंवत्सरावयवं शतसंख्यापरिच्छिन्नत्वात् प्रजापतेस्तदन्तर्वर्त्तिनामपि लोकानां यथायोग्यकालपरिच्छिन्नत्वेन पुनरावृत्तिरित्यभिप्रेत्य व्याचष्टे सहस्रेत्यादिना १७ ॥

स्वामिकृतटीका

सहस्रयुगानि पर्यन्तोऽवसानं यस्य तद्ब्रह्मणो यदहस्तद्ये विदुः युगसहस्रमन्तो यस्याः तां रात्रिं च ये योगबलेन विदुः त एव सर्वज्ञा जनाः अहोरात्रविदः येषां तु केवलं चन्द्रार्कगत्यैव ज्ञानं ते तथाहोरात्रविदो न भवन्ति अल्पदर्शित्वात् युगशब्दोऽत्र चतुर्युगमभिप्रेतं चतुर्युगसहस्रं तु ब्रह्मणो दिनमुच्यते इति पुराणोक्तेः ब्रह्मण इति च सत्यलोकादिवासिनां उपलक्षणार्थं तत्रायं कालगणनाप्रकारः मनुष्याणां यद्वर्षं तद्देवानामहोरात्रं तादृशैरहोरात्रैः पक्षमासादिकल्पनया

गी
टी॰अ॰ द्वादशभिर्वर्षसहस्रैश्चतुर्युगं भवति चतुर्युगसहस्रं च ब्रह्मणो दिनं ताव
त्परिमाणैव रात्रिः ताहशैरहोरात्रैः पक्षमासादिक्रमेण वर्षशतं ब्रह्म
णः परमायुरिति [illegible] १७ ॥

पिशाचभाष्यटीका

८५ सहस्रयुगपर्यन्तं युगसहस्रप्रमाणं ब्रह्मणो यदहः सहस्रयुगसहस्रप्रमाणं
विदुः ब्रह्मणो रात्रिमपि युगसहस्रान्तां अहोरात्रविदो जनाः ज्ञानिनः
एवं विदुः १७ ॥

रामानुजभाष्यटीका

ब्रह्मलोकपर्यन्तानां लोकानां तदन्तर्वर्तिनां च परमपुरुषसंकल्पकृतामु
त्पत्तिविनाशकालव्यवस्थामाह सहस्रमिति ये मनुष्यादिचतुर्मुखान्तानां
मितसंकल्पकृतामहोरात्रव्यवस्थां विदुस्ते जनाः ब्रह्मणश्चतुर्मुखस्य य
दहः सहस्रमिति चतुर्युगसहस्रावसानं विदुः रात्रिं च तथारूपां १७ ॥

अभिनवगुप्तकृतटीका

ननु कथं ज्ञानी नित्यत्वं भवनेभ्यः पुनरावृत्तिर्ब्रह्मलोकादय एव स्तावच्चिर
तरस्थायिनः श्रूयन्ते तत एव तावत्कथं पुनरावर्त्तिनः पुनरावृत्तिरेवेति तेपि
स्युः अभवाप्ययधर्माण इत्याह १७ ॥ सहस्रेतितिभिः स्पष्टार्थम्

परमार्थप्रपा टीका ॥

अथ सत्यलोकव्यवहारमाह सहस्रेति यद्ब्रह्मणो यस्य ब्रह्मणः सह
स्रयुगानि पर्यन्तोऽवसाने यस्य एवंविधमहः दिनं विदुः तथैव यु सहस्रा गऽ
न्तां रात्रिं विदुः एवमहोरात्रे सोपपत्तिकत्वेन ये विदुस्ते जना अहोरात्र
विदः ॥ देवोऽपि सहस्रयुगपर्यन्तमहर्ब्रह्मलयं पश्यतीति अयमर्थः
सं॰ कृतत्रेताद्वापरकलिसंज्ञकैश्चतुर्भिश्चरणैरेकैकमहायुगं तानि सह
स्रमितानि ब्रह्मणो दिनं तावत्प्रमाणैव रात्रिः तत्र सूर्यदर्शनादर्शननि
मित्ते दिनरात्रे भवतः एवं सत्यलोकस्य सर्वलोकोपरि तयोर्हेः स्थि
तत्वात् तत्रत्याः सहस्रयुगपर्यन्तं सूर्यं पश्यन्ति तावदेव तेषां जाग्र
दवस्था अनन्तरं तावत्कालमेव तेषां सुषुप्तिस्तत्र न पश्यन्ति उक्तं च

यदस्तिदूरगतोऽनुहिमांशुः स्थितेः सततमाब्रह्मलयं रविमीक्षते भवतितावदयं
शयितस्ततयुगसहस्रयुगं तु निशाविपरीतेति एवमेव हिशिरस्थितयनानादेवा
नां सौरवर्षमितमहोरात्रं पितॄणां तु चान्द्रमासेन मिते तथा लोकायमको
टिसिद्धपुरस्थितानां नित्यं त्रिंशद्घटीतुल्यं दिनं तावत्येव रात्रिः एवमेतेषु दे
शेष्वरकालाभावादिनरात्र्योः समत्वं इतरदेशेषु चावशाद्दिनरात्र्योर्ह्रास
वृद्धी भवेतां तेन प्रतिदेशं भिन्नाहोरात्रव्यवस्था एवं यावदुत्कृष्ट मितात्र्य स्प४
होरात्राष्टविंशतिमितालंबांशाभवन्ति ततो नन्तरं वराद्दिव्यवहाराभावः
स्प१ श्रुतिरपिऋग्वेदे अपेत्यवह [illegible] भ्यस्पदेति विश्वरूपे अहनी संचरेते परिक्षि स्प४
तो स्मो मागुहायु रयोऽदुघाः शोशचतारथेनेति भाष्ये विश्वरूपे बहुरूपे अ।
हनी अहोरात्रे संचरेते सा तव्यवधानेन चरत अहस्य कृष्णमहरर्जुनेवेत्स्कृ
त्वात् उभयोरहः शब्दवाच्यत्वं तयोर्मध्ये अन्यद्रात्रिरूपं अहः अपैति प्रति
लोमं गच्छति अन्यद्दिवाख्यं महः अभ्येति आभिमुख्येनागच्छति परिक्षि
तोः पर्यायेणानिवसतोः प्राणिनामायुः क्षपयतो वा तयोरन्या रात्रिस्तमस
भोगमागुहायत्रार्थं गूहनं करोति अन्या अहः शोशचता शोभमानेन रथेन
अयो तत्प्रकाशयति एवं परिदृष्टे व सत्यलोकादिषु स्वस्वाहो रात्रपरिभाष
या मासवर्षादिकल्पनापि तथा च स्वस्ववर्षपरिभाषया ब्रह्मणः शतवर्षमा।
युः स महाकल्पः तदुक्तं शतायुः शतानंद एवं प्रदिष्टस्तदायुर्महाकल्पइ
त्यकमाध्येः यतो नादिमानेष कालस्ततोऽहं न वेद्मि अत्रयधोऽद्भवाये गतास्ता
न्तृ इत्यादिमन्नसिद्धत्वोक्तं पुनरावर्तिनइति तथा अहोरात्रविदइत्यनेनम
हाकल्पावान्तरकल्पमनुयुगचरणशाकवर्षायनर्तुमासपक्षाहोरात्रया
मनाडीविनाडीप्राणत्रुट्यादिकालावयवाभिज्ञत्वेन गोलज्ञा इत्युक्तं ले ।१७

वनमाली टीका ।।

ब्रह्मलोकेन सह सर्वे लोकाः पुनरावर्तिनः कालपरिच्छिन्नत्वादित्याह सहस्रे
ति सहस्रं युगानि चतुर्युगानि [illegible] पर्यन्तो वसाने यस्य तत् चतुर्युग
सहस्रं तत् ब्रह्मणो दिनमुच्यते इति पुराणवचनं तादृशं ब्रह्मणः प्रजापते र
हर्दिनं ये विदुः तथा रात्रिं युगसहस्रान्तां चतुर्युगसहस्रपर्यन्तां विदुरित्यन
३१ वर्तते ते अहोरात्रविदः तएवाहोरात्रविदो योगिनो जनाः ये तु चन्द्रार्कगत्यैव
विदुर्न ते अहोरात्रविदः स्वल्पदर्शित्वादित्याशयः १७ ।।

कृष्णमैवेजयन्ती टीका

ननु कुतो हेतो राब्रह्मभुवनाल्लोकाः पुनरावर्तिनः सृष्टयश्चैते षांपुनरागत्या
तिं केजानंतीत्यपेक्षायां तेषामहोरात्रादिप्रमाणेनैव द्वाराकालपरिच्छिन्न
रूपं हेतं तन्ज्ञानार्थं चाह सहस्त्रयुगपर्यंतमिति महोजनस्तपः सत्यलोक
निवासिनो ये जनाः ब्रह्मणः अतन्तोस्य सहस्त्रयुगपर्यंते सूर्यगत्यनु
सारेणपरमाणुक्षणक अणुकलवघटीयाम दिनपक्षमासादिक्रमे
णमनुष्याणांयदहर्यत्तदेवानामहोरात्रंतादृशैर्देवानामहोरात्रैः पक्ष
मासादिगणनयाद्वादशभिर्वर्षसहस्रैस्तच्चतुर्युगंचतुर्युगानांसहस्रंसह
स्त्रयुगंतस्यपर्यंतंपरिमितंयदहोदिनंतद्विदुर्जानंतितथातद्वद्दिवसा
दिक्रमेणयुगसहस्रांतचतुर्युगसहस्रपरिमितांतांब्रह्मसंबंधिनींरात्रिं
विदुस्तएवजनाअहोरात्रविदो दिनरात्रिज्ञातारोनत्वन्येसामसूर्यादि
गतिमात्रविदो ब्रह्मणः सहस्रयुगपरिमिताहोरात्रत्वाद्धेतोस्तलोकाः
तत्पिस्तुरित्यवंज्ञात्वा ब्रह्मातलोकस्यास्तेजनाःस्यपतनभयात्तत्रपक्ष
त्वित्तत्यामवंतीतिभावः १७ ॥

ब्रह्मलोकसहिताः सर्वे मधुसूदनी टीका लोकाः पुनरावर्तिनः कस्मात्कालपरि
च्छिन्नत्वादित्याह ॥ मनुष्यपरिमाणेन सहस्रयुगपर्यंतं सहस्रंयुगानि चतुर्युगानि पर्यंतो
वसानंयस्य तत् चतुर्युगसहस्रंत ब्रह्मणो दिनमुच्यते इतिह्येवं पौराणिक
वचनं तादृशं ब्रह्मणः प्रजापतेरहर्दिनं येविदुः तथा रात्रिंयुगसहस्रां
तांचतुर्युगसहस्रपर्यंतां ये विदुस्ते एवं वदंतितेऽहोरात्रविदः तएवा
होरात्रविदोयोगिनःजनाः येतुचंद्रार्कगत्यैव विदुः तेनाहोरात्र विदः
स्वल्पदर्शित्वादित्यभिप्रायः [illegible]

[illegible] १७ ॥

सदानंदी टीका ॥

लोकाः कालपरिच्छिन्नतया सर्वे विनश्वराः मत्प्राप्तिव्यतिरेकेण स्वतंवेत्या
हमाधवः सहस्राणि युगान्येवमस्यपर्यवसानकं तदहिनं ब्रह्मणः सह
स्त्रावतीरात्रिरिष्यते प्रजापतेर्दिनरात्रीविदुर्ये योगिनो जनाः अहोरा
त्रविदस्तेस्यनैतरे स्वल्पदर्शिनः १७ ॥

नीलकंठीटीका

आवृत्तिभाजांकालपरिच्छेदमाह सहस्रेति युगशब्दोत्र चतुर्युग
पर्यायः चतुर्युगसहस्रंतद्ब्रह्मणोदिनमुच्यतइति पुराणांतरद
र्शनात् सहस्रंचतुर्युगानिपर्यंतोवसानंयस्यचतुर्युगसहस्रंब्र
ह्मणोदिनं रात्रिरपितावतीमाह रात्रिमिति अत्रापिचतुर्युगस
हस्राणांअंतेभवतितांचतुर्युगसहस्रांतां तेप्रसिद्धअहोरात्रविदो
जनाविदुः १७ ॥

आनन्दीटीका

एतदेवप्रपंचयति ॥
दिव्ययासंख्ययाचतुर्युगानांसहस्रंपर्यंतोवधिर्यस्य १७ ॥

अथकथंब्रह्मलोकवासिनो रामकंठीटीका पिपुनरावर्तन्तेन पुनर्मामुपपन्नाइत्यत्रक्रमेणकारण
माह ॥ येत्रागरस्यमायवस्थाहेतुभूतसूर्योदयास्तमयोपलक्षितमेवका
लविशेषमहोरात्रतयामन्यन्ते ततेनत्वतोंऽहोरात्रस्वरूपज्ञाः ये
नब्रह्मणः प्रजापतेर्दिव्यसंख्ययाचतुर्युगसहस्रंपर्यन्तोवधिर्य
स्यतावत्प्रमाणमहर्वासरंविदुर्जानंतितावत्परिमाणामेवचरात्रिं
तेतत्त्वज्ञा अहोरात्रविदः किमनेनोक्तंभवति यथास्मदीयानांति
काथम्वच्छिन्नःकालोहोरात्रः न तथाब्रह्मलोकवासिनांचतुर्युगस
हस्रद्वयावच्छिन्नःकालोहोरात्रः ततश्चयथास्मदीयाःस्वाहोरात्रसंख्य
याकलितंवर्षशतंपुरुषायुषमतिवाह्यपुनर्देहान्तरंभजन्तीतिह
थवस्या तथाब्रह्मलोकवासिनोपियथोक्तपरिमाणावच्छिन्नाहो
रात्रकलनयावर्षशतंपुरुषायुषमतिवाह्यपुनर्देहान्तरंभजन्तेइ
तिकर्मभूमिभाजामस्मदीयानांब्रह्मलोकवासिनांचपुण्यकर्मणामहो
रात्रादेःपुरुषायुषपर्यन्तस्यकालस्यन्यूनाधिक्यकृतोविशेषः नत
त्स्वरूपेतेषांकश्चिद्विशेषः ततोयथास्मदीयाःपुनरावर्तन्तेतथाब्र
ह्मलोकान्तरवासिनोपितत्कालपरिमाणेनपुरुषायुषमतिवाह्य
पुनरावर्तन्तेरमाब्रह्मभुवनाल्लोकाःपुनरावर्तिनःरमुक्के तेनेद
मत्रतात्पर्यम् यथोक्ततानमस्मपुण्यक्रियाविशेषानुष्ठानलभ्यका
लावच्छेदलब्धभोगाधिकरणेब्रह्मलोकादौविवेकिनानसेव्यं।

गी॰
टी॰
अ॰

स्याविप्रलब्धेन भवितव्यं सोऽपि विशिष्टज्ञानमात्रभोगसंबन्धान्तं सा
वेषवयुगसहस्रपरिमाणमपि कालदैर्घ्यमन्तवत्त्वान्मर्त्याहोरात्रवत्त्वा
तिरिच्यत इति यथोक्तं युगसहस्रद्वयपरिमाणं कालमहोरात्रत्वेन
ये मन्यन्ते ते होरात्रविदो जना इत्युक्तं [illegible]
[illegible] गोपदेश्या
[illegible] पदेशमाह १७ ॥

ननु कथं सायुज्यस्ये सकालपरिच्छिन्नत्वा लासिकी [illegible]गीटीका ^चतुर्युगानि वस्तुकित्वं नान्यस्येत्याशंकातः द्विनाशावच्छिन्नत्वम् नसा

युज्यरूपस्य मद्भावस्यान्यस्य नमुक्तित्वाध्यारोपश्चिरतर कालस्थायिनोयेति तेषां कालपरिच्छेदमाह ॥ +

मनुष्यकालपरिमाणेन सहस्रं युगानि पर्यन्तो वसानं यस्य तम्
हः शयद्ब्रह्मणो यदहस्तद्ये विदुः प्रमाणेनावधारयन्ति तथा ब्रह्म
णो रात्रिं चतुर्युगसहस्रपर्यन्तां ये विदुस्ते जना अहोरात्रविदः नात्ये
स्वल्पदर्शिनो नालिकाद्यवच्छिन्नकालज्ञा अहोरात्रविदः तथा
च मनुः चतुर्युगसहस्रं तद्ब्रह्मणो दिनमुच्यते तदन्तं भवति ब्रह्म
लोकादिभुवनवासिनामपि स्वस्वपरिमाणेन कालावच्छिन्नत्वात्
वर्षशतं पुरुषायुषमिति वा यदेहान्तरं भजन्ते इत्यतस्तेषां मुक्तित्व
निर्देशः अत उक्तम् आब्रह्मभुवनाल्लोकाः पुनरावर्तिन इति हाट।
प्राभिर्दिव्यैर्वर्षसहस्रैश्चतुर्युगं भवतीमत्र महाभारतम् चत्वार्या
हुः सहस्राणि वर्षाणां तत्कृतयुगम् तस्य तावच्छती सन्ध्या सन्ध्यांश
श्च तथाविधः तथा वर्षसहस्रे द्वे द्वापरे परिमाणतः तस्यापि द्विशती
सन्ध्या सन्ध्यांशश्च तथापरः सहस्रमेकं वर्षाणां तथा कलियुगं स्मृ
तम् तस्य वर्षशतं सन्धिः सन्ध्यांशश्च तथापरः सन्धिसन्ध्यांशयोस्तु
ल्यप्रमाणमवधारयेति अथ ब्रह्मणो दिनमानं प्रदर्श्यते उदाहर
णेन तत्र चतुर्युगपरिमाणं पार्थ्येकेन सिद्धान्तशिरोमणौ खखा
भ्रदन्तसागरैरित्यादिनोक्तम् खखाभ्रदन्तसागराः ४३२··· ।
सौरमानेन वर्षराश्यन्तर्भिर्गुणिताः १७२८··· कृतनामप्रथ
मो युगचरणः एवं खखाभ्रदन्तसागरास्त्रिभिर्गुणितास्त्रेताभि
धानो द्वितीयो युगचरणः १२९६··· एवं द्वाभ्यां गुणिताः ८६४···

^ त्रीणि वर्षसहस्राणि त्रेतायुगमिहोच्यते तस्य तावच्छती संध्या संध्यांशश्च तथापरः

[illegible]

द्वापरस्तृतीयो युगो त्रिः ४३२··· कलिर्नाम चतुर्थो युगश्चरणः एवं
स्वद्वादशांशप्रमितनिजनिजसन्ध्यायुक्ता मनुष्यकालपरिमाणेनोक्ताः
एवं चतुर्णां चरणानां योगे यावत्कालः स्यात् ४३२···· तावद्युगस्य
प्रमाणम् एतदेव सहस्रगुणम् ४३२········ जातं ब्रह्मणो दिनम
सृष्टिकल्पः एतावत्येव युगसहस्रमिता रात्रिः ४३२········ संहा
रकल्पः एवं कल्पद्वयपरिमितं ब्राह्ममहोरात्रम् ८६४········
एवं ब्रह्मणो मासवर्षादिकमनीयम् एवं महाभारतोक्तक्रमे
ण ब्राह्मणो दिनमुदाक्रियते मनुष्याणां वर्षं देवानामहोरात्रम् देवानां वर्षं एवं मनुष्य
तद्देववर्षमधिकमनुष्यवर्षं त्रिंशतागुणितं जातम् ३६०, ततः स वर्षमानेन देवानां वर्षं
हस्रा ४··· गुणितं जातम् १४४···· कृतयुगपरिमाणम् पुनः ३६०
देवानां वर्षम् ३६० ततः शतागुणितम् १४४··· आदावन्ते च स
न्ध्याया विद्यमानत्वाद्द्विगुणितम् २८८··· जाता कृतयुगस्य स
न्ध्या कृतयुगप्रमाणम् १४४···· सन्ध्याप्रमाणयोः २८८···
संयोगे जाते सन्ध्यायुतं कृतयुगपरिमाणम् १७२८··· देवानां व
र्षम् ३६० त्रिःसहस्रागुणितम् १०८···· जातं त्रेतायुगपरि
माणमेवं देववर्षम् ३६० त्रिंशन्मागुणितम् १०८··· द्विगुणम् २१६···
जाता त्रेतायुगसन्ध्या सन्ध्यायुगप्रमाणयोः योगे जाते १२९६···
त्रेतायुगपरिमाणं सन्ध्यायुतम् एवं द्वापरयुगपरिमाणं सन्ध्यायु
तम् ८६४··· कलियुगपरिमाणं ४३२··· एवं ब्रह्मणो होरात्र
परिगणनेन विष्वादीनामप्यहोरात्रे शास्त्रपरिगणितम्।
न तद्विस्तरभयादिह वितन्यते [illegible]
[illegible] १७ ॥

पंचोली टीका

ब्रह्मलोकपर्यन्तानां कालपरिच्छिन्नत्वात्तत्रगतानामावर्तनं न भ
गवत्स्वरूपस्य कालास्पृष्टत्वात् तत्रगतानामावर्तनेत्यतिवि
शेषं दर्शयन्ब्रह्मणोऽहोरात्रयोः प्रमाणमाह सहस्रेति य

ब्रह्मणः प्रजापतेः वैराजस्य सहस्रयुगपर्यन्ते सहस्रयुगा
नि पर्यन्ताः पर्यवसाने यस्य अहः तदहः सहस्रयुगपर्यन्तं विदुः
रात्रिमपि तावत्प्रमाणां विदुस्ते जनाः अहोरात्रविदः अतो ब्रह्म
णोऽपि कालपरिछिन्नत्वान्नगहतिरस्ति १७ ॥

रणवीरसमिद्धोधिनी ॥

अथ कथं ब्रह्मलोकवासिनोऽपि पुनरावर्तन्ते न तु न मत्प्राप्ता इ
त्यत्र क्रमेण कारणमाह सहस्रेति यद्यपि कालविभुर्नित्यता
न्यथानुपपत्त्यान्यायसिद्धैकरूपस्तथैवकच्छेदः कर्तुं न शक्यते त
थापि तत्तद्बद्दिनिमेषोन्मेषाद्युपाधिवशात्सूक्ष्मो जागरस्व
माधवस्थादेवभूतसूर्योदयास्तमयाद्युपाधिवशात्स्थूलोवच्छे
दः कर्तुं शक्यतएव स च मितिरोदयास्तमयोपलक्षितः काल
विशेषो मनुष्यपरिसंख्याने नाहोरात्रतया व्यवह्रियते तेच मनु
ष्यसंबंधिनः पक्षाधिकत्रिंशतीपरिमिता अहोरात्रास्तेषां वर्ष
भवति तदेव च देवोऽहोरात्रः विंशतिसहस्राणि चत्वारिंशल्ल
क्षवर्षाणि मानुषं युगं च चतुर्थं एकसप्ततियुगं च मन्वंतरं ता
नि चतुर्दश ब्राह्मो अहोरात्रः ताद्दशोश्चाहोरात्रैः पक्षमासादिक्रमे
ण वर्षशतं ब्रह्मणः परमायुरिति तथा च भास्कराचार्यः योक्षुण
निमेषस्य खराम भागः स तत्परस्तच्छतभागउक्ता त्रुटिर्नि
मेषैर्धृतिभिश्च काष्ठा तत्त्रिंशता सद्गणकैः कलोक्ता १ त्रिंशत्
कला नाडिकाः घटिका क्षणःस्यात्राडीद्वयं तैःखयुगैर्दिनं च गुर्वक्षरैः
खेंद्रमितैरसुस्तैः षड्भिःपलं तैर्घटिका खषड्भिः २ स्याद्वा घटीषष्टि
रहः खरामैर्मासो दिनैस्तैर्द्विकुभिश्च वर्षं चैत्रं समाद्येन समाविभा
गाः सुसक्रराश्यंशपाकलाविलिप्ताः ३ रवेश्चक्रभोगोऽर्कवर्षं प्र
दिष्टं युगाब्दं च देवासुराणां तदेव रवीन्द्वोर्युतेस्संयुतिस्तावदन्याः वि
धोमासस्तत्पितृपैत्रं युगाद्यं ४ भ्रनोदयद्वयांतरं तदर्कसावनं दिनं
तदेव मेदिनीदिनं भवासरश्च भ्रमः ५ खखाभ्रदंतसागरैर्युं.

गाम्रिपुग्मभूगुणैः क्रमेण सूर्यवत्सरैः कृतादयो युगांघ्रयः ८
ससंधिकास्तदंशकै निजार्कभागसंमिते युताश्चतयुतो भवेद्वय
क्षयोयुता दृताः ७ मनुः तमानगोऽपुगैर्युगै र्भविष्यते र्भवेत् दि
नेसरोजजन्मनो निशा च तत्प्रमाणिका ८ स पयः स्फुमेनूनां कृता
द्यैः समासमादिमध्यावसानेषु तैर्मिश्रितैः स्याद्युगानां सहस्रं दिने
वेदसः सोपि कल्पो युगानैव कल्पद्वयं ९ मातायुः मातानंदपवं
प्रतिष्ठतस्य पुर्मदूः कल्पत्रयं तु क्षपाधेः यतो नादिमानेष कालः
ततोऽदूनवेद्ययपयोद्वाथगतास्तान् १० इति कौशिकमतेन ना
त्यिकमपि तथा चामरः मासेन स्यादहोरात्रः पैत्रो वर्षेण दैवतः दै
वे युगसहस्रे द्वे ब्राह्मणः कल्पौ तु तौ नृणामिति अयं चोपाधिके
कालावच्छेदे सिद्धे देवपरिमाणेन सहस्रयुगपर्यंतं सहस्रयुगा
नि व्याप्य पर्यंतो ऽस्येति सहस्रयुगपरिमाणमहो दिनं ब्रह्म
णः प्रजापतेः संबंधि ये जना विदुः तथैव युगसहस्रपरिमाणं
रात्रिं ये विदुस्ते जना अहोरात्रविदः कथ्यंत इति शेषः न तु सूर्या
दस्म यो पलक्षिताहोरात्रज्ञा अपि किमुक्तं भवति यथा मनुष्या
णां षष्टिघटीपरिमितः कालो ऽहोरात्रस्तथा ब्रह्मलोकवासिनां च
तु युगसहस्रद्वयावच्छिन्नः कालोऽहोरात्रः ततश्च यथा मर्त्याः
स्वाहोरात्रपरिसंख्यया परिकल्पिते वर्षशतं पुरुषायुषमति
वाह्य देहांतरं भजंते तथा ब्रह्मलोकनिवासिनोपि स्वयोक्तपरि
माणावच्छिन्नाहोरात्रकलनया वर्षशतं पुरुषायुषमतिवाह्य
पुनर्देहांतरं भजंतीति कर्मभूमिभाजां मर्त्यानां ब्रह्मलोकनिवा
सिनां च पुण्यकर्मकारिणां महोराद्यादेः पुरुषायुषपर्यंतस्य
कालस्य ह्रासवृद्धिकृतो विशेषः न तु संसारित्वे तेषां कश्चिद्विशेषः
ततो यथा मर्त्याः पुनरावर्तंते तथा ब्रह्मलोकांतरनिवासिनोपि
स्वकालपरिमाणेन पुरुषायुषमतिवाह्य पुनरावर्तंते इत्या
ब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन इत्युक्तं तेनेदमवतार्यं

गुणक्रियाविशेषांतरानुष्ठानतन्मध्येकालावच्छेदतत्फलभोगादि
करणे ब्रह्मलोकादौ बुद्धिमतां स्थेयीस्याविप्रलब्धेन न भाव्यं
सोपि हि संसार एव किं तु मां शरणीकृत्य स्ववर्णाश्रमोचितवि
हितकर्माण्यनुष्ठाय तत्फलं च मय्येव समर्प्य नित्यमहं ध्येवा
पोसाकार्येति १७॥

मधुभाष्य

93 सहस्रयुगेत्यादिना सहस्रशब्दो अनेकवाची ब्रह्मपरं सावि
स्वरूपस्य रजनीति श्रुतिः हि परार्द्धप्रलय एवाशवविवक्षितः
अव्यक्तोक्षर इत्युक्तः उक्तं च महाकोशे अनेकगुण
पर्य्यंतमहद्विंशोक्तथानिष्पा तथाशेलीयते सर्वमहृताद्दे
व जायते इति च यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति अव्य
क्तो भगवान् यं प्राप्य न निवर्तंत इमामुपेत्य तु कस्य परमप्रा
न् अव्यक्तं परमं विष्णुमिति प्रयोगाच्च गारुडे धाम स्वरूपं तेजः
स्वरूपं च यद्वदं धामैर्यामेति कथनं इत्यभिधानात् परमसा
धनमाह ७

भाषा अनुवाद टीका ॥

और जो कहते कि तपस्वी ज्ञानी विगतराग औ क्षमाशील लोग त्रैलोक के ऊपर शोकरहित स्थान को प्रस्थान करि वास करते हैं इस पुराण के वचन से महर्लोक आदि लोकों की और लोक से उत्तमता मालूम होती है परन्तु विनाश तो सबका है इस पक्ष मे सब की अपकृष्टता ही है हां विशेष यही कि वे लोक बहुत दिन तक स्थिर रहते है और ब्रह्मा की अपने वर्ष से सौ वर्ष की आयु है और त्रैलोक अर्थात् स्वर्ग मर्त्य पाताल ये ब्रह्मा के प्रात दिन मे उत्पन्न औ प्रति रात्रि मे प्रलय होते है ब्रह्मा का एक दिन मनुष्य के हजार चतुर्युग का होता और उतनी ही रात्रि है और मनुष्य का एक वर्ष देवतो का रात्रि दिन है इस हिसाब से देवतो के बारह हजार वर्ष मे चारि युग होते है जो यह जानते सोई सर्वज्ञ है और जो चन्द्र सूर्य की गति को रात्रि दिन जानते वे नहीं जानते हैं १७ ॥

दोहा

युग सहस्र पर्यंत जो ब्रह्मा को दिन जान हो सहस्र युग अंत सों रात दिवा अनुमान १७॥

੯੫

अव्यक्ताद्व्यक्तयः सर्वाः प्रभवन्त्यहरागमे । रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञके १८

शाङ्करभाष्यटीका

यत एवं कालपरिच्छिन्नास्तेऽतः पुनरावर्तिनो लोकाः प्रजापतेरहनि यद्भवति रात्रौ च तदुच्यते अव्यक्तेति अव्यक्तादव्यक्तं प्रजापतेः स्वापावस्था तस्मादव्यक्तात् व्यक्तयो व्यज्यन्त इति व्यक्तयः स्थावरजङ्गमलक्षणाः सर्वाः प्रजाः प्रभवन्त्यभिव्यज्यन्ते अह्न आगमोऽहरागमः तस्मिन्नहरागमे काले ब्रह्मणः प्रबोधकाले तथा रात्र्यागमे ब्रह्मणः स्वापकाले सर्वा व्यक्तयस्तत्रैव पूर्वोक्तेऽव्यक्तसंज्ञके १८

प्रलीयन्ते

आनन्दगिरिटीका

अहर्वर्णनमुक्त्वा तात्पर्यार्थमाह यत इति यत्प्रजापतेरहस्तद्युगसहस्रपरिमितं याव तस्य रात्रिः सापि तथेति कालविशेषमभिप्रायमनुस्मृत्य ब्राह्मस्याहोरात्रस्य कालपरिमाणं दर्शयित्वा तत्रैव विभज्य कार्यं कथयति प्रजापतेरिति अव्यक्तमव्याकृतमिति शङ्कां वारयति अव्यक्तमित्यादिना जातिप्रतियोगिभूता व्यक्तीर्व्यावर्तयति स्थावरेति अहरुत्पत्तिप्रसक्तिं प्रत्यादिशति अभिव्यज्यन्त इति पूर्वोक्तमव्यक्तसंज्ञके स्वापावस्थं ब्रह्म प्रजापतिशब्दितं तस्मिन्निति यावत् १८ ॥

ततः किमत आह ॥

स्वामिकृतटीका

कार्यस्याव्यक्तरूपं कारणमव्यक्तं तस्मादव्यक्तात्कारणाद्व्यक्तयः अभिव्यज्यन्ते इति व्यक्तयश्चराचराणि भूतानि प्रादुर्भवन्ति कदा अहरागमे ब्रह्मणो दिनस्योपक्रमे तथा रात्र्यागमे तस्मिन्नेवाव्यक्ते संतके कारणरूपे प्रलयं यान्ति यद्वा नेहाहोरात्रविद इत्येतच्च विधीयते किंतु ते प्रसिद्धा अहोरात्रविदो जनाः ये ब्रह्मणो अहर्विदुः तस्याह्न आगमे अव्यक्तात्व्यक्तयः प्रभवन्ति या च रात्रिं विदुः तस्या रात्रेरागमे प्रलीयन्त इति द्वयोरन्वयः

१८

पिशाचभाष्यटीका

अव्यक्तात्प्रकृतेः व्यक्तयः महदाद्याः प्रभवंति अहनि अह्निसंजायंते रात्र्यागमे रात्रौ प्रलीयंते लयं गच्छंति तत्रैवाव्यक्तसंज्ञिके प्रकृतौ १८ ॥

रामानुजभाष्यटीका

तत्र ब्रह्मणोहरागमे त्रैलोक्यांतर्वर्तिनो देहेंद्रियभोग्यभोगस्थानरूपाव्यक्तयस्तन्मुखविदेहावस्थादव्यक्तात्प्रभवंति तत्रैवाव्यक्तावस्थाविशेषे तन्मुखविदेहरात्र्यागमसमये प्रलीयंते १८ ॥

अभिनवगुप्तकृतटीका स्पष्टार्थं १८

परमार्थप्रपा टीका

अथ यदर्थमेतावानुपक्रमस्तदाह अव्यक्तादिति द्वाभ्यां कार्यस्याव्यक्तरूपे कारणात्मके तस्मादव्यक्तात्कारणरूपात्सकाशात्सर्वाः नानानामरूपकर्मात्मकाः व्यक्तयः स्वरूपाणि अहरागमे ब्रह्मणोजाग्रदवस्थायलक्षितेदिनारंभेप्रभवंति प्रादुर्भवंति तथातस्यैवसुषुप्त्युपलक्षितेरात्र्यागमे तत्रैवाव्यक्तसंज्ञके विलीयंते यस्यकस्यचित्कार्यस्यास्वकारणेलयइतिप्रसिद्धं अस्मिन्नर्थे शातपथ्यः श्रुतयः पूर्वंदर्शिताएव इदानीमृक्शाखीयाः श्रुतयश्च ऋतंच सत्यंचाभीद्धात्तपसोध्यजायत ततोरात्रिरजायत ततः समुद्रोअर्णवः समुद्रादर्णवादधि संवत्सरोअजायत अहोरात्राणि विदधद्विश्वस्य मिषतो वशी सूर्याचं
४८ द्रमसौ धाता यथापूर्वमकल्पयत् दिवंच पृथिवींचांतरिक्षमथोस्वरिति भाष्यं ऋतं सत्यसंकल्पः सत्यं यथार्थभाषणं अभीद्धाद्दीप्ततः प्रकाशमानात्परमेश्वरात् अध्यजायत अधिकत्वेनोत्कर्षेणाजायत प्रथमं जगत्स्रष्टव्यमिति सत्यसंकल्पः अनंतरं बहुस्यां प्रजायेयेति सत्यप्रतिज्ञा सेत्यर्थः किंभूतादभीद्धात् तपसस्तपोरूपात् स्पष्टार्थं तपः कृतवतः स तपस्तप्यत स तपस्तप्त्वेति श्रुतेः ततो रात्रिरजायत रात्रिशब्देन कालउपलक्षितः स्पष्टं निमित्तभूतः कालोभिविभूतः ततोनंतरं समुद्रयति व्याप्नोतीति समुद्र आकाशदिगादि

पदार्थः आसीत् ततोर्णवः सागरः आसीत् ततः पूर्वोक्तकारणरूपकाला
त् संवत्सरः सूर्यादीनां वर्षाहोरात्रनिमित्तभूतः समयोपाधिरूपः संवत्सरा
त्मकः प्रजापतिरजायत तस्य एव संवत्सरः प्रजापतिः षोडशकल इति श्रु
तेः ततोऽहोरात्रादिकं यानि सृष्ट्या यथा पूर्वं श्राविणं दिनादेर्यथाऽकल्प
यत् तथैवाधुनैव दिनादेरवकल्पयत् कल्पितवान् किं तदहोरात्राणि
तत्कारणभूतो सूर्याचन्द्रमसौ दिवं पृथिवीमन्तरिक्षमाकाशं स्वः स्वर्लो
कं च किंभूतः मिषतो जागरादेर्यदेः पश्यतो विश्वस्य सर्वलोकस्य वशी वश
वर्ती स्वतएव यथा पूर्वं दर्शयतीत्यर्थः अनया दृष्टप्रपंचं वस्तु कालपनिक
त्वमुपपादितं तथाहि नवो नवो भवति जायमानो ह्नां केतुरुषसामेत्य
ग्रमिति भाष्य जायमानः प्रादुर्भूतोऽह्नां केतुः सूर्य उषसां प्रातःकालानां
मग्रमुदयाचलमस्तकमुपेत्य प्राप्य नवो नवो भवति नवो नवः एवोऽन्य दिने
तथा कश्चिदोपनिषत् अथैष ह्येको भवति यत एष उदेति सूर्यो ऽस्तं यत्र
च गच्छति प्राणाद्वा एष उदेति प्राणेऽस्तमेति तं देवाश्चक्रिरे धर्मं स एवा
द्य स उ श्व इति भाष्यं सूर्योऽनन्तो वत्सरादिकमात्मानं भवेत्तोपगुप्यतीति किं
त्वसदेव विषयीकरोतीत्यत्रोपपत्तिः श्रुतिर्विदर्शयति तदेष ह्येको भ
वतीति तत्रार्थः एष श्लोको वेदोपनिषद्भः प्रसिद्धो मन्त्रोऽस्तीत्याह सूर्य इ
ति सूर्यो यत्रास्तं गच्छति यतश्च उदयं प्राप्नोति तत्किंवस्त्विति विचार्यमाणे
एष सूर्यः प्राणात् प्राणात्मनः सकाशादुदयं प्राप्नोति तस्मिं
स्मिन्नेव प्राणेऽस्तमेति लयं प्राप्नोति एवं सति ध्यानं यत् ध्यानं प्रकाशयति ते
देवाश्चक्षुरादयाः स्तत उदयास्तलक्षणं धर्मं नैसर्गिकं चक्रिरे मेनिरे कथं स
एवाद्य सैव श्व समुदितस्तथा समनक्रमः श्व इतरदिन इति अत्र तद्रूपं भवति प्र
त्यहमनुभूयमानो सूर्योदयास्तो न पारमार्थिको किं त्वौपाधिको नेत्रगा
ना उदयास्तो सूर्ये कल्प्यते नवस्तुतः न स्यहमुदितो स्तमितो वा तिष्ठेयो
वेति तद्रूपं विचार्यमाणे तरणाविवाहतीति १८ ॥

वनमाली टीका

यथोक्ताहोरात्रैः पक्षमासादिगणनया मानुषीणां वर्षशतं प्रजापतेः परमायुः
इति कालपरिहृतत्वान्न लोकानां नराहमिंषुकैवंततो वाचीनानां तद्दह

गी॰
टी॰ अ॰

मोत्रपरिच्छिन्नत्वात्सुतरां पुनरावृत्तिरित्याह अव्यक्तादिति दैर्दिनसृष्टिप्रलययोरुपक्रान्तत्वात्तत्राकाशादीनां सत्त्वादव्यक्तपदेन त्रिगुणसाम्यावस्थप्रधानं नोच्यते किंतु प्रजापतेः स्वापावस्थैव तस्याश्चाव्यक्तात् प्रजापतिस्वापाकालावच्छिन्नतया स्थितात् प्रधानात् अहरागमे प्रजापतेः प्रबोधकाले प्रभवंत्यभिव्यज्यंत इत्यर्थः रात्र्यागमे तस्य स्वापकाले सर्वा व्यक्तयः प्रलीयन्ते तिरोभवंति यतआविर्भूतास्तत्रैवाव्यक्तसंज्ञके यद्वाहोरात्रे हरेरेव गृह्यते अव्यक्ताद्धरेरेव तदहरागमे सृष्टिकाले समागते लूनायास्तत वपुर्वहरेर्निमित्तकारणरूपात्प्रधानमहदाद्याः पदार्थाः प्रभवंत्यभिव्यज्यन्ते रात्र्यागमे प्रलयकाले समागते तत्रैवाव्यक्तसंज्ञके हरौ सर्वे पदार्थाः प्रलीयन्ते सहस्रयुगशतो द्विपरार्द्धात्मकाललक्षकः प्रकृतिर्याममयाव्यक्ता व्यक्ताव्यक्तस्वरूपिणी पुरुषस्याप्यभावे तौ लीयेते परमात्मनि परमात्मा च सर्वेषामाधारः पुरुषोत्तमः सर्वविस्तरनामा वेदेषु च गीयते द्विपरार्द्धात्मकः कालः कथितो हि मया तव तदहस्तस्य मे त्रयविस्तारो रात्रिशस्य कथ्यते व्यक्ते च प्रकृतौ लीने प्रकृत्यां पुरुषे तथा तत्र स्थिते निशा चान्या तत्प्रमाणा महामुने नैवाहस्तस्य न निशा नित्यस्य परमात्मनः उपचारस्तथाप्येष तस्येशस्य द्विजोच्यते इति वैष्णवोक्तेः अनेनज्ञानेच्छाकृतीनां भगवति नित्यत्वेपि जीवादृष्टादेरपि सत्त्वेन न सदा सृष्ट्यादिस्तत्कालाभावात् एकैव हरेर्द्धा सृष्टिकालसहिता सिसृक्षा प्रलयकालसहिता वजिहीर्षा १८

ऊसमवेगपत्नी टीका ॥

एवं सत्यलोकादिमहर्लोकपर्यन्तानां लोकानां विनाशित्वमुक्त्वेदानीं त्रिलोकान्तर्वर्तिनां जनानामपि ब्रह्मणो दिने दिने पर्यायतः स्यादित्याह अव्यक्तादिति अत्राव्यक्तशब्दः स्वापावस्थापन्नेलिव भवति न तु प्रधानं दैनंदिनसृष्टिप्रलययोरुपक्रमात् तदाकाशादीनां पंचभूतानां स्थितत्वाच्च अहरागमे ब्रह्मणो जागरणसमये अव्यक्तात्स्वापावस्थात्तस्मात्प्रदेहात्मकाप्राप्ताः सर्वाः समस्ताः व्यक्तयः शरीरेंद्रियभोग्यभोगोपकरणस्थानरूपाः प्रभवंति प्रकर्षेणात्मयंते रात्र्यागमे च तन्मेवस्य दिनांते प्राप्ते सति अव्यक्तसंज्ञके स्वापावस्थे तत्रैव ब्रह्मण एव ताः सर्वाः व्यक्तयः प्रलीयन्ते तिरो

+यथोक्तैरहोरात्रैः पक्षमासादिगणनया पूर्णं वर्षशतं प्रजापतेः परमायुरिति कालपरिच्छि-
न्नत्वेनानित्यो सौ तेन तल्लोकात्पुनरावृत्तिर्युक्तैव येन तु ततोर्वाचीनास्तेषां तदहर्मात्रपरिच्छि-
न्नत्वात् तल्लोकेभ्यः पुनरावृत्तिरिति किमु वक्तव्यमित्याह+
भवन्ति १८ ॥

मधुसूदनी टीका

+अत्र दैनंदिनसृष्टिप्रलययोरेवोपक्रान्तत्वात्तत्र चाकाशादीनां सत्त्वा-
दव्यक्तशब्देनाव्याकृतावस्था नोच्यते किंतु प्रजापतेः स्वापावस्थैव स्वापा-
वस्थः प्रजापतिरिति यावत् अहरागमे प्रजापतेः प्रबोधसमये अव्यक्ता-
त्तत्स्वापावस्थारूपाद्व्यक्तयः शरीरविषयादिरूपा भोगभूमयः प्रभवन्ति
व्यवहारक्षमतयाभिव्यज्यन्ते रात्र्यागमे तस्य स्वापकाले पूर्वोक्ताः सर्वा
अपि व्यक्तयः प्रलीयन्ते तिरोभवन्ति तत्रैवाविर्भूतास्तत्रैवाव्यक्तसंज्ञके का-
रणे प्रागुक्ते स्वापावस्थप्रजापतौ एवमासु विनाशित्वेपि संसारस्यानि-
वृत्तिः क्लेशकर्मादिभिरवशतया पुनः पुनः क्लेशादिवशेनैव निरोधावा- ᵛप्रादुर्भावात्प्रादुर्भूतस्य च पुनः
त्संसारे विपरिवर्तमानानां सर्वेषामपि प्राणिनामस्वातन्त्र्यादवशानामे-
व जन्ममरणादिदुःखप्रबन्धसंबन्धादलमनेन संसारेणेति वैराग्योपपत्त्य-
र्थं समसमानानामसरूपत्वेन च पुनःपुनः प्रादुर्भावात्कृतनाशाकृताभ्या-
गमपरिहारार्थं चाह १८ ॥

सदानंदी टीका ॥

एवमुक्तैरहोरात्रैः पक्षमासादिसंख्यया पूर्णं वर्षशतं तस्य परमायुरिती-
रिते तस्य कालपरिच्छिन्नतयानित्यत्वमीरितं येर्वाग्जन्मतया संनिकृ-
ष्टास्तेषां स्थिरा गतिः तल्लोकप्राप्तिर्न येनेत्याह सर्वजगत्कर्तुः स्वापाव-
स्थाविधेरव्यक्ताख्यात् अव्यक्तशब्दितः विधेः प्रबोधसमये स्वापावस्था-
त्मनस्ततः शरीरविषयाद्यात्मव्यक्तयो भोगभूमयः व्यवहारक्षमत्वे-
न प्रभवन्त्यहरागमे स्वापकाले विधेरात्र्यागमे तत्रैव कारणे अव्यक्त-
संज्ञके सर्वा लीयन्ते व्यक्तयस्तथा १८ ॥

नीलकंठी टीका ॥

किं ब्रह्मणो क्रियावने किं वा राज्ञा विमिति तत्राह अव्यक्तादिति अत्र दैनंदिन-
सृष्टिप्रलययोः प्रकृतत्वादव्यक्तशब्देन नाव्याकृतं वियदादिकारणा-
मिहग्राह्यं तदा आकाशादीनामसत्त्वात् किंतर्हि प्रजापतेः स्वापावस्थैव
ह्यव्यक्तशब्दार्थः अयंभावः प्रजापतेः स्वापकाले तत्कल्पितः स्थावरजं

गी. गमश्चपंचः सर्वोपि तदीयेः ज्ञानेः ज्ञाकृतनाशे लीयते रात्र्यागमे तथादिव
टी. सागमे पुनस्तत एव यथापूर्वमाविर्भवति एवं दृष्टिसृष्टिमायेनाल्पक।
ग्र. ल्पितोप्य पंचवियदादिप्रपंचोः सत्यस्य मोलीयते असम्बोधे यथापूर्वंश
उर्भवतीति १८ ॥

आनन्दटीका

अव्यक्तान्मूलप्रकृतेः व्यक्तयो महदादयः अहरागमे पौरुषे दिवसे
ततदेहरणगर्भके [illegible] १८ ॥

इदानीं तत्सवासाहोरात्रस्य स्वरूपप्र ततासुपपा

रामकंटटीका तिपादनद्वारेणमत्योहोरात्रतुल्यहत्ता

द्योपदेशणनो विवेक नैर्मल्यायोपदेशुमाह ॥

अव्यक्तादीश्वराज्ञाविततजगत्कारणभावाद्गुणसाम्यात्मनः प्रधानात्पर
भिधानात्सतार्णायुगसहस्रपरिमाणब्रह्मदिवसाविर्भावे सति स
र्वव्यक्तयः सर्वभावानां सर्वे विशेषाः प्रभवन्ति प्रादुर्भवन्ति यथा सूर्यो
दयात्महते दिवसे सर्वप्राणिनां सर्वक्रियाविशेषाः प्रभवन्ति तथैव
युगसहस्रपरिमाणे ब्रह्मनिशागमे तत्रैव यथोक्ते व्यक्तसंज्ञके प्रली।
यन्ते व्यक्तरूपतां परित्यज्य शक्तिमात्रत्वेनावतिष्ठन्ते यथेह सर्वेषां प्राणि
नां सूर्यास्तमयात्संजाते निशागमे सर्वेन्द्रियप्रवृत्तयो लयेव प्रलीयन्ते र
दमवत्तनामयं रहोदयास्तमययोः सर्गप्रलययोश्च पर्यायेण प्रवर्तत्ता
रतिमत्वतात्त्विकश्चिदेहः केवलं कलेवरादिविनश्वरभावाद् एवं स
कलिततिसर्गनिरवच्छेदसंविदंमायाशक्तिमोहितानात्मनात्मसेद
घोहनकलनाविशेषविभ्रमस्सानदापथ्योक्तस्तानतनिस्वानतनयाका
लानवच्छिन्ने समे स्वात्मन्यहं प्रतिपत्तिर्विवेकिभिरेष्टीकार्येति एतदे
वनिगमयति १८ ॥

नत्तुब्रह्मादीना .म . लोकिकी [illegible] टीका होरात्रे किं हत्तमित्याह ॥

कार्यस्याव्यक्तं रूपं कारणात्मकम् तस्मादव्यक्तात्कारणरूपाद्व्यक्तयः का
र्याणि प्रकाननादिहवराचराणि भूतानि स्वस्वकालापेक्षयाहरागमे ब्र
ह्मादीनां दिनस्योपक्रमे प्रादुर्भवन्ति तथा रात्र्यागमे तत्रैवाव्यक्तसंज्ञके
स्वस्मिन्स्वस्मिन्कारणरूपे प्रलयं यान्ति तिरोभवन्ति [illegible]
[illegible]
[illegible] १८ ॥

पंचोली टीका

प्रजापतेरह्निरात्रौचयद्भवतितद्दर्शयति अव्यक्तादिति सर्वाः व्यक्त
यः स्थावरजंगमलक्षणाः प्रजाः अहरागमेब्रह्मणोदिनादौअव्य
नू॰ क्ताद्व्याकृतात्ब्रह्मणः स्वप्नावस्थारूपात्प्रभवंतितथारात्र्या
गमेब्रह्मणः स्वापनकालेतत्रैवपूर्वोक्तेअव्यक्तसंज्ञकेप्रलीयंते
लयंप्राप्नुवन्ति १८

96

भाषा अनुवाद टीका ॥

जिस से कालगति के पराधीन सब लोक हैं इस से पुनरावृत्ति होती है सोई कहते हैं कि कार्यरूप जगत के अव्यक्त कहे सूक्ष्म रूप कारण स्वरूप ही को प्रकृति कहते हैं उसी कारण रूप प्रकृति से ब्रह्मा के दिन मे चराचर सकल उत्पन्न होते और रात्रि आने से फेरि उसी प्रकृति मे लय पाते हैं १८ ॥

रतावीरसमिद्बोधिनी ॥

अथ तस्य ब्राह्मस्याहोरात्रस्य स्वरूपप्रतिपादनद्वारेण मर्त्यालोको
त्पत्त्यहतानताम्बुपदेशमाह अव्यक्तादिति अव्यक्ताद्धीश्वरास
कारणात् अहरागमे युगसहस्रपरिमाणब्रह्मदिवसप्रादुर्भावे
सति सर्वाव्यक्तयः सर्वपदार्थानां विशेषाः प्रभवंति प्रादुर्भवंति
तथा तावत्परिमाणे ब्रह्मणो रात्र्यागमे तत्रैवाव्यक्तसंज्ञके व्य
क्ताभिधाने तत्त्वे परमेश्वरे प्रलीयंते व्यक्ततां परित्यज्य शक्तिरूपे
णावतिष्ठंते अत्र वेदंतात्पर्यं यथा सूर्योदयास्तमयाभ्यां क्रमेण
दिननिशायोः प्रवृत्तौ सत्यां सर्वप्राणभृतां सर्वे क्रियाविशेषाः स
र्वेन्द्रियप्रवृत्तयश्च प्रादुर्भवंति क्रमेण संलीयंते च एवं ब्रह्मदि
नेनैव क्रमेण जगदुत्पत्तिविलयाविति सूर्योदयास्तमययोः
सर्गप्रलययोश्च क्रमेण सर्वदा प्रवृत्तत्वेऽनित्यत्वेनास्ति कश्चिद्वि
शेषः केवलं ह्रासदैर्घ्यकल्पनाकृतो भेदभ्रम इति एतदुक्तं भव
ति भूलोकवासिनामिव ब्रह्मादिलोकवासिनामपि समानतया
पुनः पुनर्जन्ममरणरूपसंसारात्मकं दुःखं परिज्ञाय कर्मभूमि
स्थितैः स्ववर्णाश्रमोचितविहितकर्मणामनुष्ठानेन प्राप्ये नि
त्यसुखे महामोक्षे वास्था कार्येति १८ ॥

मधुभाष्य

१८ ॥

99

भाषाअनुवाद टीका

तिस सें काल गतिके पराधीन सभलोक हैं इससें पुनरा वृत्ति होती है कोई कहते हैं कि कार्यरूप जगतके अव्यक्त कहे सूक्ष्मरूप कारण स्वरूपही को प्रकृति कहते हैं उसी कारणरूप प्रकृतिसे ब्रह्माके दिनमे चराचर सकल उत्पन्न होते और रात्रिआनेसे फिर उसी प्रकृतिमें लय पाते हैं १८ ॥

दोहा

अव्यक्तहिसें व्यक्त सभ होहिं दिवसके मांहि रातहि होत सु लीन यह अव्यक्तनामसे तांहि १८ ॥

100

भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते रात्र्याग
मेऽवशः पार्थ प्रभवत्यहरागमे ॥१९॥

शाङ्करभाष्यटीका

अकृताभ्यागमकृतविप्रणाशदोषपरिहारार्थं बन्धमोक्षशास्त्रप्रवृत्तिसा
फल्यप्रदर्शनार्थं अविद्यादिक्लेशमूलकर्माशयवशाच्चावशो भूतग्रा
मो भूत्वा प्रलीयत इत्यतः संसारे वैराग्यप्रदर्शनार्थं चेदमाह भूतग्रा
म इति भूतग्रामो भूतसमुदायः स्थावरजङ्गमलक्षणो यः पूर्वस्मिन् क
ल्पे आसीत् स एवायं नान्यो भूत्वा पुनः अहरागमे प्रलीयते पुनः पुनः
रात्र्यागमेऽह्नःक्षयेऽवशोऽस्वतन्त्र एव पार्थ प्रभवति जायते स एव अहरागमे १९

आनन्दगिरिकृतटीका

ननु प्रबोधकाले ब्रह्मणो यो भूतग्रामो भूत्वा तस्यैव स्वापकाले विलय
ते तस्मादन्यो भूयो भूयो ब्रह्मणोऽहरागमे भूत्वा पुना रात्र्यागमे परवशो विन
श्यति तदेवं प्रत्यवान्तरकल्पं भूतग्रामविभागो भवेदित्याशङ्क्यानन्तरश्लो
कतात्पर्यमाह अकृतेति प्रतिकल्पं प्राणिनिकायस्य भिन्नत्वे सति अकृता
भ्यागमादिदोषप्रसङ्गात् तत्परिहारार्थं भूतग्रामस्य प्रतिकल्पमेकत्वमाश्रेय
मित्यर्थः यदि स्थावरजङ्गमलक्षणप्राणिनिकायस्य प्रतिकल्पमन्यथा
त्वं तदेकस्य बन्धमोक्षान्वयिनो भावात् काण्डद्वयात्मनो बन्धमोक्षार्थस्य
शास्त्रस्य प्रवृत्तिरफला प्रसज्यते अतस्तत्साफल्यार्थमपि प्रतिकल्पं प्रा
णिवर्गस्य नवीनत्वानुपपत्तिरित्याह बन्धेति कथं पुनर्भूतसमुदायोऽ
स्वतन्त्रः सन्नवशो भूत्वा भूत्वा प्रविलीयते तत्राह अविद्यादीति आदि
शब्देनास्मितारागद्वेषाभिनिवेशा गृह्यन्ते यथोक्तं क्लेशपञ्चकं मूलं प्रति
प्रतिलभ्य कल्पं प्रतिलभ्य धर्माधर्मात्मकं कर्माशयस्तद्वशाद्वा
स्वतन्त्रो भूतसमुदायो जन्मविनाशावनुभवतीत्यर्थः प्राणिनिकायस्य ज
न्मनाशाभ्यामालोच्यसिद्धमर्थमाह इत्यत इति संसारे विपरिवर्तमानानां
प्राणिनामस्वातन्त्र्यादवशानामेव जन्ममरणप्रबन्धसम्बन्धात् अलम

गी॰
टी॰अ

तेन संसारे रोगिनि वैराग्यं तस्मिन् प्रदर्शनीयं तदर्थं ब्रह्मदर्शनतानामहो।
रात्रमाहुरिति वचनमित्यर्थः समनन्तरवाक्यमिदमापरामृश्यते रात्र्यागमे ल
यमनुभवतोऽहरागमे च प्रभवं प्रतिपद्यमानस्य प्राणिवर्गस्य तत्त्वं पारव
श्यमित्याशयवानाह भूतग्राम इति ॥१९॥

तत्र च कृतनाशाकृता **स्वामिकृतटीका** भ्यागमशंकां वारयन् वैराग्यार्थं सृष्टिप्रलयप्रवा
हस्याविच्छेदं दर्शय ति ॥
भूतग्राम इति भूतानां चराचराणां प्राणिनां ग्रामः समूहो यः प्रागासीत्स ए
वायमहरागमे भूत्वा भूत्वा रात्र्यागमे प्रलीयते पुनरपि अहरागमेऽवशः क
र्मादिपरतन्त्रः प्रभवति नान्य इत्यर्थः [illegible]
[illegible] ॥१९॥

पिशाचभाष्यटीका

भूतग्रामो भूतसमूहः भूत्वा भूत्वा प्रविलीयते उत्पद्योत्पद्य विनश्यति अव
शः परवशः प्रभवति उत्पद्यते अहरागमे ह्यागमः ॥१९॥

रामानुजभाष्यटीका

भूतग्राम इति सर्व एवायं कर्मवशो भूतग्रामः अहरागमे भूत्वा भूत्वा रात्र्या
गमे प्रलीयते पुनरहरागमे प्रभवति तथा वर्षशतावसाने ब्रह्मणः स्वप्रयुतान्त
मंर्यं नालोका ते ब्रह्मलोकं ब्रह्मा च पृथिव्यप्सु लीयते आपस्तेजसि लीयन्त इत्यादिक्रमे
णाव्यक्ताक्षरतमःपर्यन्तं सर्वं प्रलीयते एवं महाप्रलयकालव्यवस्थायामनुत्पत्ति
लयाद्यवर्जनीयमि
त्यैश्वर्यं गतिं प्राप्तानां पुनरावृत्तिरपरिहार्या मामुपेतानां तु न पुनरावृत्तिप्रसङ्गः ॥१९॥

अभिनवगुप्तकृतटीका

ये खल्वदीर्घदर्शिनस्ते ब्रह्मणोऽपि रात्रिंदिनेषु सृष्टिप्रलयोदयतया यथा चा
हरहः स्वप्नवत् विशुद्धा निजां निजामेव वेदनामनुरुध्यन्ते पुनरात्रिं चैतेषामेव वि
हितपरिसंख्यानाशक्तिमात्रत्वेनावस्थानं एवं सृष्टेः प्रलये च पुनः पुन
र्भावः नानेन्येऽपसृज्यन्ते अपि तु त एव जीवाः कालकृतस्तु विरुद्धप्र
त्ययात्मा विशेषः एष च परिच्छेदः प्रजापतीनामप्यस्ति तत् अन्यैरपि

१४

प्रभवाप्ययधर्माणामेवेतिस्थितम् [illegible]

परमार्थप्रपा टीका ॥

एवंसत्यहर्दिनानुदिनहेमत्यावस्थायांयेपतिकी एवंयेजीवास्तावद्रा
त्र्यागमेऽव्यक्तेस्वकारणेलीनाभवंतितएवपुनर्दिवसारंभेदेहधारि
णोभवंतीत्याह भूतग्रामइति योभूतग्रामोरात्र्यागमस्वकारणेऽव्य
क्तेलीयमानोभूत्सएवायंदिनादौभूत्वाभूत्वाभूयःप्रादुर्भावंप्राप्य
पुनरात्र्यागमेप्रलीयतेऽवशःकर्मपरतंत्रःसन्पुनरहरागमेप्रभा
वतिदेहधारित्वमवलंबते तदुक्तमकृताभ्यागमे वहिमं एवंपश्यति
दृश्यजातमेतन्मयैवपश्यति चित्स्वरूपमध्येनयोः स्वप्नमयीचस्रृ
ष्टिमनादिरेवमनसःस्वभावइति टिप्पणिकास्वपि अनिर्मिताःकेनचि
दीश्वरेणस्वाप्नाःपदार्थाःप्रभवंत्यकस्मात् तस्मिन्क्षणेतन्निता।
जनस्यसत्यानुभूत्यासुखदुःखभोगः अनिर्मितःएवंवदाविरास्तेनद
स्यैवःसवजागरादौ आसीत्स्वरायोत्थमितःसहभावनादिसंस्कारव
शाद्विवेतइति १९ ॥ ॥

वनमाली टीका

आशुविनाशिनोपिसंसारस्य ननिवृत्तिःक्लेशकर्मादिवशतयापुनः
पुनःप्रादुर्भावात्प्रादुर्भूतस्यचपुनःकर्मादिवशेनैवतिरोधानात्सं
सारेपरिवर्तमानानांविवशानांजन्ममरणादिदुःखप्रवंधसंवंधादल
मनेनसंसारेणेतिवैराग्यायत्यर्थमाह भूतेतिभूतसमूहःस्थावरजंग
मरूपोयःपूर्वस्मिन्कल्पेस्थितःसएवायंतस्मिकल्पेप्रादुर्भूतोनतुप्र
२० तिकल्पमन्यस्यासत्कार्यवादानभ्युपगमात् सूर्याचंद्रमसौधाता
यथापूर्वमकल्पयत् दिवंचपृथिवींचांतरिक्षमथोस्वरितिश्रुतेः य
थानुर्ह्वलिंगानिनानारूपाणिवपर्यये दृश्यंतेतानितान्येवतथाभावा
युगादिष्वितिस्मृतेश्च महत्तत्वाद्याघटनाद्यंताःप्रकृतेरवस्थाविशेषा
स्तत्तत्कारणैरभिव्यज्यंते दंडादिनाम्रुद्विघटनाद्यवस्थाव्यक्तिरेव
चटपुत्पत्तिः मुद्गरादिनातत्तिरोधानंकपालत्वचूर्णत्वाद्यवस्थाभिव्य
क्तिघटादीनांनाशः तत्रयेपूर्वकल्पेजीवन् मुक्ताब्रह्मादयस्तेतत्पि
कारानेप्रारंभककर्मक्षयेविमुच्यंतेतत्त्वामकाम्यतदधिकारक

त्यानेवेश्वरमुपेतीत्य मुक्तानां पुनः संसारः जडवर्गस्तु स एवेति भावः ॥१९॥

ज्ञस्नमैवजयन्ती टीका ॥

ननु ये प्रलीनास्तेषां पुनरुत्पत्तिर्न संभवेति यतः कृतनाशाकृताभ्यागमप्रसङ्गः स्यादिति चेत्तत्राह भूतग्राम इति हे पार्थ यः पूर्वस्मिन् स्थितः स एवायं संगलिनिर्दिष्टस्तेषां भूतग्रामे चेतनाचेतनात्मकभूतसमूहो ऽहरागमे भूत्वा भूत्वा पुनः पुनर्जन्म प्राप्य प्राप्य अवशः कर्माधीनः सन् रात्र्यागमे प्रलीयते पुनरहरागमे प्रभवन्ति स एवोत्पद्यते ऽतो न कृतनाशाकृताभ्यागमप्रसङ्गो भवति एवं सत्यलोकादिभूलोकान्तानां नानाविधैश्वर्यगतिभाजां ब्रह्मादिस्थावरपर्यन्तानां [illegible] सर्वेषां जीवानां कर्माधीनत्वेनोत्पत्तिविशेषयोरवर्जनीयत्वं स्यादतः सर्वं प्राकृतविषयं विहाय यो मां भजेत स एव श्रेष्ठो जन्मादिरहितास्तु रित्यभिप्रायः पार्थ त्वमनेन दृष्टेन भूतग्रामे ऽपुनर्नाशियतस्त्वदृष्टायाः पुत्रत्वेन मङ्गलता मोक्षाधिकारोऽस्तीति सूचितं ॥१९॥

मधुसूदनी टीका ॥

भूतग्रामो भूतसमुदायः स्थावरजंगमलक्षणो यः पूर्वस्मिन् कल्पे स्थितः स एवायं [illegible] एतस्मिन् कल्पे जायते नान्योऽपि वस्तुप्रतिकल्पमन्योन्यस्य प्रसत्कार्यवादानभ्युपगमात् सूर्याचन्द्रमसौ धाता यथा पूर्वमकल्पयत् दिवं च पृथिवीं चान्तरिक्षमथो स्वरिति श्रुतेः समाननामरूपत्वादावृत्तावप्यविरोधो दर्शनात् स्मृतेश्चेति न्यायाच्च अवशो ऽविद्याकामकर्मादिपरतन्त्रः हे पार्थ स्पष्टमितरत् [illegible] ॥१९॥ ॥

सदानंदी टीका

एवमाप्तुर्विनाशित्वेऽप्यस्य नास्ति परित्यं यः संसारदीर्घरोगस्य एव क्लेशैः पुनः पुनः जायमानस्य तत्रैषां संसारे भ्रमतामन्त्यतां अस्वातन्त्र्याज्जरामृत्युजन्मादिदुःखचक्रतः कदापि नास्ति विश्रान्तिरिति वैराग्यसिद्ध्यै अकृताभ्यागमो दोषः कृतनाशस्तथापरः स्यादतो दिमनी

सृष्टिर्जायमानानां विनश्वरत्वेऽपि मोक्षव्यवस्थायाः साधकं शास्त्रमप्यस्ति वि
फलं स्याद्यदा सृष्टिरादिमत्त्वेन संमता पत्तेर्दोषापत्तेस्तमर्थमाहेवं श्रीरमा
पतिः भूतग्रामोऽयमेवासीत्पूर्वकल्पे स एव हि चराचरात्मको नान्यो भू
त्वा भूत्वा प्रलीयते निशागमे दिनोदये च स एवायं प्रजायते स्वाविद्यादिप
राधीनो भूतग्रामोऽयमनेकधा अविद्यादिक्लेशमूलकर्माशयवशादयं
भूतग्रामः पराधीनो जायते लीयते पुनः स एवेति विरागादिसिद्धये हरि
णोच्यते १९ ॥ ॥

नीलकंठी टीका ॥

कृतहानाकृताभ्यागमदोषापत्तेर्नयं बंधमोक्षशास्त्रप्रवृत्तिसाफल्याय च
अविद्यादिक्लेशवशाद्यो भूतग्रामः पुनः पुनर्भूत्वा पुनः पुनः प्रलीयते स
स एवायं भूतग्रामः इति अहरागमे भूत्वा भूत्वा रात्र्यागमे
प्रलीयत इति योजना स एव भूत्वा प्रलीयते नान्योऽभिनवो भवतीत्य
र्थः कुतः यतोऽवशः अविद्याकामकर्माधीनस्तस्मात्सर्वानर्थबीज
भूताया अविद्याया विद्ययोच्छेदे जन्ममरणप्रवाहविच्छेदायावश्यं य
तितव्यमित्यर्थः १९ ॥

एतदेवोपदेशार्थं पर्यायनिगम आनन्दीटीका

यति ॥ भूतानां महदादीनां ग्रामः संघातः स एव न तु कश्चिदन्यो नवो मत्रः १८
[illegible]
[illegible] ॥

रामकंठीटीका

भूतग्रामः स एवायमिति स एवायं चतुर्दशविधप्रपंचेन प्रविभक्तो।
भूतग्रामः चराचरप्राणिवर्गो यथाक्रमेण सर्गादौ भूत्वा भूत्वा पुनः
पुनरभिव्यक्तिमासाद्य रात्र्यागमे ब्रह्मरात्रिसंज्ञे प्रलयकाले प्रलीयते स
न्भवति अहरागमे सर्गादौ तत्प्रभवति व्यक्तिमासादयति इति
[illegible]
[illegible] १९ ॥

लासिकी [illegible]टीका

तत्र च कृतनाशा कृताभ्यागमशंकां वारयन्वैराग्यार्थं सृष्टिप्रलयप्रवा
हस्याविच्छे भूतानां चतुर्दशविधानां प्राणिनां ग्रामः समूहः यः पूर्वस्मिन्काले।
दं दर्शयति ॥ आसीत्स एव न तु प्रतिकल्पमन्यो भूत्वा भूत्वा पुनः पुनराविर्भूय।

गी. टी. प्र. रात्र्यागमे स्वस्मिन्कारणे प्रलीयन्ते तिरो भवन्ति तथाऽहरागमे वशाः
कामकर्मक्लेशादिपरतन्त्राः प्रभवन्ति व्यक्तिमासादयन्ति नान्ये येऽप
रवसन्तेऽपि तत्तपवर्जीवाः तथा च श्रुतिः सूर्याचन्द्रमसौ धाता यथा
पूर्वमकल्पयत् दिवं च पृथिवीं चान्तरिक्षमथो स्वरिति [illegible]

103

[illegible] १९ ॥

पंचोली टीका

अविद्यादिक्लेशमूलेकर्मवशादवशः भूतग्रामः भूत्वा भूत्वा प्रलीयते रज्यन्ता अव्यक्ताभ्यागमव्यक्तप्रणाशप्रसंगे वारयन्तु संसारवैराग्यप्रदर्शनाय सृष्टिप्रलयप्रवाहस्यावश्यत्वं चाह भूतग्रामेति हे पार्थ स एवायं भूतग्रामः भूतसंघातः स्थावरजंगमलक्षणः भूत्वा भूत्वा रात्र्यागमे अवशः अस्वतन्त्रः प्रलीयते अहरागमे पुनः पुनः प्रभवति १९ ॥

रमावीरससिद्धायिनी

उक्तमेवार्थं विनिगमयति भूतग्राम इति स एवायं प्राक्तनेष्वपि उभूयलीनो भवति अयमेव भूतग्रामः स्थावरदेवादिरूपः स्थावरप्राणिवर्गो भूत्वा भूत्वा सृष्ट्यारंभे पुनः पुनरभिव्यक्तिमासाद्य रात्र्यागमे सहस्रयुगपरिमाणब्रह्मनिशाभिधाने प्रलयकाले अवशोऽस्वतन्त्रः सन् प्रलीयते तिरोभवति अहरागमे युगसहस्रपरिमितब्रह्मदिवसजे सर्गकाले च प्रभवति व्यक्तिमासादयति एवमेव हि मनुष्याणां भूमौ सूर्योदयास्तमयाभ्यां दिनरात्र्योर्विषये इति यद्रति प्राउर्भावतिरोभावौ सिद्धौ तत्र ब्राह्मो दोराज्ञो मनुष्याहोरात्रात्रातिरिच्यते इत्युक्तं सत्यं वा नतिरिक्तता यो मनुष्याणामिव पूर्वं देहत्यागे देहान्तरप्राप्तिवद्ब्रह्मलोकवासिनामपि पुण्यपकर्मणां फलभोगेन क्षये पुनरपि संसार इति तत्र च स्ववर्णाश्रमो

वितकर्मणांफलंमय्येवनित्येपरमेश्वरेसमर्पणाद्दत्तं अत
एवमत्रप्रतिपन्नानांनपुनरावृत्तिरितिस्थितं १९ ॥

अथभाषा

१९ ॥

104

भाषाअनुवाद टीका ॥

अब विषयों से वैराग्य होने के अर्थ सृष्टि औ लय का प्रवाह देखाव
तेहैं कि हे पार्थ जो चराचर प्राणी मात्र सर्व मे थे तेई अवश कर्म
के आधीन वारम्वार होते औ जाते है जब ब्रह्मा का दिन भया तब प्र
गटे जब राति आई तो फेरि प्रकृति मे लीन हो गये ऐसे ही हेरफे
र लगा रहताहै १९ ॥

दोहा

जीव निकरसो पार्थ यह होय होय होय लीन रजनि आगममें
नसों प्रकट दिवसमें दिवीन १९॥

105

परस्तस्मात्तु भावोऽन्योऽव्यक्तोऽव्यक्तात्सनातनः यः
सः सर्वेषु भूतेषु नश्यत्सु न विनश्यति २० ॥

शाङ्करभाष्यटीका

यदुपन्यस्तमक्षरं तस्य प्राप्त्युपायो निर्दिष्ट ओमित्येकाक्षरं ब्रह्मेत्यादि
नाथेदानीमक्षरस्यैव स्वरूपनिर्दिदिक्षयेदमुच्यते परइति अनेन योग
मार्गेणेदं गन्तव्यमिति परस्तस्मादिति परो व्यतिरिक्तो भिन्नः कुतस्तस्मात्
पूर्वोक्तादव्यक्तात् तुशब्दोऽक्षरस्य विवक्षितस्य अव्यक्ताद्वैलक्षण्य
विशेषणार्थः भावोऽक्षराख्यं परं ब्रह्म व्यतिरिक्तत्वे सत्यपि सालक्षण्य
प्रसङ्गोऽस्तीति तद्विनिवृत्त्यर्थमाह अन्य इति अन्यो विलक्षणः स चा
व्यक्तोऽनिन्द्रियगोचरः परस्तस्मादित्युक्तं कस्मात् पुनः परः पूर्वोक्ताद्भूतग्राम
बीजभूतादविद्यालक्षणादव्यक्तादन्यो विलक्षणो भाव इत्यभिप्रायः सनात
नश्चिरन्तनो यः सभावः सर्वेषु भूतेषु ब्रह्मादिषु नश्यत्सु न विनश्यति २०

आनन्दगिरिकृतटीका

अक्षरं ब्रह्म परममित्युपक्रम्य तदेतदनुपयुक्तं किमिदमसमुक्तमित्याशङ्क्य
वृत्तमनूद्यानन्तरग्रन्थसङ्गतिमाह यदुपन्यस्तमिति अक्षरस्वरूपेण निर्दिदि
क्षिते तस्मिन् पूर्वोक्तयोगमार्गस्य कथमुपयोगः स्यादित्याशङ्क्य तत्प्राप्त्यु
पायत्वेनेत्याह अनेनेति गन्तव्यमिति योगमार्गेणेति रूपप्रयुक्तो विशेषः पू
र्वोक्तादव्यक्तादिति सम्बन्धः परशब्दस्य व्यतिरिक्तविषयत्वे तुशब्देन वै
लक्षण्यमुक्त्वा पुनरन्यशब्दप्रयोगात् पौनरुक्त्यमित्याशङ्क्याह व्यतिरिक्त
त्व इति तथा द्योतितं वैलक्षण्यमन्यशब्देन प्रकटितं यतो भिन्नेष्वपि भा
वभेदेषु सालक्षण्यमालक्ष्यते ततस्तावन्मात्राद्भिन्नत्वेपि ब्रह्मणस्तेन सा
दृश्यमाशङ्क्य तन्निवृत्त्यर्थमन्यपदमित्यर्थः यद्वा परशब्दस्य प्रकृष्टवा
चित्वेनाभावविशेषणार्थत्वे पुनरुक्तिशङ्कैव नास्तीति द्रष्टव्यं अग्रनादिभाव
स्यात्तस्याविनाशित्वमर्थसिद्धं समर्थयते यः सभाव इति सर्वेषु हि वि
नश्यद्विकारजाते पुरुषान्तो विनश्यति सतो विनाशहेत्वभावान्न विन
श्यतीत्यर्थः २० ॥

गी॰ टी॰ अ॰ ८

स्वामिकृतटीका

लोकानामनित्यत्वं प्रपंचयित्वा परमेश्वरस्वरूपस्य नित्यत्वं प्रपंच
यति पर इति द्वाभ्यां तस्मात्तु चराचरकारणभूतादव्यक्तात्परः तस्यापि कार
णभूतो योऽन्यस्तद्विलक्षणोऽव्यक्तः चक्षुराद्यगोचरो भावः सनातनोऽनादिः
स तु सर्वेषु कार्यकारणलक्षणेषु भूतेषु नश्यत्स्वपि न विनश्यति
२० ॥

पिशाचभाष्यटीका

परः उत्कृष्टस्तस्माद्भूतग्रामाद्भावः पदार्थः अव्यक्तो नित्यसिद्धः अव्यक्ता
त्प्रकृतेः सनातनः नित्यः यो भावः सर्वेषु भूतेषु नश्यत्सु न विनश्यति २० ॥

रामानुजभाष्यटीका

अथ कैवल्यप्राप्तानामपि पुनरावृत्तिर्न विद्यत इत्याह पर इति तस्मादव्य
क्तादचेतनप्रकृतिरूपात्पुरुषार्थतया परः उत्कृष्टो भेदोऽन्यो ज्ञानैकाका
रतया तस्माद्विसजातीयः अव्यक्तः केनचित्प्रमाणेन न व्यज्यत इत्यव्यक्तः
स्वसंवेद्यस्वासाधारणाकार इत्यर्थः सनातनः उत्पत्तिविनाशरहिततया
नित्यो यः सर्वेषु वियदादिभूतेषु सकारणेषु सकार्येषु नश्यत्सु तत्र तत्र
स्थितोऽपि न नश्यति २० ॥

अभिनवगुप्तकृतटीका २०

सर्वतो लोकेभ्यः पुनरावृत्तिर्न तु मां प्राप्येति स्फुटयति २० ॥

परमार्थप्रपा टीका ॥

अथ सर्वकारणीभूतस्य परमेश्वरस्य सकलव्यवहारातीतस्य शाश्वतत्वमा
ह पर इति तस्मात्कार्यकारणसंघातरूपादव्यक्तात्मकाशात्परः उत्कृ
८ ष्टः कारणीभूतः तस्मादन्यस्तद्विलक्षणः अव्यक्तः चक्षुराद्यगोचरः स
नातनः अनादिर्यो भावः पालकः पदार्थोऽस्ति स सर्वेषु भूतेषु नश्यत्सु स
त्सु न विनश्यति योगवाशिष्ठे तस्मात्सूक्ष्ममिति स्मृतेः तदुक्तमप्येवं श्री
श्रुः इंद्रियेभ्यः परं मनो मनसः सत्त्वमुत्तमम् सत्त्वादपि महानात्मा मह
तोऽव्यक्तमुत्तमं अव्यक्तात्परः पुरुषो व्यापकोऽलिंग एव च यं ज्ञात्वा मु

च्यवते नेतुरस्तत्त्वं वगच्छतीति अत्र कुशाग्रोपायामपि अग्रपरमस्य महतो महि-
त्वममर्त्यस्य मर्त्यास्तु विदुः नानारूपविस्तते संभरेते अस्मिन्नतीव सतो भूम्यै
न इति भाष्यं अस्य महतः सर्वोत्कृष्टस्य महित्वं व्यापकत्वं अपरंपरं अदृष्ट्वा
किंभूतस्य मर्त्यास्तु मरणधर्मकास्तु विदुः प्रजास्तु अमर्त्यस्य अमरस्य ...णो मे
कस्य सनातनस्य यो नेतृपर्याहारः येन महित्वेन कृत्वा नानारूपस्य प्रा-
णिनामनया एवेह रूपविशेषविस्तृते भरणकृते नंदते संभरेते परिहृणोः अस्मि-
न्नाजिह्वयाग्रा संकलयंतो वसतीदं ते स्मृणोयंतो भूयिष्ठा भवंति तथा
स्रुतः महत्यमागिलैस्मा अचेतनं नाशरीरेषु यद्दृक्षणादिकर्म तद्दतगते नैवे
नैव गृह्णतेत्यर्थः २० ॥

वनमाली टीका ॥

ब्रह्मलोकगतानामपि हरिभक्तिं विना पुनरावृत्तिः स्यात्कामास्तु येत्य पुन-
र्जन्म न विद्यत इत्येतद्दिशृणोति परस्तिद्वाभ्यां तस्मात्स्थूलसूक्ष्माद्
नानारूपात्सूक्ष्मकास्थूलत्वादिगोचरात्व्यक्तस्य तदाद्यगोचरः भावः स्वत
एवैश्वर्यादिभिन्नः परउत्कृष्टो नियामकतया सनातनः सदैवाकारः तस्य हेम-
पाटविस्त्वाद्युपादेयत्वाव्यक्तत्वादिनावेलक्षण्यं सूचयति सर्वेषु भूतेषु
नश्यत्स्ववस्थांतरं प्राप्नुवत्स्वपि न विनश्यति नावस्थांतरं प्राप्नोति सदैक-
रूपतत्पायविस्त्वेव प्रभविष्णुवदिति वेल्लवाक्यैः तस्य तद्भवस्य चान्यथा
भावरूपनाशोत्पत्त्याद्यभावात्तत्प्राप्तिगतानां न पुनरावृत्तिरिति भावः २०

कुसुमवैजयन्ती टीका ॥

एवं चेद्ब्रह्मणस्तिर्मिताज्जनाज्जन्मादिकं लभंते न तथा केवलं ये प्राप्तास्ते
नैव प्राप्नुवंतीत्याशयेनाह द्वाभ्यां परस्तस्मादिति तु पुनस्तस्मादव्यक्ता-
द्धिरण्यगर्भदेहात् देहस्याचेतनप्रकृतिकार्यत्वात्कार्यकारणयोरभे-
दविवक्षया ऽचेतनप्रकृतिरूपादित्यर्थः उत्कृष्टोन्यो विजातीयस्तद्वि-
लक्षणः भावः प्रकृतिविप्रकृष्टचेतनपदार्थः सनातनः जन्मशून्यत्वेन
नित्यो ऽव्यक्तः प्रत्यक्षादिप्रमाणेन न व्यज्यते इत्यव्यक्तः न व्यक्तो ऽव्यक्तः ।
स्वान्तर्भवेद्यः ईदृशो यो भावः प्रकृतिसंबंधरहितः शुद्धसंशयात्मस्वरूप-
यः सः सर्वेषु आब्रह्मभुवनाल्लोकपर्यंतेषु भूतेषु वियदादिषु अचेतन-
वेभिः पुनर्नाशं सत्सु स्वस्वकारणे लयं गतेषु सत्सु न विनश्यति नाशं न प्राप्नो-
ति २०

गी + एवमव्यक्तानामुत्पत्ति **मधुसूदनी टीका ॥** त्तिविनाशप्रदर्शनेनाब्रह्मभुवनाल्लोकाः पु
नरावर्तिनां जन्मनश्च नरावर्तिनं अधुनामामुपेत्यतुकौंतेयपुनर्जन्मन

टी-अ- विद्यते इत्यत + तस्माच्चराचरस्थूलप्रपंचकारणभूतात्हिरण्यगर्भाख्यादव्यक्तात्परोव्यति
ह्याचष्टेद्वाभ्यां ॥ रिक्तः श्रेष्ठो वा तस्यापि कारणभूतः व्यतिरेकेपि सालक्षण्यं स्यादितिते
नाह अन्योत्यंतविलक्षणः न तस्य प्रतिमास्तीति श्रुतेः अव्यक्तो रू
पादिहीनतया चक्षुराद्यगोचरो भावः कल्पितेषु सर्वेषु भावेषु सद्रूपे
णानुगतः अत एव सनातनो नित्यः तस्माद्धेतोर्यः स नित्यादव्यक्ताद्
नित्यात् यादेयत्वे नित्यस्यात्मकस्य वैलक्षण्यं च सूचयति एतादृशो यो भावः स
हिरण्यगर्भ इव सर्वेषु भूतेषु नश्यत्स्वपि न विनश्यति उत्पद्यमानेष्व
पि नोत्पद्यत इत्यर्थः हिरण्यगर्भस्य तत्कार्यस्य भूताभिमानित्वात्तदुत्प
त्तिविनाशाभ्यां फलावेवोत्पत्तिविनाशौ न तु तदनभिमानवतोऽका
र्यस्य परमेश्वरस्येति भावः २० ॥

सदानंदी टीका ॥

एवं क्लेशवतां जन्मनां चक्रे प्रवर्तते भगवद्भक्तिहीनानां व्याख्यान
मधुनात्त ये भगवद्भक्तिनिष्ठास्ते यं प्राप्य पुनर्नावर्तंते तं वि
मुक्तास्तत्स्वरूपं दर्शयन्नाह तस्माच्चराचरस्थूलजगद्धेतोर्विधेः प
रः व्यतिरिक्तोथवा श्रेष्ठो हेतुभूतो विधेरपि न तस्य प्रतिमास्तीति
श्रुत्यात्यंतविलक्षणः अव्यक्त इंद्रियातीतो रूपस्पर्शादिवर्जितः अ
प्येतेषु समस्तेषु कार्येष्वनुगतोऽक्षरः नित्यो य ईदृशो भावो नश्वरा
त्वप्यखिलेषु च भूतेषु जायमानेषु न नश्यति न जायते स तु हिरण्य
गर्भस्य कार्यस्य तत्ताभिमानिनः तदुत्पत्तिविनाशाभ्यां प्रोक्तौ नाश
जन्मनी अधिष्ठानस्य सतस्तस्यात्मकस्याकृत्रिमस्य च परमेश्वरस्य वि
स्तोर्नास्ति जन्मादिविक्रियाः २० ॥

नीलकंठी टीका ॥

एवं ब्रह्मभुवनांतानामावृत्तिं व्याख्याय यस्मात्तानामावृत्तिर्नास्ति तद
क्षरं परमं ब्रह्मस्वरूपं तं वक्तुं लक्षयति परस्तस्मादिति त्रिभिः पर इति
तस्मादव्यक्तात् भूतग्रामबीजभूतादविद्यालक्षणादन्यात् अन्योऽत्यंत
विलक्षणो भावः सत्ता तथा ह्यामरः अभिमतेसत्तात्मात्मा मामं वारयति तस्य

स्तामामादिभ्यो व्याहृतत्वात् अस्य च सर्वानुगतत्वात् सनातनो नित्यो
ऽकूटस्थः उपाधिमात्रं हि उपाधिविक्रियया नित्यं विक्रियत इव भाति अ
येत्वनुपाधित्वात् निरंशैकरूप एवायः स भावः सर्वेषु भूतेषु वियदादिषु न
श्यत्सु न विनश्यति केवल सत्तारूपत्वात् एतेन तस्य कालत्रयाबाध्य
त्वेनि सत्यत्वं चोक्तं २०॥

तदेवं प्रकृतिलयपर्यन्तं बन्धु श्रीआनन्दीटीका उपदिश्यत्कैवल्यधाम तदेवोपदिश्या

ति— तस्माद्भूताभूतात्प्रलीयमानाश्रयत्वं विंशतिसंख्यानादसौ प्रलीयमा
नो नित्यः परः प्रकृतेरतिरिक्तः अव्यक्तः पुरुषाख्यः सनातनः प
रिणामशून्यः भावः सत्तामहदात्मतः सर्वेषु भूतेषु लिंगाद्येषु प्र
पु^ क्रमादिसर्गान्तेन नश्यत्स्वपि न विनश्यति २०॥ ने^

एतदर्थप्रतिपादनप्रसंगेन सर्गप्रशमैकदीटीका लयस्वरूपं प्रतिपादानीमत्र प्रतिपत्त्रायेन कारणेन नत्रपुनरा वर्त्तनं तेन तत्प्रतिपादयितुमा

ह— तस्मादव्यक्तसंज्ञाज्जगत्कारणात्वेनाः बभासितात्स्वदार्षान्त्यप्रधाना
ख्योऽपरः पुनरसौ विलक्षणो भावः परमार्थसत्यदार्थो विद्यत इति शे
षः कीदृशो व्यक्तोऽव्यक्तः अव्यक्तकारणत्वेन प्रधानापत्तमव्यक्तं प्रधा
नात्मकं वस्तु यस्मात्तथाविधं विवक्षितेत्युरलक्षणभाववशात्किलाव
क्तव्यवहारोपमनीयते एतादृशाव्यक्तव्यक्त इति विशेषणं अपरे तमा^
तत्राख्येयमनपरे सहि भावो निमोदितप्रकाशात्मकत्वेव सर्व
मिदं प्रकाशयत्यव्यक्तप्रमायावशात् सर्वस्य तथा प्रतिपत्तभावाद
व्यक्तः तथा सनातनः सदा सर्वकालं भवतीति सनातनो नित्यः की
दृशो सौ समस्तेषु जडचेतनभेदेन द्विप्रकारेषु वान्तरभेदादप्यनन्त
प्रायेषु भूतेषु प्राणिषु नश्यत्स्वल्पप्रकारेण प्रधानेष्वत्वयमनुभ
वस्तु न नश्यति निमोदिता· हैनविस्प्रकाशात्मकत्वादिव्यपदेशात
याति क्रतोऽस्यन्ताभावता तत्कस्माच्चोपलभ्यतत्समाह २०॥

+ एवंभूतस्यागततानामप्यव्यक्ताःसिकी [illegible]मीटी· विद्याहृतानां स ^क्त्रा स्वारूपं गतागतं प्रतिपाद्य इदानीं भगवद्भावमापन्नानां मुक्तानां गतागताभावं विवक्षुरात्मनः प्रलयकालेऽपि विनाशाभावमाह ॥+

+ तदाहो भूतवैलक्षण्यार्थः तस्माद्ग्रथामवीजभूतादव्यक्तात्पराना
^त ख्योऽयमविलक्षणः परः स्वानुभ्याऽपेक्षो भावः सद्रूपश्चात्मा एवोऽव्य
क्तोऽतीन्द्रियः सनातनो विनाशहेतुषु सत्स्वपि विनाशानर्हो योऽसि स
आत्मा सर्वेषु भूतेषु स्थावरजंगमात्मकेषु प्राणिषु विनश्यत्स्वपि
न विनश्यति तस्मात्तद्भावमापन्नानां प्रलयेऽपि न विनाशप्रसंगः

गी॰ [illegible]
टी॰ [illegible] २०॥
अ॰

१०८

पंचोलीटीका

एवं ब्रह्मणः ओमित्येकाक्षरमित्यादिना प्राप्त्युपायो दर्शितः इदा-
नीं तस्य स्वरूपमाह परस्तस्मादिति द्वाभ्यां तु पुनः तस्मात् पूर्वो-
क्तादव्यक्तात् परः प्रकृष्टः सनातनः चिरंतनः अव्यक्तः इंद्रिया-
द्यगोचरः भावोऽन्यः अक्षराख्यब्रह्मस्वरूपः अव्यक्ताद्विलक्षणो यः स
सर्वेषु ब्रह्मादिस्थावरांतेषु नश्यत्सु न विनश्यति २०

रमावीरसमिद्धोधिनी॥

अथ परमेश्वरमेव धारणां विधाय स्ववर्णाश्रमोचिते कर्मणि
प्रवृत्तस्य प्रयाणकाले परमेश्वरसायुज्यं च गतस्यापुनरावृ-
त्तिर्यथा भवति तथा प्रतिपादयितुमेवाह पर इति तस्मादु-
क्तलक्षणाद्ब्रह्मलोकाधिपतेः घातानंदात्मकाघानस्य उत्कृ-
ष्टोन्यो विलक्षणो यो भावः परमेश्वरलक्षणः पदार्थो विद्यत
इति शेषः कीदृशः अव्यक्तः अव्यक्तश्च स्वकर्मनिस्नातैः स्वभक्तैः
स्वदर्शः तदितरैश्च दुर्दर्शः तथा सनातनः सना सर्वकाले
भवतीति सनातनो नित्यः स सर्वेषु भूतेषु ब्रह्मादिकीटपर्यं-
तेषु चराचरप्राणिषु नश्यत्सु महाप्रलये तथान्यामेषु मन्व-
न्तरप्रलयमप्यभवत्स्वपीति यावत् न विनश्यति प्रलीनत्वादिव्य-
पदेशं न प्राप्नोति यतु उक्तं भवति घातानंदस्य दैवयुगसहस्र-
परिमाणावच्छिन्ना दिवारात्रकल्पना या वर्षशतं पुरुषायुषम-
ति वा घविनाशो सति तस्माल्लोकं प्राप्यमानानां च भूतानामायुषा-
न्तेन विनाशोन देशान्तरप्राप्तिन्यायसिद्ध ममतत् नित्यत्वेनावि-
नाशाभावे सति स्वकर्मानुष्ठानद्वारा मत्सारूप्यं प्राप्यमानानां च त-
थाभावेष्वायातेषु न तासां पुनरावृत्तिरपि न्यायसिद्धेति नात्र देवत्वे च परो
भ्रमितव्यमिति २०॥

ਸਪੁਮਾਘ

੨੦॥

109

भाषा अनुवाद टीका ॥

सकल लोक की अनित्यता दिखाय अब दो श्लोक से परमेश्वर
का नित्यत्व विस्तार करि कहते हैं कि सोई चराचर की कारण
रूप प्रकृति से पर अर्थात् उनका भी कारण स्वरूप औ उससे
भिन्नवर्ण आदि का अगोचर भाव जो अनादि पुरुष सो यावत्
कार्य कारणरूप भूत मात्र का नाश होनेसेभीनष्ट नहीं होते हैं २०

दोहा

तापर और अव्यक्त है व्यक्त सनातन जोय जो सब भावं है
नष्ट में नष्ट हि होत न सोय २०॥

110

अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिं यं प्रा।
प्य न निवर्तन्ते तद्धाम परमं मम २१ ॥

शाङ्करभाष्यंटीका

अव्यक्त इति यो ऽसावव्यक्तो ऽक्षर इत्युक्तस्तमेवाक्षरसंज्ञकमव्यक्तं भावं आहुः
परमां प्रकृष्टां गतिं यं भावं प्राप्य गत्वा न निवर्तन्ते संसाराय तद्धाम स्थानं
परमं प्रकृष्टं मम विष्णोः परमं पदमित्यर्थः २१ ॥

आनन्दगिरिकृतटीका

यथोक्ते ऽव्यक्ते भावे श्रुतिसम्मतिमाह अव्यक्त इति तस्य परमगतित्वं सा।
धयति यं प्राप्येति योसावव्यक्तो भावो ऽत्र दर्शितः स येनाक्षरं पुरुषं वे
द सत्यमित्यादि श्रुतावक्षर इत्युक्तः तं वाक्षरं भावं परमां गतिं पुरुषान्न परं
किञ्चित् सा काष्ठा सा परा गतिरित्याद्याः श्रुतयो वदन्तीत्याह योसाविति पर
मपुरुषस्य परमगतित्वं युक्तं व्यनक्ति यं भावमिति तद्विष्णोः परमं पदमि
ति श्रुतिमनु संवादयति तद्धामेति २१ ॥

अविनाशोऽप्रमाणंद स्वामिकृतटीका

शीयत्राह यो भाव अव्यक्तः अतीन्द्रियो ऽक्षरः अदेशो ऽनाशश्च इति तथाक्षरात्संभवती
ह विश्वमित्यादि श्रुतिष्वक्षर इत्युक्तः तं परमां गतिं गम्यं पुरुषार्थमाहुः
पुरुषान्न परं किंचित् सा काष्ठा सा परा गतिः इत्यादि श्रुतिः परमगतित्वमे।
वाह यं प्राप्य पुनर्न निवर्तन्त इति तद्धाम मे सेव धाम स्वरूपं अहमेव परमा गतिरि
त्यर्थः २१ ॥

पिशाचभाष्यंटीका

अव्यक्तोऽक्षर इति अव्यक्तः प्रत्यक्षादिप्रमाणागोचरः अक्षर इत्युक्तस्तम
व्यक्तमाहुः यं भावं प्राप्य न निवर्तन्ते संसारमवतरन्ति तत्परमं धाम २१

रामानुजभाष्यंटीका

अव्यक्त इति यो ऽव्यक्तो ऽक्षर इत्युक्तः येनक्षरमनिर्देश्यमिति कूटस्थोऽक्षर

गी॰
टी॰ अ॰

इत्यादिश्रुतेर्वेदविदः परमां गतिमाहुः अयमेव यः प्रयाति स जन्तुर्हं सया
ति परमां गतिमित्यत्र परमगतिशब्दनिर्दिष्टोऽक्षरः प्रकृतिसंसर्गवियुक्तस्व
रूपेणावस्थित आत्मेत्यर्थः यमेवंभूतं स्वरूपेणावस्थितं प्राप्य न निवर्तन्ते त
न्मम परमं धाम परमं नियमनस्थानं अचेतनप्रकृतिरेकं नियमनस्थानं मV
तत्संसृष्टजीवरूपा प्रकृतिर्द्वितीयं नियमनस्थानं अचित्संसर्गवियुक्तस्व
रूपेणावस्थितं परमं नियमनस्थानमित्यर्थः तत्रापुनरावृत्तिरूपत्रय
वा प्रकाशवाची धामशब्दः प्रकाशश्च ज्ञानमभिप्रेतं प्रकृतिसंसृष्टान्य
विच्छिन्नज्ञानरूपादात्मनोऽपरिच्छिन्नज्ञानरूपतया मुक्तस्वरूपं परं धाम २१॥

अभिनवगुप्तकृतटीका ~~स्पष्टार्था~~ ।। सर्वज्ञोक्तार्थम् २१

परमार्थप्रपा टीका ॥

अथाविनाशित्वे प्रमाणं दर्शयति अव्यक्त इति योऽयं पूर्वमव्यक्तः सनात
नो भाव उक्तः स अक्षर इत्युच्यते तमक्षरमीश्वरस्वभावं परमां गतिमा
हुः तं कं यं प्राप्य योगिनो न निवर्तन्ते तन्ममैव परमं सर्वोत्कृष्टं धाम स्वरू
पमपि ज्ञातेन तन्मेवेत्यर्थः २१ ॥

वनमाली टीका ॥

अव्यक्त इन्द्रियागोचरः केवलमौपनिषदोऽक्षर इति न विकारं प्राप्नोतीत्य
क्षर इत्युक्तस्तमाहुः श्रुतयः स्मृतयश्च पुरुषान्न परं किंचित्सा
न्यत्र^ काष्ठा सा परा गतिरिति मनःपरतरं नाकिंचिदस्ति यत्ततोऽपि च परा
गतिं परमं प्राप्यं मामेवाहुरित्यर्थः निरस्ताविद्यासंततः संप्राप्य सि
द्धा न निवर्तन्ते तेन संसारिणो भवन्ति तद्धाम स्वरूपं परमं सर्वनियामक
मनेन सद्गुणं मम स्वरूपं राहोः शिर इतिवद्भेदषष्ठी यद्वा धाम लोको
वैकुण्ठाख्यः प्राकृतस्वभाववर्जितः लक्ष्मीक्रीडार्थं नित्यः प्राकृतेन्द्रियमुक्त
प्राप्यो भगवल्लोकोऽस्ति महदस्य स्थूणोऽविनतेर्देहे उग्रपत्रे देवानाम
[illegible] पिदेव आसीदत्युत्तमस्पर्शनस्तःपराके यास्याम्यहः
परमेष्ठ्या मन्नन्तर्हिताः साधिस्वाभ्वोनागत्वा सः समिथे यत्र पूर्वे साध्याः
सन्ति देवाः न हि स्तोः परमं पदं सदा पश्यन्ति सूरयः सोऽध्वनः पारमा

भ्य

प्रेतितद्विष्णोः परमंपदमितिदिस्मृतेः इहैतं ऋषिभ्यस्तमुवोचयत्रम
वस्थितः यत्रगत्वानशोचंतितद्विष्णोःपरमंपदंयमाहुः सर्वभूतानांप्र
कृतेः प्रकृतिध्रुवं अनादिनिधनंदेवंप्रभुंनारायणंपरं ब्रह्मणःसदा
नातस्यपरंस्थानंप्रकाशते नदेवाऋषयो पश्यंति सर्वतेजोमयंशुभ
अमर्कानलदीप्तंतत्स्थानंविष्णोर्महात्मनः स्वयैवप्रभयाराजनदुः
प्रेक्ष्यंदेवदानवैः यत्रभूतेश्वरस्तानसर्वप्रकृतिरात्मभूःआसयत्सर्वभू
वि नानिसृष्टियाभिर्विराजते नात्रब्रह्मर्षयस्तात कुतएवमहर्षयः प्राप्नुव
तिगतिंतांयतीनांऊर्ध्वरेतसाम् नतेज्योतींषिसर्वाणिप्राप्यभासंत्व
वि तिपांडव स्वयंप्रभुरचिंत्यात्मातत्रसतिराजते यतयस्तत्रगच्छंतिभ
क्तानारायणंहरिं परेणतपसायुक्ताभाविताःकर्मभिःशुभैः योग
सिद्धामहात्मानस्तमोमोहविवर्जिताः तत्रगत्वापुनर्नेमंलोकमा
यांतिभारत स्वयंभुवंमहात्मानंदेवदेवंजनार्दनं स्थानमेतन्मा
हाभागध्रुवमक्षयमव्ययं अविराद्धिनानन्याप्यतइतिमहाभारता
धुक्तेश्च नचजयविजययोःपुनरावृत्तिःप्रसिद्धा तयोःप्रकृतिभा
गस्यदिव्यलोकद्वारपालकत्वेनप्रकृत्यस्पृष्टदिव्यलोकप्राप्तत्वात् ध
र्मलिंगदेहानामेवहिमहावैकुंठेगमनेनवर्तेषांपुनःप्राकृतदेहसंभव
ता एकस्यैवलोकस्यसभागविशेषोलोकांतरमेवपरस्मादेतत् २१

अस्यमवैजयन्ती टीका ॥

किंच अव्यक्त इतिपूर्वमक्षरमनिर्दिश्यंकूटस्थः अक्षरउच्यतेइत्यादिपुर्वो
भावोऽव्यक्तोऽव्यक्तात्सनातनइत्यादिस्वरूपलाभ्यत्वाघगोचरः अणुरेव
षआत्माचेतसावेदितव्य इतिश्रुतेः अक्षरस्यकूटैकरसस्वरूपइतिप्रकृ
तिरहिताम्नस्वरूपोमयोक्तः कथितःतंभावमात्मानंपरमांनिरुपम
पंगतिंप्राप्यंवेदांतविदोआहुर्वदंतिनवीश्वरस्यकाज्जीवमेवपरमांग
तिंकेनहेतुनावदंतीत्यपेक्षायामाह यमितितंभावंप्रकृतिविमुक्त
मात्मस्वरूपंप्राप्यस्तननिवर्तंते तद्धामसततःसकाशान्नपुनःसंसारंन
प्राप्नुवंतीत्यनेनैवदेहत्वेनेत्यर्थः ननुतदेवकुतइत्यत्राहतदितियतोहे
तोर्ममकेशवादिचामरनिकरवंदितचरणपीठस्यसर्ववेदांतवेद्य
स्यजगदभिन्ननिमित्तोपादानकारणस्यसर्वेश्वरस्यतत्कारयेस्तत्र

कृतिसंबंधशून्येनात्म स्वरूपेणावस्थितं परमं प्रकृतिमुक्ता जीवा उ
त्कृष्टं नित्यमुक्तस्वरूपं धामस्थानं चैतन्नशान्तिं च न नित्यमेव मम विश्राम
स्थानमित्यर्थः २१ ॥

मधुसूदनी टीका ॥

यो भाव इहाव्यक्त इत्युक्तोऽक्षर इति चोक्तोऽत्रापि स्मृतिषु श्रुतिषु च तं भाव
माहुः श्रुतयः स्मृतयश्च पुरुषान्न परं किंचित्सा काष्ठा सा परा गति
रित्याद्याः परमामुत्पत्तिविनाशशून्यस्वप्रकाशपरमानंदरूपां गतिं पुरुषार्थविश्रा
न्तिं यं भावं प्राप्य न निवर्तन्ते पुनः संसाराय तद्धाम स्वरूपं मम विष्णोः परमं
सर्वोत्कृष्टं मम धामेति राहोः शिर इतिवद्भेदकल्पनया षष्ठी अतो
ऽहमेव परमा गतिरित्यर्थः [illegible]
[illegible]
[illegible] २१ ॥

सदानंदी टीका ॥

यो भाव इहाव्यक्तोऽक्षर इतीरितः तमुत्पत्तिविनाशाभ्यां शून्य
मानंदमव्ययं पुरुषार्थस्य विश्रान्तिं संप्राहुः परमां गतिं श्रुतयः स्मृ
तयश्चैव पुरुषान्न परं किंचिदिति यं भावं प्राप्य भूयो न निवर्तन्ते ब्रह्मन्नमने न नो
तत्स्वरूपं परं विष्णोर्मम सर्वात्मनो तमं अतोऽहमेव वेदान्तगम्योऽस्मि
परमा गतिः २१ ॥

नीलकंठीटीका ॥

अव्यक्तोऽक्षर इत्युक्त इति इदं पदं निरस्तं अतोऽश्नुते व्याप्नोतीति त्रिविध।
परिच्छेदशून्यमनुक्तं तं भावं परमां गतिं ब्रह्मलोकोऽनागतिरपरमा
कार्यत्वात् इयं तु परमा कार्यकारणातीतत्वात् आहुः एतस्य परमां गति
मित्यादयः श्रुतयः यं भावं प्राप्य न निवर्तन्ते पुनः संसारे न पतन्ति तदिति।
विधेयापेक्षं क्लीबत्वं सएव मम विष्णोः परमं उपाध्यस्पृष्टं धाम प्रकाशः
तद्विष्णोः परमं पदमिति श्रुतिप्रसिद्धं निष्कलं ब्रह्म २१ ॥

आनन्दीटीका

परतत्त्वं वेदवेदो वदन्तीत्यादिषु उक्तेनाव्यक्तः पुरुष एवोक्षरूपः प्र

तयश्चमुक्तः तमाहुः परमां गतिम् ततः परमन्यद्गन्तव्यं नास्ति
सर्वेषां तत्रैव परिनिष्ठितत्वात् ततविहृतीनोपकृतिरिवान्योगन्त
व्यश्चमर्थः विश्रान्तिपदपदृतिपदकेन विवर्णयति यं प्राप्य न निव
र्तन्ते तद्धाम परमं मम मम परमात्मस्वरूपस्य षड्विंशस्य महाविभोः त
द्धाम परमम् मितिस्वाभिन्नम् ततब्रह्मादिस्थानवत्स्थानितोऽयः को
पि देशः इत्यर्थः [illegible] २१ ॥

ज्ञातोत्पत्त्यभावात्तत्कस्मान्नोप रामकंठी टी॰ लभ्यत इत्याह ॥

अचिन्त्यस्वमायाशक्तिमोहितान्प्रतियथास्थितेन चिन्मयेन रूपेणाप्र
थमानत्वादव्यक्तः परमार्थतः पुनरक्षरो न क्षरति स्वात्मस्वरूपाय
च्यवत इति यद्वेवं वियोगभावस्तां परमां गतिमनन्तरां प्राप्तिमाहुस्तत्त्व
विदः अतएव कीदृशं तं यं प्राप्य मायात्मकेन प्रतिपद्य प्रशान्तमा
यान्तरस्य महाययोगात्मायोगिनो न निवर्तन्ते पुनः संसारसरणिं नाव
तरन्ति यतस्तथाविधो यो भावस्तन्मम परस्य ब्रह्मणः परमकारण
स्य परमेश्वरस्य धाम नित्योदितः प्रकाशो निरूपस्थानेवा ततएवं।
विधं मायेप्रपन्नानां तेन पुनरावर्तन्ते इति [illegible]
[illegible] २१ ॥

नन्वात्मभावमापन्नानां लासिकी [illegible] टी॰ प्रलयकाले विनाशो माभूत् सृष्टिकाले त्वभिव्यक्तिरूपा
पुनरावृत्तिरस्तीत्यत आह ॥

योऽव्यक्त इति भावोऽमयोऽक्षः शाहितः मोक्षरः स्वस्वभावादप्रच्युतो वि
मर्शात्मकस्य आत्मात्मकः नान्यः विमर्शरहितो भावः तदुक्तं स्वभावम
वभासस्य विमर्शं विदुरन्यथा प्रकाशोऽर्थोपरक्तोऽपि स्फटिकादिजडोपम
इति तमेवाक्षरं विमर्शरूपं परमां गतिमुत्कृष्टं मोक्षस्य प्राप्यरूपमा
माहुः श्रुतयः स्मृतयश्च तथाच श्रुतिः तावाले मरस्तु ममेतिनान्यः प
न्थाविमुक्तये इति पुरुषान्नपरं किंचित्साकाष्ठा सा परा गतिरिति
च यमक्षरस्वरूपं भावं प्राप्यात्मत्वेन प्रतिपाद्य योगिनो न निवर्तन्ते।
पुनः संसारसरणिं नावतरन्ति तदक्षरस्वरूपं मम परमेश्वरस्य संवि
त्प्रकाशस्य परमं धाम स्वरूपं तत्र मत्तोऽभिन्नम् अतश्चात्मभूतानां विदे
हमुक्तानां भावमात्मभावमापन्नानां सृष्टिकाले न पुनरावृत्तिरस्ति [illegible]

श्री: गी टी: अ: 113

[illegible] ॥ २१ ॥

पंचोली टीका

अविनाशी आत्मामार्गं दर्शयन्नाह अव्यक्तेति योसौ अव्यक्तः अक्षरः इत्युक्तः तमक्षरसंज्ञं परामुत्कृष्टां गतिमाहुः यं अक्षरं प्राप्य संसारायनिरंतरान् न निवर्तन्ते तद्धाम स्थानं परमुत्कृष्टं मम विष्णोः पदम् २१

श्रीधरीमतसिद्धायिनी ॥

एतदेव विनिगमयंस्तस्याप्युपायं निश्चयरूपं ध्यायन्नाह अव्यक्त इति तमाहुः परमां गतिमित्युत्तरवाक्यस्थेन तच्छब्देन यच्छब्द आक्षिप्यते यत्तदोर्नित्यसंबंधात् तथा च यो भावः अव्यक्तः अक्षर इत्यनेन प्रकारेणोक्तः प्रतिपादितः शास्त्रे इति शेषः कोर्थः शरीराभावाद्रूपादिरहितत्वादव्यक्तः सर्वेन्द्रियैरनुपलभ्यः अक्षरो नित्यः सदैकस्वभावत्वात् अथ च अक्षरैरिन्द्रियैरमत इत्यक्षरः शरीरी शरीरवत्पर्वेन्द्रियश्रमणं संभवतीति शरीरीति पर्यवसिते उत्कृष्टमनाधर्षेणाकृतशरीरोपीत्यर्थः तं परमेश्वरत्वे भावं तमेव परमं सर्वोत्कृष्टां गतिं प्राप्यमाहुः श्रुतिमंत इति शेषः अत एव च यद्धाम प्राप्य जना न निवर्तन्ते तत् परमं सर्वोत्कृष्टं मम धाम स्थानं भवतीत्यर्थः अत्र चेयमपरा व्याख्या अक्षरं ब्रह्म परममित्यत्रोक्तसंख्यं प्रतिसूत्रकोऽशमनुवदन्ननुरूपव्यापारविशेषद्वयविधायको वेदभागो ब्रह्मपादार्थ इति प्रतिपादितं तथा वाक्षरमेव वाव्यक्त इति कोर्थः प्रागुक्तनयेनाक्षरपादाभिधेया यन्नेवेदो व्यक्तपादेनाप्यभिधीयते तत आव्यक्ताक्षरपादोपयोगाविति स्थितं श्रुत्यतिशयोयं प्रकारो वेदविस्तृतिनिश्रुतेः आत् विष्णोः परमकारणात्सर्वेश्वरात्स्वरतिसर्वतः प्रकटीभवतीत्यात्वं तदेव आत्मपरमेश्वराख्यक्तः प्रकटीभूत इत्यव्यक्तः यस्य

निःश्वसितं वेद इति श्रुतिरत्र प्रमाणं एवं वाव्यक्ताद्व्यक्तयः सर्वा इ
त्यत्रापि अहरागमे ब्राह्म दिवसस्फूर्तौ सत्यां सर्वा व्यक्तयो जीवजा
तयो व्यक्ताद्दृश्ये देहत्व भवंति उत्पद्यंते तथैव राज्यागमे ब्राह्म नि
शायां प्रवृत्तायां सत्यां तत्रैव तस्मिन्नेवाव्यक्तेदेव्यक्त संज्ञके न व्य
क्तोव्यक्तः अप्रकटः परमेश्वर एव प्रलीन इति यावत् तादृशी संज्ञा
यस्य तस्मिंस्तादृशेसति परमेश्वर एव प्रलीने सतीति यावत् ताः स
र्वा व्यक्तयः सर्वभूतानि प्रलीयंते तेन रहिता भवंति स एवायं य एव पू
र्वकल्पे प्रभूत्य ज्ञ आसीदित्यर्थः भूतग्रामस्तद्देहाविर्योभौति
हि कः सगोत्राह्मादिवसेषु भूत्वा भूत्वा पुनः पुनः प्रकटीभूय राज्यागमे
दिवसरूपकल्पावसाने सति प्रलीयते तद्रहितो भवति दिनागमे व
रात्रिरूपकल्पक्षये प्रभवति प्रकटी भवति कीदृशोवशः अस्यस
र्वेश्वरस्य विसर्गो वशः आयत्तोस्वतंत्र इति यावत् अत्यपराव्याख्यात्र
स्तुतार्थी वितास्वीकर्तव्या जीवानां वपुर्वेदः प्रभवः परंपरया
भवतीत्यत्राहुर्वंति भूतानीत्यत्र प्राक् अतिपादितं एवं प्रकारेण
नमव्यक्तसंज्ञकं पुनर्वेदपरमांगतिं परां पूर्णानंनं सिद्धिं सत्यनये
ति परमात्मा परमांगतिं उपायमाहुर्थ नुवेदतत्वज्ञा इति शेषः अ
तएव च तत्परमं पाहुर्यातकं धाम तेजो ममैव संबंधि भवति मय्ये
व स्वकीयस्तेजोंशात्तेषु मामेव शरणं प्रपन्नेषु महावीरेषु समर्पि
तोस्तीति तात्पर्यं किं तत् यं प्राप्य महातेजः आपंभूतं व प्राप्य न निवर्तं
ते संग्रामान्महावीरा इति शेषः शत्रून जित्वैव जीवंत एवभयशोक
मोहादिरहितो रणमध्यान्न पलायंते किंतु शत्रून जित्वा तेरेव हता वा
संतो रणभूमिं त्यजंतीति संग्रामकास्तु समये संग्रामादनिवर्तिन
इति यत्प्रमतेजोंशेनानुप्राणिता महावीराः शत्रून जित्वा राज्यसुखं
वानुभूयांते मल्लोकान्न प्रत्यावर्तंत इत्यर्थः २१॥

੨੧॥

भाषा अनुवाद ॥

अब परमेश्वरके अविनाशित्वमे प्रमाण वर्णाय कर कहतेहैं किंजोभा
वरूप इन्द्रिय अगोचर प्रवेश नाश शून्य अक्षर स्वरूप परमेश्वर जि
ससे इस विश्वका उद्भव है औ श्रुति सब जिसको अक्षर कहती है कि
पुरुषान्न किञ्चित्पर सा काष्ठा परागतिः जोसब के पर और जिससे
पर कोई नही ऐसे श्रुति जिसको उत्कृष्ट गति कहती हैं और जिसको
पाय कर फेरि संसार गति नही होती वही मेरा स्वरूप है इससे
मैंही परमगति होंयहजानो २१ ॥

दोहा

अक्षर कह अव्यक्त जो परम गति कह्यो ताहि जाहि मिलें नहि
फिरत हे सो परम धाम मम आहि २१॥

115

पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया यस्या
न्तःस्थानि भूतानि येन सर्वमिदं ततं २२ ॥

शाङ्करभाष्यटीका

तल्लब्धेरुपाय उच्यते पुरुषः पुरि शयनात् पूर्णत्वाद्वा स परः पार्थ परो
निरतिशयो यस्मात् पुरुषान्न परं किञ्चित् स भक्त्या लभ्यस्तु ज्ञान
लक्षणयानन्यया आत्मविषयया यस्य पुरुषस्यान्तःस्थानि मध्यस्था
नि कार्यभूतानि कार्यं हि कारणस्यान्तर्वर्ति भवति येन पुरुषेण सर्व
मिदं जगत्ततं व्याप्तं आकाशेनेव घटादि २२ ॥

आनन्दगिरिकृतटीका

ननु व्यक्तादतिरिक्तस्य तदखिलकारणस्य परमपुरुषस्य प्राप्तौ कश्चिदसा
धारणो हेतुरेषितव्यो यस्मिन् प्रेत्यापूर्वकारी न तत्प्रेत्यपा प्रहेतो निर्दि
ष्टोऽस्ति तत्राह तल्लब्धेरिति परस्य पुरुषस्य सर्वकारणत्वं सर्वव्या
पकत्वञ्च विशेषणद्वयमुदाहरति यस्येति निरतिशयत्वं विशदय
ति यस्मादिति तच्छब्दो ऽवधारणार्थः भक्तिर्भजनं सेवा प्रदक्षिणप्रणा
मादि लक्षणा तां व्यावर्तयति ज्ञानेति उक्तायां भक्तेर्विषयतो वैशिष्ट्य
माह अनन्ययेति कोऽसौ पुरुषो यद्विषया भक्तिस्तत्राह स इति पुरुषस्य विशे
षणान्तरमाचष्टे यस्येति कथं भूतानां तदन्तःस्थत्वं तत्राह कार्यं
हीति स पर्यगादिति श्रुतिमाश्रित्याह येनेति २२ ॥

स्वामिकृतटीका

तत्प्राप्तौ च भक्तिरेवोपाय इत्युक्तमेवेत्याह स एवाहं परः पुरुषोऽ
नन्यया एकान्तभक्त्यैव लभ्यो नान्यथा परत्वमेवाह यस्य कारणभूतस्या
न्तर्मध्ये भूतानि स्थितानि येन च कारणभूतेन सर्वमिदं जगत्ततं व्याप्तं २२

[illegible]
[illegible]

पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया। यस्यां
न्तःस्थानि भूतानि येन सर्वमिदं ततम्॥ २२ ॥

शाङ्करभाष्यटीका

तल्लब्धेरुपाय उच्यते पुरुषः पुरि शयनात् पूर्णत्वाद्वा स परः पार्थ परो
निरतिशयो यस्मात् पुरुषान्न परं किञ्चित् स भक्त्या लभ्यस्तु ज्ञान
लक्षणयानन्यया आत्मविषयया यस्य पुरुषस्यान्तःस्थानि मध्यस्था
नि कार्यभूतानि कार्यं हि कारणस्यान्तर्वर्ति भवति येन पुरुषेण सर्व
मिदं जगत्ततं व्याप्तं आकाशेनेव घटादि २२ ॥

आनन्दगिरिकृतटीका

ननु व्यक्तादतिरिक्तस्य तद्विलक्षणस्य परमपुरुषस्य प्राप्तौ कश्चिदसा
धारणो हेतुरेषितव्यो यस्मिन् प्रेक्षापूर्वकारी नतप्रेक्षया प्रवर्तेतानिहे
णोति तत्राह तल्लब्धेरिति परस्य पुरुषस्य सर्वकारणत्वं सर्वव्या
पकत्वञ्च विशेषणद्वयमुदाहरति यस्येति निरतिशयत्वं विशदय
ति यस्मादिति तच्छब्दो ऽभ्यारणार्थः भक्तिर्भजनं सेवाप्रदक्षिणप्रणा
मादिलक्षणान्तां व्यावर्तयति ज्ञानेति उक्तायाभक्तेर्विषयतो वैशिष्ट्य
माह अनन्ययेति कोऽसौ पुरुषो यद्विषया भक्तिस्तत्राभ्या पर्यासत
एवोपात्तवर्त्यचेष्ट यस्येति कथं भूतानां तदवस्थत्वं तत्राह कार्यं
हीति स पर्यगादिति श्रुतिमाश्रित्याह येनेति २२ ॥

स्वामिकृतटीका

तरं तत्प्राप्तौ च भक्तिरन्तरङ्गोपाय इत्युक्तमेवेत्याह स एवाहं परः पुरुषोऽ
नन्ययापकान्तभक्त्यैव लभ्यो नान्यथा परत्वमेवाह यस्य कारणभूतस्यां
तर्मध्ये भूतानि स्थितानि येन च कारणभूतेन सर्वमिदं जगत्ततं व्याप्तं २२

[illegible]
[illegible]

गी॰ टी॰ अ॰ तेन[illegible]माह २२ ॥

116

पिशाचभाष्यटीका

पुरुषः स पर इति यस्यांतःस्थानि भूतानि अंतःस्थित्वे हेतोर्येन तस्यात्मनि येना व्यक्तेन इदं सर्वं ततं व्याप्तं २२

रामानुजभाष्यटीका

ज्ञानिनः प्राप्यं तस्मात् त्वं न विभक्तमित्याह पुरुष इति मत्तः परतरं नान्यत् मयि सर्वमिदं प्रोतं मामेभ्यः परमव्ययं इत्यादिना निर्दिष्टस्य योऽस्यांतस्थानि भूतानि येन परेण पुरुषेण सर्वमिदं ततं सः परः पुरुषोऽनन्यया भक्त्या लभ्यः आत्मयाथात्म्यविदः परमपुरुषनिष्ठस्य च साधारणमर्चिरादिकां गतिमाह द्वयोरप्यर्चिरादिका गतिः श्रुतौ श्रुता सा चापुनरावृत्तिलक्षणा यथा पंचाग्निविद्यायां तद्य इत्थं विदुः ये चेमेऽरण्ये श्रद्धां तप इत्युपासते तेऽर्चिषमभिसंभवंत्यर्चिषोऽहरित्यादेश्चार्चिरादिकया गत्या गतस्य परं ब्रह्मप्राप्तिरपुनरावृत्तिश्चोपात्ता स एतान्ब्रह्म गमयति एतेन प्रतिपद्यमाना इमं मानवमावर्त्तं नावर्त्तंत इति न च ना॰

प्रजापतिवाक्यादित परविद्यागम्भूतानामविषयान्तद्य इत्थं विदुरिति गतिश्रुतिः ये चेमेऽरण्ये श्रद्धां तप इत्युपासत इति परविद्यायाः पृथक्छ्रुतिश्रुतिवैयर्थ्यात् पंचाग्निविद्यायामिति तत्र पंचम्यामाहुतावापः पुरुषवचसो भवंतीति रमणीयचरणाः कपूयचरणाः इति पुण्यपापहेतुको मनुष्यादिभावो ऽयमेवं भूतानामंतरसंस्पृष्टानामात्मनस्त्वनन्य

गा॰ विषयमात्रमिति चिदचितोर्विवेकमभियायत तद्य इत्थं विदुस्तेऽर्चिषमभिसंभवंति इमं मानवमावर्त्तं नावर्त्तंत इति विविक्ते चिदचिद्वस्तुनी त्याज्यतया प्राप्यतया च तद्य इत्थं विदुस्तेऽर्चिरादिना गच्छंति न च पुनरावर्त्तंत इत्युच्यते आत्मयाथात्म्यविदः परमपुरुषनिष्ठस्य स एतान्ब्रह्म गमयतीति ब्रह्मप्राप्तिवचनात् अचिद्वियुक्तमात्मवस्तु ब्रह्मात्मकतया ब्रह्मशेषतैकरसमित्यनुसंधेयं परशेषतैकरसत्वं च यथात्म।

नितिष्टन्यस्यात्माशरीरमित्यादिश्रुतिसिद्धं २२ ॥ ∴ ॥

अभिनवगुप्तकृतटीका

पूर्वश्लोकउक्तार्थश्च २२

उक्तप्रकारं कालसंकलनाविवर्जितं तत्त्ववासुदेवं तत्त्वं व्याप्तं सर्वव
गतं तत्त्वं पाव्यक्तं दुःप्रापत्वात् तच्च भक्तिलभ्यमित्यावेदितं शाक्त
तत्रस्येचैनहि संयतवल्ल विनाशाद्रूपसदातनथाभूते तत्र कः पु
नः शाहस्याहृतिशाहस्य चार्थः सहिमध्येनतत्स्वभावविच्छेदाये।
त्तः नचसदातनविशेषाभीर्णविश्रातिरिक्तविश्वनिष्टात्मकपर
वाथत्वात्तस्य स्वभावस्य परमेश्वरस्य तद्भावप्राप्तस्य येन स्वभा
वविच्छेदः कोपि कदाप्यस्ति अतो युक्तमुक्तं मामुपेत्य त्विति
एवंवमततताभ्यासेन येषां क्लेशं विनैव भगवदाभिसंश्लेषो हृतमुक्तं २२

परमार्थप्रपाटीका

अव्यक्तमेव विशिनष्टि पुरुष इति स एव परः उत्कृष्टः पुरुषः एतावान
स्य महिमा ततो ज्यायांश्च पुरुष इति श्रुतेः स च पुरुषः अनन्यया अ
व्यभिचारिण्या भक्त्या लभ्यः पुनः स कः इत्याह यस्यान्तःस्थानि सर्वा
णि भूतानि संति तथा येन सर्वमिदं दृश्यजातं तादात्म्यभावेन ततं वि
स्तारं प्राप्तं जले तरंगा इवेत्यर्थः २२ ॥

वनमाली टीका ॥

स एवात्तमत्वधीहृदेवकाविच्छिन्नप्रेमप्रवाहरूपया भक्त्यैव प्राप्यो इत्यभि
त्याह पुरुष इति स परो निरतिशयत्वेन गुणैः पुरुषो हमेवानन्ययान
विद्यते नैव विषयो यस्यास्तया अविच्छिन्नप्रेमप्रवाहरूपया भक्त्यैव लभ्यो
नान्यथा स कः इत्यपेक्षायामाह यस्य पुरुषस्यान्तःस्थानि अन्तर्वर्तीनि सर्वा
णि आकाशादीनि भूतानि गुणाधाराणि इत्यर्थः येन पुरुषेण इदं सर्वं जीवज
डात्मकं जगत् व्याप्तं यच्च किंचिज्जगत्यस्मिन् दृश्यते श्रूयतेपि वा अन्त
र्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः इत्यादिश्रुतेः सर्वमङ्गलसर्गो
जगदुदयादिकर्ता सर्वेश्वरो नन्यभक्तिं विना दुःप्राप इति भावः २२

117

ऊसमवैजयन्ती टीका ॥

पवंकैवल्यार्थिनांप्राप्यंकेवलमात्मस्वरूपंतत्प्रतिपद्यार्थेदानीतानितां
यत्प्राप्यंपरमात्मस्वरूपंतत्त्वनन्यया भक्त्यैवलभ्यमित्याह पुरुषः सपरः
पार्थेति हेपार्थसमर्थत्वमनेनयुक्तस्त्वमनन्ययाभक्त्यालभ्यंसर्वेषुरमास्ता
वक्षिमकरोस्तत्त्वतोऽन्यःकोपीदृशःसमर्थोनभवेदितिसूचितम् ये
मामेभ्यःपरमव्ययमनः परतरंनान्यत्किंचिदस्तिमयिसर्वमिदंप्रोत
मित्यादिनामयाकथितः समष्टचेतनाचेतनप्रकृतिद्वयाद्युत्कृष्टःपुरु
षःपरमप्राप्यः हे अनन्यचेताःसततमित्यादिनोदितयानन्यये
कांतिकयाभक्त्यैवलभ्यःलब्धुंशक्योयोगामिश्रयातुदुःशकइत्य
र्थः ननुतस्यकिंलक्षणमित्यपेक्षायामाह यस्येति यस्यादंकृत्स्न
य॰ स्यजगतःप्रभवःप्रलयस्तथेत्यादिनोक्तलक्षणस्यांतर्मध्येस्थितिहेतौ
स्थितस्यानिभूतानिचेतनाचेतनानिभवंति ननुतर्हिकिमाकाशः
नि॰ स्याधतस्यापन्नस्यानिभूतानसुरित्यपेक्षायामाहयेनेतियेनप
रमपुरुषेणेदंचेतनाचेतनात्मकंसर्वंजगत्ततंव्याप्तं आकाशस्य
चेतनासावयवेपदार्थेव्याप्तिस्त[illegible]पिनिरवयवेचेतनेनतदसं
भवत्वात् ननुत्वदुक्ताःकस्मिन्कालेप्रयाताःसंतोऽपुनरावृत्तिंयांति
त्वदुक्तिरहितास्तुकस्मिन्प्रयाताःसंतःपुनरावृत्तिंप्राप्नुवंतीत्याशं
कायांकालशब्दोपलक्षितमग्निप्रमुखनामकंमार्गद्वयमाह २२ ॥

इदानीमनन्यचेताःसततं यो मां स्मरति नित्यशः तस्याहं सुलभ इति प्रागु
क्तंभक्तियोगमेवतत्प्राप्त्युपा

मधुसूदनी टीका

यमाह ॥ सपरोनिरतिशयःपुरुषःपरमात्माहमेवअनन्ययानविद्यतेऽन्योविष
योयस्यांतयाप्रेमलक्षणयाभक्त्यैवलभ्योनान्यथा सकदृत्यपेक्षा
यामाह यस्यपुरुषस्यांतःस्थानिअंतर्वर्तीनिभूतानिसर्वाणिकार्या
णिकारणांतर्वर्तित्वात्कार्यस्य अतएवयेनपुरुषेणसर्वमिदंका
र्यजातंततंव्याप्तं यस्मात्परंनापरमस्तिकिंचित्यस्मान्नाणीयोन
ज्यायोस्तिकश्चित्वृक्षइवस्तब्धोदिवितिष्ठत्येकस्तेनेदंपूर्णंपुरुषे
णसर्वंयच्चकिंचिज्जगत्यस्मिन्दृश्यतेश्रूयतेपिवा अंतर्बहिश्चतत्स
र्वंव्याप्यनारायणःस्थितः सपर्यगाच्छुक्रमित्यादिश्रुतिभ्यः सगु
णब्रह्मोपासकास्त्वदप्राप्यननिवर्तंते किंतुक्रमेणमुच्यंते तत्र

नलोकभोगासक्तानां तत्त्वसम्यग्दर्शिनां तेषां मार्गो येन ज्ञातुं विद्यते न तत्त्वसम्य
ग्दर्शिनामिव न तत्त्वपैत्रे ह्युपासकानां न लोकान् प्राप्तये देवयानमार्ग उपा
दिश्यते पितृयानमार्गो यस्मात्सत्त्वतस्तत्त्वतये २२ ॥

सदानंदी टीका ॥

तस्मात्सोऽसौ प्राप्यते मम त्वेव मम भक्तिरिति तीर्थेन सर्वोत्कृष्टः स पुरुषः परमात्मा
ह्यहमेव च प्रेमलक्षणया भक्त्या तान लक्षणैर्वा लभ्यो भिन्नान्यथाका
ष्ठकोटिभिः संचितैरपि वक्तव्यः स च कोऽसावित्याकांक्षायामाह समापतिः य
स्यापि स्थानभूतस्यान्तर्वर्तीन्यविलान्यपि भूतानि कल्पितान्येव येन वि
श्वमिदं ततं आकाशेनेव कुंभादि सोऽहमेव महेश्वरः २२ ॥

नीलकंठी टीका ॥

एवं ते येन प्रयाणमभिहितं ब्रह्मलोकात् जगत्कारणमुपासनीयमिति तस्य स्वरूपमाह पु
रुष इति तत्राहुः सर्वत्र लक्षणं योगेन तात्पर्यः हे पार्थ यो भक्त्या आराधनेन
उपासनेनेति यावत् कीदृश्या अनन्यया नास्य मोक्षो यस्यां सा तया उपास्यो
पासकभेदमंतरेण अहं ब्रह्मरूप इत्यर्थः तया भक्त्या यो लभ्यः स परः सर्वा
कारत्वाहं तानन्तगुणात्मत्वादसःकारणत्वमिति यावत् लभ्यत्वादेवास्याम
त्वमपि तया भक्त्या च लभ्यश्च निरूप्यते अस्य कारणत्वमेव यस्येति य
स्य पुरुषस्यान्तःस्थानि बीजे वृक्ष इव सर्वाणि वियदादीनि स्थावरजंगमा
नि येन च सर्वमिदं ततं व्याप्तमनुपादानत्वात्स भक्त्या लभ्य इति योजना २२

आनंदी टीका

स्वरूपमाह ॥

स प्राप्यते पुनर्जन्मलाभं लभन्ते योगिनो येन स परः पुरुषः परस्मात् प्रकृतिमा
यतेभ्यः पुरुषेभ्योऽन्यः निरस्तदुःखस्वभावः परत्वेन स्वरूपं च्छिं हिंशकः पा
र्थ भक्त्या लभ्यस्त्वनन्ययेति विजानता नन्यविषयत्वेन सर्वोत्कृष्टो योगेन लभ्य इ
त्यर्थः अस्यैवोपदेशस्यैषैव फलं लक्षणान्तरमाह स्पष्टम [illegible]
[illegible]
[illegible]
[illegible] २२ ॥

रामकंठी टीका

तथाविधानां योगिनामपुनरावृत्तिकारणं प्रतिपादितम् तस्यैव यथोक्तस्य भावस्य स्व
रूपं निगमयंस्तत्प्राप्त्युपायं स्मारयन्नाह ॥

गी.
टी.
ग्र.

118

यः पूर्वं परोक्षस्वरूपो भावः स परः सर्वस्मात्तद्व्यतिरिक्तस्वभावत्वान्निरति
शयः पुरुषशब्दवाच्यः सर्वशरीरान्तः स्थायित्वात्पुरुषः परमात्माकी
दृशउक्तवक्ष्यमाणप्रकारेण यं प्राप्यात्मत्वेन प्रतिलभ्य योगिनः संसारक्ले
ननानाविधसमाधिभेदाः पुनर्भूयो जन्मसंसारितयोत्पत्तिं न लभन्ते।
तथा यस्यैकस्यान्तः सामान्यस्य विलक्षणो हृदि स्थितानि सर्वाणि चरा
चरभूतानि तिष्ठन्ति तेषामेव मध्ये ममपि त्वन्मयतया स्फुरन्नामहृदयैकविन्मा
त्रानुप्रवेशमन्तरेण सत्तासद्भावः अत एव येन यस्मिन्सकलजगदाद
र्थसार्थसामान्याधारे सर्वमिदं प्रतिष्ठितं तत्त्वतत्त्वव्यवस्थानम् स पुनरिमं
भूतो भक्त्या श्रुतिपादितेनानेरेन रक्षक्षातनादिसनातिपर्यन्तचतरवस्था
रूपया मेवया लभ्यः प्राप्यः कीदृश्यानन्यया तत्स्वरूपव्यतिरेकेण सर्वा
वस्थासु विद्यमानमन्यदालम्बनं यस्यास्तया नन्यविषयेति [illegible]
[illegible] २२ ॥

नन्वात्मभूताविदेहस्तु लासिकी [illegible]टीका किमापत्स्यमानादेहं परित्यज्यैवेचात्म

मापद्यन्ते चेत्तर्हि किमिति न जीवन्नपव तेवैस्यात्मरूपलभन्ते इत्यत आह ॥

सम्प्रसिद्धः परोत्तरात्मा पेत्तयाप्रशंसार्हो उत्कृष्टः पुरुषउत्तमः पुरुषो
विष्णात्मा ईश्वराख्यः तरत्तरात्मनो व्यतिरेके अनन्यया न विद्यते सदा।
र्त्तिनिवारणादियस्यां तया एकान्तया भक्त्यानुरागेन लभ्यः प्राप्यः शाक्तः
परत्वमेवाह यस्योतमपुरुषस्यान्तर्मध्ये भेदेन स्थितानि भूतानि येन
वकारणभूतेन सर्वमिदं जगत्तन्तं स्वरूपतया व्याप्तम् अतः परयाभ
क्त्याविना जीवन्मुक्तिर्दुर्लभा [illegible]
[illegible] २२

पंचोली टीका

तत्प्राप्त्युपायमाह पुरुषइति तत्पुनः स परः निरतिशयः पुरुषः
पूर्णः अनन्यया आत्मविषयया भक्त्या ज्ञानलक्षणया लभ्यः यस्य
कारणरूपस्यांतः स्थितानि मध्ये स्थितानि भूतानि भूतकार्याणि रू
पाणि महदादिचतुःस्त्रयेन सर्वमिदं जगत् व्याप्तं यथा मृदा घटादिकं का
रणादिकार्यं व्याप्यते २२

सगावीरसमसिद्धोधिनी॥

अथतत्स्वरूपप्रतिपादनपूर्वकंतत्प्राप्तेःसुकरमुपायंकथयति पुरुषइति सोहंपरःपुरुषःपुरुषोत्तमः अनन्याविषयया साधारणयाचभक्त्यासर्वात्मवस्यात्वाराधनया लभ्यःप्राप्योस्मि सःकः यस्य ममांतः स्थानिउदरदरीगतानिसर्वाणिभूतानिभवंति येन चमया इदंसर्वंभूतकदंबकंततंव्याप्तमधिष्ठितमित्यर्थः परमेश्वरविषयदृढभक्तिपूर्वंस्ववर्णोचितेयुद्धादिव्यापारेप्रवर्तमानैः कर्मयोगिभिर्भक्तिरपिसफलमेवेतिभावः २२॥

मधुभाष्य

पुरुषइति यत्कालाद्यभिमानिदेवतागता आवृत्यनावृत्तीगच्छंति तामाह २२॥

119

भाषा अनुवाद ॥

इस परमेश्वर की प्राप्ति मे भक्ति ही सबसे बढ़ि के परम उपाय है इसको कहते है कि सोई परमपुरुष मै अनन्त भक्तिसे मै मिलताहूं और अब प्राप्तव्य पुरुष की श्रेष्ठता कहतेहैं कि जिस पुरुष मे ये भूत सकल स्थितहैं और जो कारण रूपसे समस्त जगत मे व्याप्त रहा है सोई मैहूं २२ ॥

दोहा

हे पार्थ परपुरुषसो अनन्यभक्त मिलैं जोय जाके अंतर्भूत
सभ जासें विस्तर होय २२॥

118

यत्रकालेत्वनावृत्ति मावृत्तिंचैवयोगिनः प्रया
तायान्तितंकालंवक्ष्यामिभरतर्षभ २३ ॥

शाङ्करभाष्यंटीका ॥

प्रकृतानां योगिनां प्रणवावेशितब्रह्मबुद्धीनां कालान्तरमुक्तिभाजां
तत्ब्रह्मप्रतिपत्तये उत्तरो मार्गो वक्तव्य इति यत्र कालइत्यादि विवक्षि
तार्थसमर्पणार्थमुच्यते आवृत्तिमार्गोपन्यास इतरमार्गस्तुत्यर्थः यत्र
ति यत्रकालेप्रयाताइति व्यवहितेन सम्बन्धः यत्र यस्मिन् काले त्व
नावृत्तिमपुनर्जन्म आवृत्तिं तद्विपरीतांचैवयोगिन इति कर्मिणश्चो
च्यन्ते कर्मिणस्तु गुणतः कर्मयोगेन योगिनामिति विशेषणात्
तत्र विभज्यन्ते योगिनः यत्र काले प्रयाता मृता योगिनो नावृत्तिं या
न्ति यत्र कालेच प्रयातास्ता आवृत्तिं यान्ति तंकालं वक्ष्यामिभरतर्षभ २३

आनन्दगिरिकृत टीका ॥

ननु ज्ञानायत्ता परमपुरुषप्राप्तिरुक्ता नच ज्ञानं मार्गमपेक्ष्य फलाय
कल्पते विदुषो गमनतत्कालनिषेधश्रुतेः तथाच मार्गोक्तिरयुक्तेत्याशं
क्य सगुणशरणानां तदुपदेशोऽर्थवानित्यभिप्रेत्याह प्रकृतानामिति
वक्तव्यइति यत्रकाल इत्याद्युच्यते इति सम्बन्धः सचेद्वक्तव्यस्तर्हि
किमित्यध्यात्मादिभावेन सविशेषं ब्रह्म ध्यायतां फलाप्तये मूर्द्धन्य
नाडीसम्बन्धे देवयाने पथ्युपास्यतयावक्तव्ये कालोनिर्दिश्यते तत्रा
ह विवक्षितेति सोऽर्थो मार्गस्तदुपलक्षितत्वेन कालोक्तिरित्यर्थः पितृ
यानमार्गोपन्यासस्तर्हि किमिति क्रियते तत्राह आवृत्तिमिति मार्गा
न्तरस्यावृत्तिफलत्वादस्यचानावृत्तिफलत्वात्तदपेक्षया महीयानय
मिति स्तुतिर्विवक्षितेति भावः योगिन इति ध्यायिनां कर्मिणां च त
न्त्रेणाभिधानमित्याह योगिन इति कथं कर्मिषु योगिशब्दो वर्तता
मित्याशंक्यानुष्ठानगुणयोगादित्याह कर्मिणस्त्विति गुणतो योगि
न इति संबन्धः तत्रैव वाक्योपक्रमस्यानुकूल्यमाह कर्मयोगेनेति
अवशिष्टान्यक्षराणि व्याचष्टे वाक्यार्थमाह यत्रेति योगिनो ध्या
यिनोऽत्र विवक्षिताः ये आवृत्तावधिकृता योगिनः कर्मिण इति विभा
गः कालप्राधान्येन मार्गद्वयोपन्यासस्योपक्रमस्तत्रैव प्रधानो हान्य

तदेवं परमेश्वरोपासकाः तत्पदं प्राप्य न निवर्तन्ते अन्ये त्वावर्तन्त इत्युक्तं तत्र केन मार्गेण गता नावर्तन्ते केन वावर्तन्त इत्यपेक्षायामाह +

गी.
टी. अ.

देवयानं पन्थानमवतारयति तं कालमिति २२ ॥

स्वामिकृतटीका ॥

अन्ये

+ तदेवं परमेश्वरोपासकास्तत्पदं प्राप्य न निवर्तन्ते त्वावर्तन्त इत्युक्तं त
त्र केन मार्गेण गता नावर्तन्ते केन वावर्तन्त इत्यपेक्षायामाह यत्रे
ति यत्र यस्मिन् काले प्रयाता योगिनोऽनावृत्तिं यान्ति यस्मिंश्च काले
प्रयाता आवृत्तिं यान्ति तं कालं वक्ष्यामीत्यन्वयः अत्र च रश्म्यनुसा
री अतस्मायनेऽपि दक्षिणे इति सूचितन्यायेनोत्तरायणादिकालवि
शेषमरणस्य त्व विवक्षितत्वात् कालशब्देन कालाभिमानिनीभि
रातिवाहिकीभिर्देवताभिः प्राप्यो मार्ग उपलक्ष्यते अतोयमर्थः यस्मि
न् कालाभिमानिदेवतोपलक्षिते मार्गे प्रयाता योगिन उपासकाः
कर्मिणश्च यथाक्रममनावृत्तिमावृत्तिं च यान्ति तं कालाभिमा
निदेवतोपलक्षितं मार्गं कथयिष्यामीति अग्निज्योतिषोः कालाभि
मानित्वाभावेऽपि भूयसामहरादिशब्दोक्तानां कालाभिमानित्वात्सह
चर्याद्वाम्रवनमित्यादिवत् कालशब्देनोपलक्षणमविरुद्धं २३ ॥

पिशाचभाष्यम् टीका ॥

यत्रकाले त्वनावृत्तिमपुनरागमनं आवृत्तिं पुनरागमनं योगिनस्तं कालं व
क्ष्यामि भरतर्षभ २३ ॥

रामानुजभाष्यं टीका

यत्रेति अत्र कालशब्दो मार्गस्याहः प्रभृति संवत्सरान्तकालाभिमानि
देवताभूयस्त्वान्मार्गोपलक्षणार्थः यस्मिन्मार्गे प्रयाता योगिनोऽना
वृत्तिं पुण्यकर्माणश्चावृत्तिं यान्ति तं मार्गं वक्ष्यामीत्यन्वयः २३ ॥

अभिनवगुप्तकृत टीका [इदानीमुक्तान्याये पवर्गभोगंग
तेषां कश्चिद्विशेष उच्यते अना
मीतः आवृत्तिर्भोगाय २३]

परमार्थप्रपा टीका ॥

अथ यं प्राप्य न निवर्तन्त इति सर्वमुक्तं तत्रमद्उपासकानां योगिनां वपु
नरावृत्त्यनावृत्त्युपलक्षकं कालं तत्प्रभावेन मार्गद्वयमसौ आह यत्रेति
भो भरतर्षभ योगिनो यत्र यस्मिन् काले प्रयाताः त्यक्तदेहाः सन्तः अना
वृत्तिमपुनर्जन्म आवृत्तिं च पुनर्जन्म यान्ति प्राप्नुवन्ति तं कालं वक्ष्यामि अ

नावृत्त्यावृत्त्यफलदात्कं समयं वक्ष्यामि २३ ॥

वनमाली टीका

भगवंतं प्राप्तानामपुनरावृत्तिरेवेषां पुनरावृत्तिरित्युक्तं तदुभयेषां मार्गं
वक्तुं प्रतिजानीते यत्रेति तत्र ये योगिनः कर्मयोगिनश्च मृताः सन्तो यत्र
कालाभिमानिदेवोपलक्षितमार्गं वक्ष्यामीत्यर्थः यद्यर्चिरादि
मार्गगतानामप्याब्रह्मभुवनेत्यनेन पुनरावृत्तिरुक्ता तथापि पितृ।
यानगतानां सर्वेषां पुनरावृत्तिर्देवयानगतानां भगवद्भक्तानामेव मपि १
नानेषामिति भावः यद्वा पुनरावृत्तिर्नास्त्येषां कर्मिणां पितृयानेनैव ग
तिर्न त्वर्चिरादिमार्गेण अर्चिरादिमार्गेण तेषां पतनं ब्रह्मगमयतीति पर
ब्रह्मप्राप्तिश्रुतेः आब्रह्मेति तत्केवलकर्मिणां भगवद्विमुखानां ब्रह्मलो
कगतानामपि पुनरावृत्तिः वस्तुतो भगवद्विमुखानामर्चिरादिमार्गेण
तत्र गमनस्यैवासंभवात् अतो ब्रह्मलोकगताः क्रमेण मुच्यन्ते।
एवं न त्वावर्तन्ते किंतु त्रि[illegible]लोकीस्थाः कर्मिण एवावर्तन्त इति भावः २३

ननु त्वद्भक्ताः कस्मिन्का लेन्याताः संतः पुन

ॐ समसैवगयन्ती टीका ॥

ले प्रयाताः सन्तोऽपुनरावृत्तिं यान्ति त्वद्भक्तिरहिताश्च क
रावृत्तिं प्राप्नुवन्तीत्याशंक्यां कालशब्दोपलक्षितमर्चि
धूमनामकं मार्गद्वयमाह ॥

त्रिभिः यत्र काले त्विति हे भरतर्षभ भरतवंशश्रेष्ठ यत्र यस्मिन्काले काला
भिमानदेवतालक्षितेऽर्चिरादौ धूमादौ वा मार्गे कालशब्देनात्र कालाभि
मानी देव उच्यते यतो नैतत्समेव वक्ष्यमाणयोरग्निधूमशब्दयोः काल
वाचकत्वाभावात् ननु यथैव तर्हि दृष्टवाक्ये महत्त्वात्कालोक्तिः कथं
क्रियते भगवतेति चेन्न बहूनामहरादीनां रात्र्यादीनां च कालवाचित्वा
त्कालोक्तिरविरुद्धेवेति प्रयाता प्रकर्षेण स्थूलदेहं त्यक्त्वा भूलोकान्म
र्त्यलोकं गच्छन्तो योगिनोऽष्टाङ्गादिसाधनवन्तस्तन्निष्ठा येनानावृत्तिमपु
नरावृत्तिमेव आवृत्तिं पुनरावृत्तिमेव वा यान्ति अर्चिरादिमार्गेण धू
मादि[illegible]मार्गेण च गच्छन्ति तं कालं मार्गं वक्ष्यामि अनन्तरमेव क
थयिष्यामि २३ ॥

सगुणब्रह्मोपासका गामप्राप्तत्र सम्यग्दर्शना

मधुसूदनी टीका ॥

तत्त्वदर्शनसाधननिवर्तने किं तत्क्रमेण मुच्यन्ते न तत्र तल्लोकभो
नानेषां मार्गोपेक्षा विद्यते न तु सम्यग्दर्शिनामिव नदनपेक्षत्वं उपासकानां त

प्राणे तद्ब्रह्मणा नंतरं यत्र यस्मिन्काले कालाभिमानिदेवतोप।
लक्षिते मार्गे प्रयाता योगिनो ध्यायिनः कर्मिणश्च अनावृत्तिमा

लोकप्राप्तये देवयानमा
र्गोऽपदिश्यते पितृयानो
मार्गोपन्यासस्तु तत्स्तु
तये ॥

या

टी· वृत्तिंचयांतिदेवयानेपथिप्रेता ध्यायिनो नावृत्तिंयांति पितृयानेपथि
टी· ग्र· प्रयाताःकर्मिणआवृत्तिंयांतियद्यपिदेवयानेपिपथिप्रयाताःपु
नरावर्तंतइत्युक्तं आब्रह्मभुवनाल्लोकाःपुनरावर्तिनइत्यत्रतथा
पिपितृयानेपथिगताआवर्तंतएवेतिकेवलकर्मभक्तिभाजःदे
वयानेपथिगतास्तुयद्यपिकेचिदावर्तंतेप्रतीकोपासकास्तद्दि
लोकपर्यंतेगताहिरण्यगर्भपर्यंतममानवपुरुषनीताअपिपं
चाग्निविद्याद्युपासकास्तत्कृतवोभोगांतेनिवर्तंतएव तथापि
दहराद्युपासकाःक्रमेणमुच्यंतेइतिभोगांतइतिसर्वेषामनाव
र्तंते अतएवपितृयानःपंथानियमेनावृत्तिफलत्वान्निकृष्टोयं
देवयानःपंथाअनावृत्तिफलत्वादितिप्रशस्तइतिस्तुतिरुपपद्य
तेकेषांचिदावृत्तावप्यनावृत्तिफलत्वस्यानपायात् तदेवयाने
कालं पितृयानेचकालाभिमानिदेवतोपलक्षितं मार्गंवक्ष्यामिहेभर
तर्षभ अत्रकालशब्दस्यमुख्यार्थत्वेअग्निज्योतिर्धूमशब्दानामनु
पपत्तिः गतिसृतिशब्दयोश्चेतितदनुरोधेनैकस्मिन्कालपदएव
लक्षणाश्रिताकालाभिमानिदेवतानांमार्गद्वयेपिबाहुल्यात्
अग्निधूमयोःतदितरयोःसतोरप्यग्निहोत्रशब्दवद्देशेनाप्युप देक
लक्षणंकालशब्देनान्यथाप्रातरग्निदेवताभावात्तत्रप्रवृत्तिचाप्य या
शास्त्रमित्येनेनतस्यनामेयपनातस्मात् आम्रवणमितिवल्लौकि
कोदृष्टांतः [illegible] २३ ॥

मदानंदी टीका ॥

अणेवब्रह्मद्रष्टीनोप्रकृतानांचयोगिनो तेषांकालांतरेमुक्तिभाजो
ब्रह्माप्तयेपुना वक्तव्यउत्तरोमार्गोयत्रेत्यादिगिरास्फुटे उत्तरस्तत
नं येचात्रपितृयानप्रदर्शयस्मिन्मार्गेस्थितायांतियोगिनोप्युनर्भवं
यस्मिन्यांतिपुनर्जन्मकर्मिणोत्समहंब्रुवे २३ ॥

नीलकंठी टीका ॥

सर्वेषांनामुंकारस्तारासगुणब्रह्मविदांक्रममुक्तिभाजांब्रह्मप्रतिपन्न
ये उत्तरोमार्गोवक्तव्यइत्यतआह यत्रेति आहुतिमार्गोपमासोः नाद्यति

+ तदेवमपुनर्निवृत्तिप्रकारमुपदिश्यवित्तस्यहष्ट्भूमिजपिनश्चांतरप्राणादित्यसंचारक्रमेणतद्देशवंधपूर्वक
मुत्तरोत्तरज्ञेयंकालक्रमविशेषमुत्क्रांतिपदप्रदर्शनार्थमाह +

मार्गस्तत्रार्थः योगिनइति योगिनःकर्मिणश्चोच्यंते तेषांयथा
योगंमार्गद्वयविभागःश्रेयसइति २३ ॥

आनन्दीटीका

\+ यत्रयस्मिन्त्वहिरस्तसूर्यसंचारोपाधिकस्थूलकालापेतालस्येआध्यात्मि
केवक्ष्यमाणप्राणादिसंचारोपाधिकेसूक्ष्मेकालेयोगिनोभ्यस्त।
प्राणसंचाराः प्रयाताऊर्ध्वरेचकक्रमेणप्राणानुत्क्रामितमुपक्रान्ताः
अनावृत्तिंपुनरक्रमोत्तपुनरावृत्तिंयान्तिप्राप्नुवन्तिवकारात् अनभ्या
सेनततः स्वलिताश्चेत् आवृत्तिंप्राप्नुयाम्भरयोगमनानन्तरा
वर्तनेजन्मप्राप्तिंयान्तिभरतसत्तमतंकालंवक्ष्यामि २३ ॥

अथान्यमुत्क्रांतिविषयंयोगोपदेशंरामकेदीटी· अस्तावयत्राह ॥
यत्रयस्मिन्वक्ष्यमाणकालेप्रयाताःसंप्राप्तदेहाःसन्तोयोगिनोनावृ
त्तिंतथावृत्तिंविशिष्टभोगाधिकरणयोग्यशरीरादिसंबन्धंयान्ति
स्वात्मप्रेणभजन्तेतंनादृशंवक्ष्यमाणक्रमेणयोगिनामेववस्तलभका
लमुपदेक्ष्यामितमाह २३ ॥

नन्वेतत्कथंपरंगलज्ञालाभिकी [illegible]नीटी· यतेदेहत्यागसमयेपतेयोगिनोविदेहमोक्षमापन्नाश्चमीयोगभ्रष्ट
नामित्यतआह ॥
यत्रकालेऽवस्थाविशेषेप्रयातामरनायोगिनोनिष्पमानमतिसमा
हिताअनावृत्तिंमुक्तिमावृत्तिंभोगायजन्मयान्तिप्राप्नुवन्ति तंका
लमवस्थाविशेषंवक्ष्याम्युपदिशामि हेअर्जुन तंकालिवस्थाविशेष
रातिदेहत्यागसमयेस्थापिनांमनोविदेहमोक्षप्राप्तिनीमव
स्थांदर्शयति २३ ॥

पंचोलीटीका

प्रणावलम्बनासगुणब्रह्मोपासकाःक्रमेणकालांतरमुक्ति
भाजोनावर्तंतेतेषांब्रह्मप्राप्तयेअनावृत्तिरुत्तरमार्गोवक्तव्यः
आवृत्तिस्तितरेषांकेवलकर्मिणामावृत्तिर्युक्तोदक्षिणमार्गोव
क्तव्यः इतिसमार्गद्वयंवक्तुंप्रतिज्ञांकरोतियत्रकालेइतिहे
भरतर्षभपुनःयोगिनःसगुणब्रह्मोपासकाःकर्मिणश्च

गी॰ यत्र काले प्रयाता मत्ता अपुनरावृत्तिं आवृत्तिं च आप्नुवंति तं
अ॰ टी॰ कालं क्रमेण वक्ष्यामि २३

रणवीरसमिद्धोधिनी॥

एवं ब्रह्मादीनां परमेश्वरं शरणीकृत्य स्ववर्णाश्रमकुलजात्या प्रवि
हितं तत्तयुद्धादिकर्म कृत्वा तत्फलं च तस्मिन्नेवेश्वरे समर्प्य शत्रून् जित्वा
राज्यसुखादिकं वानुभूय प्राग्जन्मार्जितकर्मानुसारेणायुरवसाने
सति रणे रिपुभिः संमुखे हतानां वा मृत्युमप्राप्य पुनर्जन्माभावः
तथा मदाश्रयेण रणं प्रति प्रस्थितानां भयशोकमोहादयनभिभू
तत्वादिष्टेन निर्वैवसंग्रामभूमेः पलायनाभावस्थानावृत्तिः तथा
मामवगणय्य परमेश्वरव्यतिरिक्तदेवतान्तराण्याश्रितानां स्ववर्णा
श्रमानुचितं कर्म कृतवतामासुरस्वभावानां जनानां तत्तत्कर्मानुसारेण
तत्तत्स्वर्गादिलोकान्प्राप्य तत्सुखं वानुभूय पुण्यावसाने च पुन
र्जन्म देवतान्तराश्रयेणैव च रणं प्रति प्रस्थितानां निश्चयसंपत्त्यभावा
त्सद्यो भयशोकमोहादिभिः कृतावेशानां तेषां रणात्पलायनं वा
वृत्तिरिति प्रत्येकं द्विविधे अनावृत्त्यावृत्ती परमेश्वरभक्तितदवगण
नहेतुके अध्यासदृष्ट्या तच्छेष्यत्वहेतुके च प्रतिपादिते अधुना का
लविशेषप्रस्थितानां च ते भवत इति वक्तुं प्रतिजानीते यत्र काले इ
ति यत्र यस्मिन्कालविशेषे प्रयाताः संग्रामं प्रति कृतप्रस्थानास्तत्र
वर्जयेः सति स्वकर्मानुसारेण स्वपुरुषार्थबुद्धिमतिबाधसम्भवे रणे
रिपुभिर्हतास्ते न वा देहादुत्क्रान्ता वा योगिनः प्रतिपादितस्वरूपक
र्मकौशलसमस्तो भयलक्षणा योगारूढा अनावृत्तिमावृत्तिं च द्व
वीतिलक्षणां यान्ति प्राप्नुवंति हे भरतर्षभ भरतकुलोत्पन्नत्वेनोप
देशार्होसीति संबोधनाभिप्रायः तं कालं समयविशेषं वक्ष्यामि
प्रयाणमुहूर्तं कथयिष्यामीतियावत् २३॥

मधुभाष्य

यत्रेत्यादिना कालशब्दस्तुपलक्षणम् अध्यादेरपि वक्ष्यमाणत्वा

तज्योतिरर्चिः तेर्चिषमभिसंभवंतीतिहिश्रुतिः तथाच
नारदीये अग्निप्राप्यततश्चार्चिततःप्राप्याहरादिकंमिति
अभिमानिदेवताश्चाप्याद्ययः कथमन्यथा अहस्त्वापूर्य
माणपक्षमितिश्रुत्यते दिवादिदेवताभिस्तुपूजितोब्रह्म
यातिहीतिचशास्त्रे मासाभिमानिभ्योऽयनाभिमानीचपृ
थक् तथोक्तंगारुडे पूजितस्त्वयनेनासौमासैःपरिहृतेन
नहीति अहरभिजिता शुक्लंपौर्णिमास्या अयनेनविषुवास
द तथोक्तंब्रह्मवैवर्ते माह्नामध्यंदिनेनाथशुक्लेनचसपौ
र्णिमा सविषुवायनेनासौपूजितःकेशवंव्रजेदितिच
पूतेस्तत्रीसोपायेज्ञात्वानुष्ठायसमाति तथाहगारुडे स
तीत्वात्वसोपायेअनुष्ठायचसाधनं नकश्चिन्मोक्ष
माप्नोति नचान्यात्तत्त्वैर्गतिरिति २२॥

122

भाषा अनुवाद

इस प्रकार से भगवत उपासक परमपद प्राप्त होके फेरि संसारग
तिमे नहीं आवते हैं यह तीनि स्लोक से कहा अब कौन मार्ग से गमन
करिके फेरि आवते और कौन मार्गगामी फिर नहीं आवते यही प्र
काश रूपसे कहतेहैं कि हे अर्जुन योगी जन जिस काल मे गमन
करि आवते और जिस मेगमन करि नहीं आवतेसो काल तुम से क
हूंगा यद्यपि देहत्याग मे उत्तरायण काल श्रेष्ठ औदक्षिणायन नि
कृष्ट है तौ भी व्याससूत्र मे कहाहै किभगवत भक्त दक्षिणायन
मे उत्तम गति कोजातेहैं यहां योगी कहे कर्मी औ काल से तदभि
मानिनी देवता लेतेहैं २३ ॥

दोहा

अनावृति आवृति को प्रापत योगी होहि जेहिं काल तेहि का
लको कहों भरत वर तोहि २३॥

अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणं त
त्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः २४

शाङ्करभाष्यटीका

तं कालमाह अग्निर्ज्योतिरिति अग्निः कालाभिमानिनी देवता तथा ज्यो
तिर्देवतैव कालाभिमानिनी अथवा अग्निर्ज्योतिषी यथाश्रुते एव देवते
भूयसा तु निर्देशो यत्र काले तं कालमिति आम्रवनवत् तथाहर्देवता
हरभिमानिनी शुक्लः शुक्लपक्षदेवता तथा षण्मासा उत्तरायणं तत्रा
पि देवतैव मार्गभूतेति स्थितोन्यत्र न्यायस्तत्र तस्मिन् मार्गे प्रयाता मृ
ता गच्छन्ति ब्रह्म ब्रह्मविदो ब्रह्मोपासकाः ब्रह्मोपासनपरा जनाः क्र
मेणेति वाक्यशेषो न हि सद्योमुक्तिभाजां [illegible] सम्यग्दर्शन
निष्ठानां गतिर्वा क्वचिदस्ति न तस्य प्राणा उत्क्रामन्तीति श्रुतेः ब्रह्मसं
लीनप्राणा एव ते ब्रह्ममया ब्रह्मभूता एव ते २४ ॥

आनन्दगिरिकृतटीका

यथोपक्रमं व्याख्याय यथाश्रुतं व्याख्याति अथवेति कथं तर्हि देवता
नामभिनेत्रीणां ग्रहणे कालप्राधान्येन निर्देशः श्लिष्यते तत्राह भूयसा
त्विति मार्गद्वयेपि कालाद्यभिमानिन्यो देवताः कालशब्देनोक्ता अन्ते का
लाभिमानिनीनां भूयस्त्वात् कालशब्देन सर्वासां देवतानामुपलक्ष
णं विवक्षित्वा कालकथनमित्यर्थः यथाम्राणां भूयस्त्वाद्विद्यमानेष्व
पि द्रुमान्तरेष्वाम्रैरेव वनं निर्दिश्यते तद्वदित्युदाहरणमाहाम्रे
ति ननु मार्गविदुषां भोगभूमीं नेतव्या तत्तच्छब्देनोपादानं [illegible]मेव किमि स
ति देवताग्रहणमित्याशङ्क्यातिवाहिकास्तल्लिङ्गादिति न्यायेनोत्त
माह इति स्थित इति तेषां अग्न्यादीनां सामीप्यमिति सामीप्यं तत्रेति
सप्तमी ब्रह्मकार्यमौपाधिकं परं वा ब्रह्म परम्परया मुक्त्यालम्बनम
त एव क्रमेणाभ्युक निर्गुणमप्रपञ्चं ब्रह्मास्मीति विद्यावतो व्यवच्छि
नत्ति ब्रह्मोपासनेनेति ननु ब्रह्मशब्दस्य मुख्यार्थत्वात् परब्रह्मविदामे
वेयं गतिरुच्यते न चादर्य्याधिकरणविरोधादित्याह न हीति २४ ॥

तत्रानावृत्तिमार्गमाह अग्निरिति

124

स्वामिकृतटीका

अग्निर्ज्योतिः शब्दाभ्यां तेऽर्चिषमभिसंभवंतीति श्रुत्युक्तार्चिरभिमानिनी देवतोपलक्ष्यते अहरिति दिवसाभिमानिनी शुक्ल इति शुक्लपक्षाभिमानिनी उत्तरायणरूपाः षण्मासा इत्युत्तरायणाभिमानिनी एतच्चान्यासामपि श्रुत्युक्तानां संवत्सरदेवलोकादिदेवतानामुपलक्षणार्थं एवंभूतो यो मार्गः तत्र प्रयाता गताः भगवदुपासका जनाः ब्रह्म प्राप्नुवंति तथा च श्रुतिः तेऽर्चिषमभिसंभवंति अर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान् षण्मासानुदगादित्य एति मासेभ्यो देवलोकमित्यादि [illegible] २४ ॥

पिशाचभाष्यटीका

अग्निर्ज्योतिरहः दिवा शुक्लः पूर्वपक्षः षण्मासा उत्तरायणाख्यास्तत्रास्मिन्मार्गे प्रयाताः शरीरं त्यक्त्वा गच्छंति ब्रह्म ब्रह्माणं ब्रह्मविदः हिरण्यगर्भोपासकाः अग्निर्ज्योतिर्ब्रह्मलोकाभिमुखस्यातिवाहक देवतावनेऽहरित्यहरभिमानिनी देवता असावातिवाहिकी अग्नेः परमतिवहति शुक्लपक्षाभिमानिनी देवता साऽह्नः परमतिवहति उत्तरायणाभिमानिनी देवता सा शुक्लपक्षात्परमतिवहति उत्तरायणमेव योगिनं ब्रह्म प्रापयति २४ ॥ नी

रामानुजभाष्यटीका

अग्निरिति अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणमिति संवत्सरादीनां प्रदर्शनम् २४ ॥

अभिनवगुप्तकृतटीका [illegible]

उत्तरेणोर्ध्वेनायनं षाण्मासिकं तत्प्रकाशादिधर्मकत्वाद्दहनादिकैः शब्दैरुपचर्यते २४

परमार्थप्रपाटीका ॥

तत्र प्रथमं स्वोपासकानामवसानेऽर्चिर्मार्गमाह अग्निरिति तत्रार्चिर्मार्गोपलक्षकाः पंचसंति तत्र प्रथमं संस्काराग्निर्द्वितीया दीप्ताक्षमितम एवमर्चि

मार्गद्वैमाग्निः तत्रश्रुतिः अग्रेनयसुपथाराये अस्मान् विश्वानि देव वयु
नानि विद्वान् युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेमेति भा
ष्यं तत्र मन्त्रस्यार्थो वह्निर्जीव मग्निसुखप्रापप्रसादितमग्निस्त्वनियोगेणाश्रा
थयते भो देव दीप्यमानाग्ने अस्मान् सुपथार्चिर्मार्गेण नय किमर्थं राये
मुक्तिलक्षणाय धनाय तथा भो विद्वन् ज्ञानवन् विश्वानि सर्वाणि वयुना
नि देहोपत्याहारः अथास्मिन्नर्थे सजुहुराणमस्मत्प्रतिबंधकं एनः पा
तकं युयोधि नाशय इतः परं ते तुभ्यं भूयिष्ठां मनोवाक्कायैः कृता मेते
निर्याणेन मउक्तिं नमस्कारोक्तिं विधेम तथा क्रमेण समये ज्योतिः प्र
काशकं रूपं श्रुतिरपि तस्यैतस्य हृदयस्याग्रं प्रद्योतते तेन प्रद्योतेनै
ष आत्मा निष्क्रामति चक्षुष्टो वा मूर्ध्नो वेति स्पष्टार्थं तथा अहरादीनाम
प्राणमर्चिर्मार्गोपलक्षणानां कालोपाधीनां अहः शुक्लपक्ष उत्तराय
णानां अभिमानिन्यो देवताः सन्ति ता एवोत्तरोत्तरमर्चिर्मार्गे प्रापका भ
वन्ति तत्रार्चिर्मार्गे प्रयाता ब्रह्मविदो जीवा स्थूलदेहाः सन्तो ब्रह्म गच्छन्ति
अत्र शान्तपथी श्रुतिः ये चामी अरण्ये श्रद्धा सत्यमुपासते तेऽर्चिर अभिसं
भवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान् षण्मा
सान् उदङ्ङादित्य एति मासेभ्यो देवलोकं देवलोकादादित्यमादित्याद्वैद्युतं त दित्यलोकमा
नू द्वैद्युतान् पुरुषो मानसः एत्य ब्रह्मलोकान् गमयति ते तेषु ब्रह्मलोकेषु
वतो परा: परावतो वसन्ति तेषामिह न पुनरावृत्तिरस्ति भाष्यं अरण्ये वानप्रस्थ
दशाश्रमाः श्रद्धा गुरुशास्त्रविश्वासः सत्यं ब्रह्म उपासते तेऽर्चिर्मार्गेधि
कारिणो भवन्ति तमेव मार्गमाह अर्चिस्तेजः अहः दिनं आपूर्यमाण
पक्षः शुक्लपक्षः मकरसंक्रमादितः षण्मासानादित्यः स्वर्पडुदगेति
तदुत्तरायणं तेभ्यो मासेभ्यो देवलोकं तस्मादादित्यलोकं तस्माद्वै
द्युतं विद्युल्लोकं तस्मादपि मानसः पुरुषो लिंगदेहरहितो जीवः ब्रह्मलो
कान् सत्यलोकान् गमयति प्राप्नोति ते तेषु ब्रह्मलोकेषु पराः कृष्णास्त व
त्तान्वतः परावतोपरदेशादागता यैव संति तेषामिह संसारेन पुनरावृ
र त्तिरस्ति ब्रह्मलोकप्राप्ताव पितृत्यन्तनत्वात्तानि नपवन परावर्तनन इत्यर्थः
इतिदेवयानं २४ ॥

वनमालीटीका ॥

गी· टी· अ·

अग्निर्ज्योतिरित्यर्चिरभिमानी देवो लक्ष्यते अहरित्यहरभिमानी शुक्लप शुक्ल इति
क्षाभिमानी षण्मासा उत्तरायणमिति तदभिमानी देवो लक्ष्यते एतेर्चिषमभि
संभवंत्यर्चिषोऽहरह्न आपूर्यमाणपक्षाद्यान् षडुदङेति मासांस्तान्मासेभ्यः उदे
संवत्सरं संवत्सरादादित्यमादित्याच्चंद्रमसं चंद्रमसो विद्युतं तत्पुरुषोऽमान मसं विं वि
वः स एतान् ब्रह्म गमयत्येष देवपथो ब्रह्मपथ एतेन प्रतिपद्यमाना इमं मा
नवमावर्तं नावर्तंत इति श्रुत्युक्ते देवा नेतोपलक्षिकाः स्युरिति भावः तत्र
तस्मिन्मार्गे प्रयाता आजानजा ब्रह्म गच्छंति सर्वेशाद्यावधेयमनेनानवद्य
गुणालयं परमकारणं स्वरूपं ब्रह्म प्राप्नुवंतीत्यर्थः क्रतोयतो ब्रह्मविदः
यथाक्रतुरस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्य भवतीति श्रुतेः देवान्दे
वयजो यांति मद्भक्ता यांति मामपीति भगवदुक्तेश्च एतेन प्रतिपद्यमाना
नावर्तंत इमं लोकं पितृयानगता नो पुनरावृत्तिः प्रतीयते २४ ॥

उत्तमवैजयन्ती टीका ॥

अथ येनावृत्तेन पथाऽनावृत्तिं याति भगवद्भक्तस्तं मार्गमाह अग्निरिति
अथ यदु चैवास्मिञ्छव्यं कुर्वंति यदि च नार्चिषमेवाभिसंभवन्त्यर्चिषोऽ
हरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान् षडुदङ्ङेति मासांस्ता। दं दे
न्मासेभ्यः संवत्सरं संवत्सरादादित्यमादित्याच्चंद्रमसं चन्द्रमसो विद्युतं
विद्युतस्तत्पुरुषोऽमानवः स एतान्ब्रह्म गमयत्येषो देवपथो ब्रह्मप-
थ एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तंत इत्यादिश्रुत्युक्तो यो
ग्निर्ज्योतिरहः शुक्लः शुक्लपक्षः षण्मासा उत्तरायणं षण्मासात्मक
उत्तरायणमित्यादिभिः शब्दैरेभिश्च श्रुत्युक्तैः संवत्सरादित्यवायुविद्यु
त्तोणां प्रजापत्यमानवाद्यैः सहैर्निर्दिष्टस्तदभिमानी तत्तल्लोकपाल
को यो देवगणः स एव मार्गभूतस्तत्र तस्मिन्देवपथे प्रयाताः सत्संगतो
ऽखिलमर्त्यलोकाद्येगतास्ते ब्रह्मविदो ब्रह्मज्ञाः सज्जनामटनम्य भक्ता इ
त्यर्थः ब्रह्मलोकं तत्स्वरूपगुणमहाविभूतिपतिं सर्वेश्वरं भगवंतं मो
गच्छंति प्राप्नुवंति श्रुत्यर्थस्तु अथानेकजन्मार्जितपुण्यपुंजेन मा
नुषजन्म प्राप्य तत्र सत्संप्रदायमनुसृत्य सदाचार्याल्लब्धस्वपरस्वरू
पगुणादिज्ञानवानाजन्म भगवदाराधनचिंतनानुस्मरणध्यानादि
नानाश्रितनिखिलसंचितक्रियमाणप्रारब्धकर्माभूत्वा न तदनंतरं यत

यदि तु वितर्केच पुनरेव निश्चयेन तस्मिंस्थिरमजन्म भवति पुरुषेस्तेमतिप्रज्ञा
दयाशिष्याद्यो वा यदि चेत् सर्वं शवसम्बन्धि दाहादिकर्म कुर्वन्ति तु अथ
याप्यन्ततो यास्ति फलालितदुपासका अर्चिरादिभिर्देवैस्तदुपास्यरूपब्र
ह्मप्रयांति पुनर्मानवावर्त्तं मनुलोके नावर्त्तंते न यांतीत्यमन्तःस्फुटम् २४

मधुसूदनी टीका ॥

तत्रोपासकानां देव यानं पंथानमाह ॥

ःदिर अग्निर्ज्योतिरित्यभिमानिनी देवता लक्ष्यते अहरित्यहरभिमानिनी शुक्लःपक्षः
त इति शुक्लपक्षाभिमानिनी षण्मासा उत्तरायणमिति उत्तरायणरूपष-
ण्मासाभिमानिनी देवतैव लक्ष्यते आतिवाहिकास्तल्लिंगादिति न्यायात् प-
तच्चान्यासामपि श्रुत्युक्तानां देवतानामुपलक्षणार्थं तथा च श्रुतिः तेर्चिष-
मभिसंभवंत्यर्चिषोहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षडुदङ्ङे-
ति मासांस्तान्मासेभ्यः संवत्सरं संवत्सरादादित्यमादित्याच्चंद्रमसं चंद्रम-
सो विद्युतं तत्पुरुषोऽमानवः स एनान्ब्रह्म गमयत्येष देवपथो ब्रह्मप-
थ एतेन प्रतिपद्यमाना इमं मानवमावर्त्तं नावर्त्तंत इति अत्र श्रुत्यंतरानुसारात्संव-
त्सरानंतरं देवलोकदेवतानंतरं वायुदेवतानंतरं आदित्यस्तस्याकरेनि[illegible]ति
एवं विद्युतोनंतरं वरुणेन्द्रप्रजापतयस्त्वावर्त्तामार्गपर्वेष्ट्रिभिः तत्रार्चिरहः
शुक्लपक्षोत्तरायणदेवता इहोक्ताः संवत्सरो देवलोको वायुरादित्यः
चंद्रमा विद्युद्वरुण इंद्रः प्रजापतिश्चेत्यनुक्ता अपि द्रष्टव्याः तत्र देवया
नमार्गे प्रयाता गच्छंति ब्रह्मकार्योपाधिकं कार्यं बादरिरस्य गत्युपपत्ते
रितिन्यायात् निरुपाधिकं ब्रह्म तद्धि वैव क्रममुक्तिफलत्वात् ब्रह्मवि
दः सगुणब्रह्मोपासकाः जनाः अत्रैतेन प्रतिपद्यमाना इमं मानवमा
वर्त्तं नावर्त्तंत इति श्रुताविमस्मिन्निति विशेषणात् कल्पांतरे केचिदाव
र्त्तंत इति प्रतीयते अत एवात्र भगवतो दक्षिणे प्रोक्तमार्गकथनेनैव व्याख्या
नात् [illegible] २४ ॥

महानंदी टीका ॥

अग्निर्ज्योतिरिति तौ हार्चिःशब्दकालाभिमानिनी देवता यदि वा तेहु देवता ।
श्रुतिसम्मते तथाहर्देवता तद्वच्छुक्लपक्षाभिमानिनी उत्तरायणषण्मा
साभिमानिन्येव देवता अग्न्याद्या देवताः सर्वा योगिनः कालतो मतान्

126

प्रापयंति परं ब्रह्म मार्गभूताः क्रमेणता: तस्मिन्मार्गे मृता योगिनो ब्रह्मोपासन
तत्पराः क्रमेण निर्गुणं ब्रह्म यत्र गत्वा न शोच्यते सम्यग्दर्शननिष्ठानां नैव यस्मात्
गमागती सद्यः प्राणपरित्यागान्मोक्षभाजो महात्मनः २४ ॥

नीलकंठी टीका ॥

तत्रोपासकानां देवयानं पंथानमाह अग्निरिति अग्निर्ज्योतिरिमर्चिरभिमा
निनी देवतालक्ष्यते एवं अहरिमहरभिमानिनी एवं शुक्लपक्षषण्मास
संमितोत्तरायणस्य चाभिमानिन्यो देवता एव एतच्चामानवस्याप्युपलक्षणं
तत्र प्रयाता उत्क्रांता ब्रह्मकार्यं ब्रह्म सत्यं तद्द्वारा परं च गच्छंति ब्रह्मविदो ब्र
ह्मोपासका जनाः २४ ॥

आनन्दीटीका

अग्निरिति ऊर्ध्वं गच्छतीत्यग्निः ज्योतिः अर्चिः अहो दिनं देहपातप्रमाणदिवसस्य संबंधेन
उपलक्षितः कालविशेषो दिनं भवति अनयैव कल्पनया षोडशभिरहोरात्रैः
पक्षः शुक्लपक्षो मासः षण्मासा अयनमिति वक्ष्यमाणसंहितोक्तिक्रमेण दि
नमुत्तरायणं च प्राणस्योत्क्रान्तो गतिः शुक्लाशुक्लसंज्ञा भवति शुक्लकृष्ण
गती ह्येते इति वक्ष्यमाणसिद्धान्तदर्शनात् स्त्रीलिङ्गः शुक्लाशब्दः कृष्णाश
ब्दश्च तत्र एवंविधे संहितोपदेशक्रमविशेषदर्पोपादिष्यमाणे कालविशे
षे तथैव बहुदर्शनान्तादौ देशविशेषे वा प्रयाताः संयमाभ्यासप्रकर्षेण
याता ऊर्ध्वं रेचकक्रमेणोत्क्रामितप्राणाः ब्रह्मविदो जनाः ब्रह्म गच्छंति
आर्ककेवलमाप्नुवन्ति न पुनरावर्तन्ते इति यावत् २४ ॥

रामकंठीटीका

इहाग्नीषोमौ प्रकाशनमसी तदुपलक्षिते दिनरात्री शुक्लकृष्णौ पक्षौ तथा
षण्मासे परिमाणे उत्तरदक्षिणे अयने स्थलदृष्ट्या कालविभागमात्रत्वा
त्तेन स्यदेव पितृमयी विषयत्वेन सक्षमध्यमनिकृष्टपरिमाणत्वाच्च इ
त्युक्तिं तेन अग्निर्ज्योतिः सूर्यप्रकाशः तदुपलक्षितमहस्त्रिंशन्नालिकावच्छि
न्नपरिमाणो दिवसाख्यः कालांशः आपूर्यमाणसोमोपलक्षितः पंचद
शाहोरात्रः शुक्लपक्षः शुक्लशब्देन निर्दिष्टः तथा मकरादिराशिषट्कसं
चारिविरोचनचारोपलक्षितः षण्मासा उत्तरायणमिति एते कालविशेषाः २०
प्रसिद्धास्तत्त्वेवंविधाः कालविशेषसामर्थ्यात् ब्रह्मविदो विज्ञानपरमका

रणस्वरूपाः अयान्तुत्क्रामन्ति शरीरमुत्सृजन्ति ते ब्रह्म परं तत्त्वं ग
च्छन्ति अपुनरावृत्तिं मोक्षगतिं प्राप्नुवन्तीत्यर्थः २४ ॥

तत्र निरन्तराभ्यासपरा लासिकी [illegible]टी· लिनो देहत्यागसमये हठभाविताऽऽत्मनो विदेहमोक्षदायिनी मवस्थां दर्शयति ॥

अथाग्न्यादयः शब्दास्तेषु तेषु रहस्यार्थेषु मूर्धन्यच्छिद्रद्वारोर्ध्वब्रह्मद्वारवाहि
नि प्राणे मातासंकेतिताः तथा साधर्म्ययोगाग्नौ वाहीकरतिवल
त्तणपात्रसुत्काम्य इह तु भगवता गौरयमिति वलत्तणयाप्यवसि
ताः यथा यातिशा सर्वभूतानामित्यत्र निशाशब्दः तथा साधर्म्यम
प्राणोहृत्तिर्वा मदत्तिणमार्गा विलीभावयन्ती मध्यरूपेणोर्ध्वे नयव
हन्ती अग्निः सकलस्य भेदस्यापि भेदसारतादाननलत्तणविलापनमा
श्यानस्यैव समर्पिताविद्यामूर्ध्वं गच्छतीव तत्कर्के मध्योर्ध्वगामिदाना
एवस्त्वयं योगेऽग्निरेषु ज्यय इति तथा विद्यातमोपहरणाज्ज्योतिः प्रकाशि
का अहरित्शब्दिकाप्रमाणाम मनुष्याणां दिनं प्रबोधहेतुः शुक्लपक्षः।
पितृणां दिनं प्रबोधहेतुः षण्मासा उत्तरायणं देवानां प्रबोधहेतुः यथा
हि स्वस्मिन्स्वस्मिन्दिने प्रबोधाधाराधिकृताः सर्वे देवपितृमनुष्याः देवादी
नामपि ब्रह्मविद्यायामधिकारोऽस्तीति भावेत्तबाधरायणेनापि हि तत्र
प्रपंचितम् तथात एव देवपितृमनुष्याः प्रबोधलाभेनाधिकृता ब्रह्म
विदो निरन्तराभ्यासेन ज्ञानधारापि रूपाः सन्तोऽस्यामवस्थायां प्रयाता
मूर्धसीमाविदारणपूर्वं देहमुत्सृजन्तो ब्रह्म यान्ति मुक्तिभाजः स्युरेषा
ब्रह्मविदो देवयानपथा तथा च श्रुतिः यस्यैष मण्डले भित्त्वा महता
याति मूर्धनि यत्र यत्र म्रियेहापि न स भूयोऽभिजायते इति शतं चैका च
हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका तयोर्ध्वमायन्नमृतत्वा
मेति विष्वगन्या उत्क्रमणे न भवन्तीति तथा च स्मृतिः नत्वालोकेनप
नत्सदिनेयपरेऽस्मिन्प्रबुद्धायेवाविनोपशमरजनीयोगनिद्रासुपेताः
तेहोरात्रेण परमपरमानन्दमभ्यासतोऽरभित्वा ज्योतिः परमपरमेया
न्ति निर्वाणमार्गमिति अथ सर्वकर्माणामेनमेव विदेहकैवल्यमा
पन्नयोगिनमालक्ष्येदं श्रूयते तस्य पुत्रा दायमुपयन्ति सुहृदः साधु
कृत्याम् द्विषन्तः पापकृत्याम् इति ततो जीवन्मुक्तमुद्दिश्य तस्या
हं नन्ता नाग्निकर्मणोऽदग्ध्याशायनत्वात् तथा च पूर्वमेवोक्तम् सानाग्निः

ना

127

सर्वकर्माणिभस्मसात्कुरुतेऽर्जुनेति इदमुक्तं भवति ज्ञानमेवो
निवृत्तिकाले सर्वकर्मणां भावनाशहेतुरिति दाहकश्चेति गु
णः ॥ २४ ॥

पंचोली टीका

तत्रानावृत्तिमुत्तरमार्गमाह अग्निरिति ब्रह्मविदः सगुणब्र
ह्मोपासकाः मृतदेहं त्यक्त्वा अग्निदेवतां प्राप्य ततो ज्योतिर्देवतां
प्राप्य ततोऽहर्देवतां प्राप्य ततः शुक्लपक्षदेवतां प्राप्य ततउत्त
रायणदेवतां ततः ततः संवत्सरं त्यक्त्वा अवशिष्टा देवताः प्राप्य
क्रमेण प्राप्य अन्यो यो विद्युद्देवतायां अमानवोऽत्र मानवः पुरु
षः स नीत्वा प्राप्य हिरण्यगर्भलोकं यान्ति तत्र ते ब्रह्मणा सह
मुच्यन्ते न पुनरावर्तन्ते अयं देवयानोऽर्चिरादिमार्गः २४ ॥

रणवीरसमिद्बोधिनी

तत्र तावदनावृत्तिहेतुकं कालविशेषमाह अग्निर्ज्योतिरिति अग्नाभि
मानी सामान्यतोऽर्हत्यायोग्यतया च गार्हपत्यादनीषयोरभिधा
यकः ज्योतिश्च तेजः तेन चाग्नेस्तेजस्त्वाव्यभिचारात्पौनरुक्त्यदोष
प्रसङ्गाद्व्यथितमुख्यार्थेन तद्धितोऽलक्षणं तदतिपायश्चिन्तः तेन
चाग्नेस्तेजस्त्वाव्यभिचारात्पौनरुक्त्यदोषप्रसक्ते प्रयोजनं तत्र ज्योति
स्तेजोऽतिशयवान्प्रज्वलादिरित्यर्थः सिद्धः एवमपि प्रतिज्ञातस्य
कालस्य ज्योतिष्मता विनानभिधानमित्यसंगतिप्रसक्तत्वात्तादृशा
नलविशिष्टः कालो लक्ष्यते स च प्राहरूपेण पुनः सायाह्नलक्ष
णोऽपि अग्नेरदः प्राह्णोपादानात् प्रभातमेव दिदिनावयवः सायंप्रा
तरिति अग्निर्ज्योतिरितिसमस्तपाठेऽप्येवमेवार्थः एवौ ह्रादिपदा
नादरेणैवमभिधानेवाग्निहुतैवतस्योज्ज्वलाविस्फारादिरूपं प्रकृतं
चविचार्यतानाविधेयेत्यभिप्रायकं तथा च योगयायाप्यामोहूर्ति
कापिशेमरिवेवाहावार्थः स्वाह्नवसानसमये स्वयमुज्ज्वलार्चिः
स्निग्धः प्रदक्षिणमुखो हुतभुक् पश्य गंगादिवाकरस्तानलः

वारूढारंध्राशीसमुद्रपानं वपागं करोतीति अतएव रघुरपि
तस्मै सभ्याय सुतो वह्निर्वाजिनीराजनाविधौ प्रदक्षिणार्चिर्व्याजेन
हस्तेनेव जयं ददाविति तथा अहस्त्रिंशन्नालिकावच्छिन्नपरिमा
णो दिवसाख्यः कालांशः तत्र दिनमर्कायनानुलोम्येन प्रयाते
यतः सपवाद अयनेन गतोर्कसोमयोर्मुनिधिष्ण्यावस्थितयोः पृथ
क्पृथक् विडंबामिव ग्रहरूपास्तु विस्मयवायो द्विषतां विराजते इति
अस्यार्थः अर्कसोमयोरेकायनस्ययोरयनेनानुलोमेन मार्गेणो
दयर्थः मुनिधिष्ण्यं दिवा रात्रौ च गतः प्रारूढ्यति प्रस्थिता राज्ञा दिग्गुसमवा
ये विडंबमायां वैयाकरणा इवातितरां शोभते इति संबंधः वा अ
थवा पृथक्पृथक्स्थितयोरर्कसोमयोर्मुनिधिष्ण्यक्रमेण दिवा रात्रौ
वानुलोमेन मार्गेण प्रस्थितस्य राजा पूर्वेव विराजते इति कोर्थः अ
र्कायनानुलोम्यमस्ति दिवा याति यात सूर्यस्य तत्पतित्वात् चंद्रायना
नुलोम्येन रात्रौ याति तस्य रात्रिपतित्वादिति चंद्रार्कयोर्युगपदुत्त
रायणस्ययोर्दक्षिणपश्चिमां याति यात याम्यायनस्ययोस्तु प्रागुदी
ची तथा केवलेर्कस्योत्तरायणस्ये दिवा दक्षिणपश्चिमां रात्रौ प्रागु
दीची दक्षिणायनस्ये तु रात्रौ दक्षिणपश्चिमां दिवा प्रागुदीचीमित्य
यनानुलोम्यं अयनप्रातिलोम्ये वा गतस्य पराजयस्तेनैवोत्कोयन
यातो यनस्य प्रतिलोमकाशयः स्यात् सत्वे तत्रापि जितः परैर्वा स के
वलव्याकरणाभियुक्तः काव्यज्ञगोष्ठ्यामिव हास्यमेतीति यद्वा
अग्निर्ज्योतिरहरित्येकं पदं ज्योत्यादिकरणपदद्वयेवा तथा वायम
र्थः अग्निः सूर्येण वरतं गमनात् तस्य ज्योतिः प्रकाशो यत्र तदहो
दिनं अनयस्तु चार्कवाद्दिवसः पतेन वहुदिनेषु याज्ञानिषेयो व.
सीयते शुक्ल इति शुक्लपक्षे नापूर्यमाणसोमोपलक्षितः पंचद.
शाहोरात्रः शुक्लपक्षोभिधीयते तत्र च सोमस्य वृद्ध्यभिमुखत्वाद्भा
विनामपि वृद्धिरूपं भाविनीति शुक्लपक्षः उत्तरायणनाहा
तिरेकत्वेनोपात्तः तथा च संग्रहकारः प्रायः सर्वं प्रसिद्ध्यंतीत्याभ्य

शुक्ल अह्नि इति षण्मासा उत्तरायणमिति मकरादिमिथुनांतेरा
शिषट्कसंचारिविरोचनवारोपलक्षिताः षण्मासा उत्तरायणं
सूर्यस्योद्गमातिरित्यर्थः अत्रापि समनंतरोक्तायतानुलोम्यं वि
वार्यं अत एव याम्यायनस्यैकं उत्तरं कांडं प्रतिपादवीथ्यायाञ्चा
श्रूयते तत एव च प्रयापि सा विधीयते तथा च योगयाज्ञव
राह्नाचार्यः यावत्स्वपस्य पारवीहुफलामथो वेति परंच प्रा॰ दि
नामाकांर्थनानुलोम्येन हृताया याचापां रिउजयोत्तिकांतरसं
स्वानिवाव्यभिचारी एव मोक्षलक्षणेनाहतिस्त पुरुषाप्रव
मतिवाप्तवातादर्षकालं प्रतीक्ष्य देहत्वं रमासायवाप्नुनरुत्तरा
यणे उक्तलक्षणप्रकारं द्याणदेवेति अत एव याम्यायने प्रार
तस्यैपतितस्यान्यतरप्रकारकमप्यापि देवव्रतस्य माघसिताष्ट
म्यां देहादुत्क्रांतिः श्रूयते इत्यवलार्थः समुदायार्थस्तु मकारा
दिमिथुनांतेराशिषट्कसंचारिविचारोपलक्षितमासषट्क
लक्षणउत्तरायणे तत्राप्यापूर्यमाणे पक्षे उपलक्षित एव दक्षाह्ना
ग्निकेषु शुक्लेपक्षे तत्राप्यनभ्रक्वने दिवसे तत्रापि मध्याह्ने तत्रा
पिगाढरूपत्याद्वनीपाकृत्वा तयोप्रपदलित्रोज्वलार्चिष्वादिकं
प्राक्ष्नेपरीक्ष्यप्रयाताः संग्रामं प्रतिप्रस्थिताः स्वब्रह्मपदनुवेदवि
दतिलभंते ये ते ब्रह्मविदगुवादिभ्यः सकाशात्स्वात्मस्वज्ञात्वाविन
प्राप्तोपदेशा ब्रह्म गच्छंतीति यनुर्वेद प्रतिपाद्यं रक्षणं मन्येवथा वंति
नपुनर्भवप्रोक्तमोक्षप्राभिसवेनततः पलायंत इति अथवा प्र
यातारणामध्येपितृभिः सबुवक्रिन्नात्वषयवत्वेनतानेववाविति
त्यवाप्यलहवेन पुरुषाप्रुषमतिवाग्रताद्दृशोकाले देहादुत्क्रांता
ब्रह्मविदः स्वज्ञात्मावितवेदार्थस्ता ब्रह्म मत्वाप्नुत्यं गच्छंतिशाम्र
वंति संसारान्मुच्यंत इति भावः २४ ॥

मधुभाष्य

भाष्य अनुवाद ॥

औरजिस मार्ग से प्रयाण करिके फेरि नहीं संसारगति कोप्राप्त होते हैं
सोई मार्ग कहते हैं किअर्चि अभिमानिनी अर्थात् अग्नि या ज्योतिरूप
और अहकहे दिन औ शुक्लपक्ष तथा उत्तरायण जोछ मास और संवत्स
र इन सब की अभिमानिनी देवता इहां लेते हैं यथा प्रथम जोतिमे प्र
वेश करि फेरि दिनसे दिनसे पक्ष से पक्षसे उत्तरायण छमाहीमे
उससे संवत्सरेसे देवलोक मे प्राप्त होय फेरि भगवतउपासक ब्र
ह्मज्ञ होय साक्षात् ब्रह्मस्वरूप होतेहै निष्काम कर्मकारी इस ग
ति सेजा तेहैं २४ ॥

दोहा

अग्निज्योति दिनशुक्लपक्ष उत्तरायण षटमास यामे ब्रह्म
विद जातजो सोलहत ब्रह्म महवास २४ ॥

129

धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनं।
तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते २५

शाङ्करभाष्यं टीका ॥

धूम इति धूमो रात्रिः धूमाभिमानिनी रात्र्यभिमानिनी च देवता तथा कृष्णः कृष्णपक्षदेवता षण्मासा दक्षिणायनमिति च पूर्ववद्देवतैव तत्र चन्द्रमसि भवं चान्द्रमसं ज्योतिस्तत्फलं इष्टादिकारी योगी कर्मी प्राप्य भुक्त्वा तत्क्षयादिह निवर्तते पुनः २५ ॥

आनन्दगिरिकृत टीका ॥

प्रकृते देवयाने पथ्याने स्तोतुं पितृयानमुपन्यस्यति धूम इति तत्रापि मार्गचिह्नानि भोगभूमीश्च व्यवच्छिद्य आतिवाहिकदेवताविषयत्वं धूमादिपदानां विभजते धूमेत्यादिना तत्रेति सप्तमी पूर्ववदेव सामीप्यार्था इष्टादीत्यादिशब्देन पूर्तदत्ते गृह्येते कृतात्ययेऽनुशयवानिति न्यायं सूचयति तत्क्षयादिति आरोहावरोहयोरभ्यासवाचिना पुनःशब्देन संसारस्यानादित्वं सूच्यते २५

स्वामिकृतटीका ॥

धूम इति धूमाभिमानिनी देवता रात्र्यादिशब्दैश्च पूर्ववद्देव रात्रिकृष्णपक्षदक्षिणायनरूपषण्मासाभिमानिन्यस्तिस्रो देवता लक्ष्यन्ते एताभिर्देवताभिरुपलक्षितो यो मार्गः तत्र प्रयातः कर्मयोगी चान्द्रमसं ज्योतिः तदुपलक्षितं स्वर्गलोकं प्राप्य तत्रेष्टापूर्तकर्मफलं भुक्त्वा पुनरावर्तते अत्रापि श्रुतिः ते धूममभि- भवंतीत्यादिर्हितदेवैर्निवृत्तिकर्मसहितोपासनया क्रममुक्तिः काम्यकर्मभिः स्वर्गलोकभोगानंतरमावृत्तिः विरुद्धकर्मभिस्तु नरकभोगानंतरमावृत्तिः क्षुद्रकर्माणां तु जंतूनामत्रैव पुनः पुनर्जन्मेति द्रष्टव्यं [illegible] २५ ॥

संभवंति धूमाद्रात्रिं रात्रेरपक्षीयमानपक्षमपक्षीयमानपक्षाद्यान् षण्मासान्दक्षिणादित्य एति मासेभ्यः पितृलोकं पितृलोकाद्वंद्वं ते वंद्वं प्राप्यात्र

पिशाचभाष्यं टीका

धूमो रात्रिश्चन्द्रलोकाभिमुखस्य कर्मिणः स्वर्गप्रापयिता आतिवाहिकी देवतोच्यते धूमे धूमाभिमानिनी देवता रात्रिः रात्र्यभिमानिनी देवता सा प्राप्यातिवाहिकी धूमात्परमतिवहति तथा कृष्णपक्षाभिमानिनी देवता रात्रेः परमतिवहति षण्मासा दक्षिणायनमतिवाहिकदेवता कृष्णपक्षात्परमतिवह

तिनथा कृष्णपक्षः [illegible]
[illegible] यरमृतिवदन्ति गत्वा गच्छन्तीत्य
र्थः तत्र प्रयाताः कृत्स्नकर्माणः चंद्रमसमिष्टं चान्द्रमसं ज्योतिः क्रमेण यो
गी प्राप्य निवर्तते पुनः शरीरं तरेमनुष्यलोके न गच्छन्तीत्यर्थः २५

रामानुजभाष्यटीका

धूम इति एतच्च धूममार्गस्थपितृलोकादेः प्रदर्शनं अत्र योगिशब्दः पुण्य
कर्मसंबंधिविषयः २५ ॥

अभिनवगुप्तकृत टीका

अतो विपरीतं विपर्ययेण तत्र चन्द्रमसं भोग्यं प्राप्यानुभवे पुनः ग्रहणाय आवृत्तिः २५

परमार्थप्रपा टीका ॥

अथ पितृयाणमाह धूम इति पूर्वोक्तमार्गाद्विपरीत्येन धूममार्गः रात्रिकृष्ण
पक्षदक्षिणायनाभिमानिदेवताभिः पितृलोके प्राप्यते ततस्तदारोहण
मार्गेण योगी चान्द्रमसं ज्योतिः प्राप्य पुनरवरोहणमार्गेण निवर्तते पुनरा
वर्तते श्रुतिरपि अथ ये यज्ञेन दानेन तपसा लोकं जयंति ते धूममभिसंभवं
ति धूमाद्रात्रिं रात्रेरपक्षीयमाणपक्षमपक्षीयमाणपक्षान्षण्मासा
न्दक्षिणादित्य एति मासेभ्यः पितृलोकं पितृलोकाच्चन्द्रं ते चन्द्रं प्राप्यान्नं भवंति तांस्त
त्र देवा यथा सोमं राजानमाप्यायस्वापक्षीयस्वेत्येवमेतांस्तत्र भक्षयंति ते
षां यदा तत्पर्यवैत्यथेममेवाकाशम भिनिष्पद्यंत आकाशाद्वायुं वा
यो र्वृष्टिं वृष्टेः पृथिवीं ते पृथिवीं प्राप्यान्नं भवंति ते एवमेवानुपरिवर्तंते
ऽथ य एतौ पंथानौ न विदुस्ते कीटाः पतंगा यदिदं दंदशूकम् भाष्यं तत्र चंद्र
मिति चंद्रं प्राप्यान्नं भवंति देवानामन्नत्वेन परिणमंति यथा देवाः सोम
राजानमाप्यायस्वापक्षीयस्वेति संप्राप्य भक्षयंति तथा तानपि भक्ष
यंति तत्तेषां भक्तानां यदा तत्पर्यवैति अवरोहणमार्गेण निष्क्रम
णं भवति अथ तदा आकाशादभिनिष्पद्यंते अनंतरं लोके प्रादुर्भवं
ति आकाशाद्वायुं वायोर्वृष्टिं वृष्टेः पृथिवीं तत्रान्नमोषधीं प्राप्य एवम
नेनाप्रकारेण वर्तंते कीटादियोनिं प्राप्नुवंति अथ मोक्षमयोनिं गच्छ
ति तैत्तरीयकेपि प्रज्ञानेन ततः प्रतिगच्छति देवयानेन गच्छः पर्यावर्तंत अ॰
सुवर्गं याति पथिभिर्देवयानैरोषधीषु प्रतितिष्ठाशरीरैः भाष्यं पूर्वे यो
गिनः प्रज्ञानवंतः अंगेभ्यः शरीरेभ्यः पर्यावर्तंत मद्विच्छेदनप्राणप्रतिग
च्छन्ति स्वाधीनं कुर्वंति स्वेच्छया देहं त्यजंति अचेतनस्तेन देवयानैः पथि

भिरर्चिरादिमार्गैः स्वर्गं स्वर्गसमं लोकं याति अथ वा तत्कर्तुमशक्त
श्चेत्तर्हि कर्मणा पितृलोकं पितृयाणेन कृत्वा पुनः शरीरे विश
धूममार्गगामी ओषधीषु प्रतितिष्ठ अन्नत्वेन परिणतो भव परं तू
भयमार्गपरिभ्रष्टो मा भवेत्यर्थः ऋक्शाखायामपि द्वे सृती अशृ
णवं पितॄणामहं देवानामुत मर्त्यानां ताभ्यामिदं विश्वमेजत्समेति
यदंतरा पितरं मातरं चेति भाष्ये पितॄणां देवानामुतापि मनुष्याणां द्वे सृ
ती द्वौ मार्गौ देवयानपितृयाणौ अहमशृणवं श्रुतवानस्मि अपि च द्यु
पितरं पालकत्वेन पितृभूतां द्यां तथा पारकत्वेन मातृभूतां पृथि
वीं अंतरा द्यावापृथिव्योर्मध्ये भवति तदिदं विश्वमग्निना संस्कृतं
सत् एजत् देवलोकं पितृलोकं च गच्छत् ताभ्यां मार्गाभ्यां समेति ग
च्छति २५ ॥

वनमाली टीका ॥

देवयानमार्गमुक्त्वा पितृयाणमाह धूम इति अत्रापि धूम इति धू माभि
मानिनी देवता रात्रिरिति रात्र्यभिमानिनी कृष्ण इति कृष्णपक्षाभि
मानिनी षण्मासाः दक्षिणायनमिति दक्षिणायनाभिमानिनी ल
क्ष्यते एतदन्यासामप्युक्तीनामुपलक्षणार्थं तथा हि श्रुतिः
ते धूममभिसंभवंति धूमाद्रात्रिं रात्रेरपरपक्षमपरपक्षाद्यान् ष यान्
ड्दक्षिणैति मासांस्तान् नैते संवत्सरमभिप्राप्नुवंति मासेभ्यः पितृलोकं पितृलोकं
लोकादाकाशमाकाशाच्चंद्रमसमेष सोमो राजा तद्देवानामन्नं तं देवा भक्ष
यंति तस्मिन्यावत्संपातमुषित्वाथैतमेवाध्वानं पुनर्निवर्तंत इति त
त्र पथि प्रयातास्तु चंद्रमसं ज्योतिः फलं योगी कर्मयोगी इष्टादिकारी
प्राप्य यावत्संपातमुषित्वा निवर्तते संपतत्यनेनेति संपातः कर्म त
स्मादावृत्तिमार्गादनावृत्तिमार्गः श्रेयानिति भावः २५ ॥

अथ वैजयन्ती टीका

एवमनावृत्तिपथमुक्त्वेदानीमावृत्तिमार्गमाह धूमो रात्रिरिति
अथ य इमे ग्रामे इष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवंति धू
माद्रात्रिं रात्रेरपरपक्षमपरपक्षाद्यान् षड् दक्षिणैति मासांस्तान् नै
तेभ्यः संवत्सरमभिप्राप्नुवंति संवत्सरात् पितृलोकं पितृलोका

131

दाकाशमाकाशाच्चंद्रमसमेष सोमो राजा तद्देवानामन्नं तं देवा भ
क्षयंति तस्मिन् यावत्संपातमुषित्वाथैतमेवाध्वानं पुनर्निवर्तंत इत्या
दिश्रुतिसिद्धो धूमो रात्रिः कृष्णः कृष्णपक्षः षण्मासा दक्षिणायन
मित्यादिशब्दैरुपलक्षितस्तत्तदभिमानी यो मार्गस्तेनो देवगणस्तत्र त
स्मिन्मार्गे गतो यातिसकामी योगी चान्द्रमसं चंद्रसंबंधि ज्योतिस्तल्लो
कं प्राप्य तत्र यावत्पुण्यभोगमुषित्वा तत्पुण्यक्षये सति पुनस्तस्मादा
काशान्निवर्तते संसारं प्राप्नोतीत्यर्थः २५ ॥

मधुसूदनी टीका ॥ अ

देवयानमार्गस्तत्प्रतिपक्षपितृयानमार्गमाह ॥

अत्रापि धूम इति धूमाभिमानिनी देवता रात्र्यभिमानिनी कृष्ण इति
कृष्णपक्षाभिमानिनी षण्मासा दक्षिणायनमिति षण्मासा दक्षिणा
यनाभिमानिनी लक्ष्यते एतदप्यन्यासं स्रक्रमुक्तानामुपलक्षणं तथा
हि श्रुतिः ते धूममभिसंभवंति धूमाद्रात्रिं रात्रेरपरपक्षमपरपक्षाद्या
न्षड्दक्षिणैति मासांस्तान्नैते संवत्सरमभिप्राप्नुवंति मासेभ्यः
पितृलोकं पितृलोकादाकाशमाकाशाच्चंद्रमसमे
ष सोमो राजा तद्देवानामन्नं तं देवा भक्षयंति तस्मिन् यावत्संपात
मुषित्वाथैतमेवाध्वानं पुनर्निवर्तंत इति तत्र धूमरात्रिकृष्णपक्षद
क्षिणायनदेवता इहोक्ताः पितृलोकस्त्वाकाशश्चंद्रमाश्च इत्युत्क्रान्त्र
पि द्रष्टव्याः तत्र तस्मिन् पथि प्रयातो यस्मात् चान्द्रमसं ज्योतिः फलं योगी
कर्मयोगी इष्टापूर्तदत्तकारी प्राप्य यावत्संपातमुषित्वा निवर्तते
संपतन्त्यनेनेति संपातः कर्म तस्मात्तेनास्मादाहति मार्गादनावृत्ति
मार्गः श्रेयानित्यर्थः २५ ॥

मिति दक्षिणायना

प

सदानंदी टीका ॥

तथा धूमादिशब्दैरुपलक्षितेन देवतायतनः मार्गभूतास्तं तंपतंतस्तान्प्रा
पयंति च कर्मिणः तस्मिन्मार्गे गता याति फलं चांद्रमसं जनाः कर्मि
णः कर्मसंसिद्धिं प्राप्य भुक्त्वा पतंत्यपः पितृदैवकभोगपं च यस्मा
च्चंद्रमसस्ततः लोकं चांद्रमसं गत्वा कर्मिणो यः पतंत्यमी २५

नीलकंठी टीका ॥

गी. टी. ग्र.

132

ब्रह्मप्राप्तिहेतुत्वमर्हति द्वितीयेपि पक्षे स्वरूपावगममात्रेणैव ब्रह्मवि
दस्तेषां मध्ये सालोक्यनत्वानां यथोक्तकालविशेषप्राप्तिमात्रमपुनरा
वृत्तिहेतुर्ब्रह्मणः प्राप्तिकारणमिति निश्चयान्नैवमुक्तम् एवमुभय
रूपाणामपि ब्रह्मविदामन्तकाले यथोक्तकालविशेषप्राप्त्यधीना ब
ह्मप्राप्तिरिति न युक्तम् । सेगच्छते योपि योगी स्वीकृतसमाधिविशेष
स्तस्यान्तकालोपादानयथोक्तकालविशेषप्राप्तिमात्रादेव पुनरावृत्तेनम
मुक्तिमत् यंयंवापि स्मरन्भावं त्यजत्यन्ते कलेवरं तंतमेवैति कौन्ते
य सदा तद्भावभावित इत्युक्तोपपत्तेः तदुक्तं भावनाभावितस्य भाव
स्याव्यभिचारात् मध्ये भाविनस्पन्दनकालमसंस्मरणे मति पुनरावृ
त्तिः स्थिते एवं किमुक्तः कालः करिष्यति न हे वै योगी यथोक्तकालवि
शेषप्राप्तेः पुनरावर्तते इत्येतदपि न हृदयावर्जकम् यद्युच्यते यथेव
यथोक्तः कालो ब्रह्मप्राप्तिहेतुर्न भवेत् तत्कथं ब्रह्मविदोपि शान्तनव
स्यानन्तु संमासाद्यं पुनरायणप्रतीक्षा श्रूयते इति समं श्रूयते किं न ब्रह्म
प्राप्तिहेतुत्वेन तेनासौ न प्रतीक्षितः यदि हि स एव ब्रह्मप्राप्तिहेतु
स्यात् तदा सर्वैर्ब्रह्मविद्भिर्देहोत्सर्गे स एवापेक्ष्येत तत्कालोत्सृष्टदे
हाः सर्वे एवानावृत्तिभाजः स्युः न चैवमस्ति न चैवं विधे काले त्रि
येते इति विधिरुपपद्यते सर्वस्य मरणे स्वातन्त्र्याभावात् भीष्मस्य तु
स्वातन्त्र्यस्य सत्त्वात् तत्कालप्रतीक्षणं निमित्तान्तरमनुमेयम् न चेदं प
किलस्य लक्षणाय यथोक्तः कालः कलेवरसंन्यासावसरे समुपनतो
गतिविशेषाधानहेतुर्भवतीत्यागमवचनप्रमाणीकरणार्थं भी-
ष्मस्य तत्कालप्रतीक्षा यमस्मात् यथोक्तकालस्य मुख्यत्वं तयानाद्रि
यतादिति पयसं न तु ब्रह्मविदां योगिनां च यथाक्रमं ब्रह्मप्राप्तेः पुन
रावृत्तेश्च कारणभूतं यदेतत्कालगतिद्वयमुक्तं तत्राविशेषेण कश्चिद्वि
शेषो वोढव्यस्तेन वर्तेते वक्ष्यति च नैते सृती पार्थ जानन् योगी मुह्यति
कश्चनेति न चैनयोः स्मार्तीय कालविशेषरूपयोर्देवयानपितृया
नसंज्ञामात्रप्रदानेन ब्रह्मप्राप्तिहेतुर्भवेत् पुनः कश्चिद्विशेषो कार्यसम
गतिहेतुरवगम्यः इत्याशङ्क्याह ते कालस्य द्विविधाप्यन्तरभेदेन रहस्य

पंचोली टीका

दक्षिणमावृत्तिमार्गमाह धूमइति तथायोगीकर्मयोगीकेवलं
कर्मइदंशरीरंत्यक्त्वाधूमाभिमानिनींदेवतांप्राप्यततोरात्र्या
भिमानिनींदेवतांप्राप्यततःकृष्णपक्षदेवतांततःषण्मासदेव
तांप्राप्यततःक्रमशस्ताभ्यादेवताक्रमेणप्राप्यचेंद्रलोकेगत्वा
तत्रकर्मफलभोगानुभवत्वात्स्वकर्मणःक्षयेपर्जन्यपृथिवी
पुरुषयोषितक्रमेणपुनरावर्त्तते २५ ॥

रणवीरसमिहोधिनी॥

अथमनावृत्तिहेतुकमपिकालविशेषमभिधायेदानीमावृत्तिहेतु
कमपितमाह धूमइति धूमोधूमप्रायोगार्हपत्याहवनीयोभयत्रलक्ष
णोग्निःयःपाकज्ञानिकैःप्रस्थानेप्रथमास्थितयाकथितः तेनवाग्निहोत्र
योग्यःपूर्वरात्रोलक्ष्यते यद्वाधूमाद्युत्थायमानमपिधूमपदेनलक्ष्यंका
र्यकारणोपचारात् धूमज्योतिःसलिलमरुतांसन्निपातस्यैवचमेघ
माहार्थत्वात् अथवाधूमःसाटपपलक्षणयातमः तथाचमेघछ
न्नातामसीचरागिरितिपर्यवसितं तथाक्षीयमाणसोमोपलक्षितः
पंचदशाहोरात्रःकृष्णःपक्षः तथाकर्कटादिधनुरन्तराशिषट्कस
म्बन्धिदक्षिणायनोपलक्षिताःषण्मासादक्षिणायनं तत्रतस्मिन्काले
योगीयोगःसन्तन्नानोपायध्यानसंगतिशक्तिक्षितिकोयुगात्स्कृतस
न्नद्धःरणंप्रतिप्रस्थितइतियावत् चान्द्रमसंज्योतिः चंद्रमामन
सोजातइतिश्रुतेरात्माशविमतश्चेइत्यादिस्मृतेश्चचंद्रमसोमनन
सहदंज्योतिःस्फुरणं निवृत्तिहेतुभूतंपूर्वप्रतिपादितस्वरूपंसंकल्प
जालंप्राप्यनिवर्तते संग्राममहत्केवततःसकाशात्स्थया वर्त्तते अथ
शोकमोहादिभिरभिभूतःसन्पलायतइतिभावः अथचतत्रतस्मि
न्नेवकालेऽनुरूपकारायनानुलोम्यमतिप्रस्थितःसन्रणेरिपुभिः
संमुखंदत्तस्कंदायनानुलोम्यानुसारेणप्रस्थानेनैवदेहत्यागानन्तरंवा
विजित्यराज्यसुखेनउरुपापुण्यमतिवाह्यदेहादुत्क्रान्तोयोगीपार

संथानादिलक्षणकर्मफलः क्षत्रियस्यांइमसंस्योतिसत्तदुपलक्षि
तं स्वर्गलोकं प्राप्य यथाकालं च तद्भोगान्भुक्त्वा निवर्तते विशिष्टतर
भोगाधिकरणयोग्यशरीरादिसंबंधं लभते तत्रैव च जन्मनि पुनरु
त्तरायणादिकाले उक्तप्रकारद्वयान्यतरप्रकारकप्रयाणाद्देवयम
मसाधुत्यं गच्छति न पुनर्नरकमिति भावः एतदेव च सूचितमपिगी
तं पार्थनैवेहनामुत्रेत्यारभ्य ततो याति परां गतिमित्यंतेन ग्रंथेन
यः पुनरपरस्वभावः प्राग्जन्मार्जितपापप्राबल्यदृष्टेनायनप्राप्य
लोभ्येन गतः सन् भयशोकाद्यभिभूतः सन्विमुखीभूय पलाय
मानो तत एव रिपुभिः पश्चादागत्य निहतो निरयगतिमेव व्रजति
न कदाचिन्मुच्यत इति भावः तथा च मनुः यस्तु भीतः पराहृतः सं
ग्रामे हन्यते परैः भर्तुर्यद्दुष्कृतं किंचित्तत्सर्वं प्रतिपद्यते यच्चा
स्य सुकृतं किंचित्पराहुत्य हतस्य चेति याज्ञवल्क्योपि राजा सुकृ
तमादत्ते हतानां विपलायिनामिति पापाचारस्य निरयगति
रव्यभिचारिणीति सर्वसिद्धांतः ॥ २५॥

मधुभाष्य

२५॥

भाष्य अनुवाद टीका ॥

और जिस राह से गमन करि फेरि संसार मे आवते सो कहते है कि प्रथम धूम मे प्राप्त होयफेरि धूमसे रात्रि मे रात्रिसे कृष्णपक्ष मे कृष्णपक्षसे दक्षिणायन छमासमे तबपितृलोक मे उस से फेरि चन्द्रजोति मे प्राप्त होय योगी फेरि निवृत्तहोते हैं इहां भी धूमादि शब्दों से तदभिमानिनी देवता लेते हैंकामनाकरि कर्म्मकारियों की यह गति है कि कर्म्मफल भोग करि फेरि संसार होता है २५ ॥

दोहा

धूमतमीश्रोकृष्णपक्ष दक्षिणायन षटमास। प्रापतचंद्रकी।
ज्योतिको योगी तहां हटजाहि २५॥

135

शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते एकया
यात्यनावृत्तिमन्ययावर्त्तते पुनः २६ ॥

शाङ्करभाष्यटीका ॥

शुक्लेति शुक्लकृष्णे शुक्ला च कृष्णा च शुक्लकृष्णे ज्ञानप्रकाशकत्वात्
जगतः सर्व शुक्ला तदभावात् कृष्णा एते शुक्लकृष्णे हि गती जगत इत्यधिकृतानां ज्ञान
कर्म्मणोरेवैते गती न सर्वस्य जगतः शाश्वते नित्ये संसारस्य नित्यत्वान्नित्ये मते अभिप्रे
ते तत्रैकया शुक्लया यात्यनावृत्तिमन्ययेतरया वर्त्तते पुनः भूयः २६ ॥

आनन्दगिरिकृतटीका मावृत्ति

गत्यादौ मृतानां ब्रह्मविदामब्रह्मप्राप्तिशङ्कां निवर्त्त्यार्थमभिमानिनी देवताग्रह
णाय मार्गयोर्नित्यत्वमाह शुक्लेति ज्ञानप्रकाशकत्वाद्विद्याप्राप्यत्वादर्च्चिरादि
प्रकाशोपलक्षितत्वाच्च शुक्ला देवयानाख्या गतिस्तदभावात् ज्ञानप्रकाशक
त्वाभावात् धूमाद्यप्रकाशोपलक्षितत्वादविद्याप्राप्यत्वाच्च कृष्णा पितृयान
लक्षणा गतिः तयोर्गत्योः श्रुतिस्मृतिप्रसिद्धार्थो हिशब्दः जगच्छब्दस्य ज्ञानक
र्म्माधिकृतविषयत्वेन सङ्कोचे हेतुमाह नजगत इति अन्यथा ज्ञानकर्म्मोपदे
शानर्थक्यादित्यर्थः तयोर्नित्यत्वे हेतुमाह संसारस्येति मार्गयोर्वत् संसा धी
रभावित्वे फलितमाह तत्रेति क्रममुक्तिरनावृत्तिः भूयो भोक्तृत्वकर्म्मक्षये
शेषकर्म्मवशादित्यर्थः २६ ॥

स्वामिकृतटीका ॥

उक्तौ मार्गावुपसंहर
ति शुक्लार्च्चिरादिगतिः प्रकाशमयत्वात् कृष्णा धूमादिगतिः तमोमयत्वात्
एते गती मार्गौ ज्ञानकर्म्माधिकारिणो जगतः शाश्वती अनादी संसारस्याना संमते
दित्वात् तयोरेकया शुक्लया अनावृत्तिं मोक्षं याति अन्यया कृष्णया तु पुनरा
वर्त्तते [illegible] २६ ॥

पिशाचभाष्यम् टीका

शुक्ला च कृष्णा च शुक्लकृष्णे गती मार्गौ ज्ञानप्रकाशयुक्तस्य योगिनः शुक्लपक्षो
गतिः ज्ञानप्रकाशरहितस्य कर्मिणः कृष्णपक्षो गतिः जगत इत्यस्य योगिनः
कर्मिणश्चोच्येते शाश्वते नित्ये प्रवाहनित्यत्वात् एकया यात्यनावृत्तिमपुन
रावृत्तिवत् ब्रह्मलोकस्थितिं अन्यया आवर्त्तते पुनरागच्छति मनुष्यलोके
तत्र प्रयाता गच्छति परमेव कथं न रहस्यते तत्र परमस्मिन् ब्रह्मणि प्रयाणं

गी·
टी· अ·

निषेधात् अथवा कामयमानेयोः कामो निष्काम आप्तकामः आप्तकामो न
तस्य प्राणा उत्क्रामंति अत्रैव समवलीयंते ब्रह्मैव सन् ब्रह्माप्येतीति श्रुतेः तद्वै
तत्पश्यन्नृषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्चेति २९ ॥

136

रामानुजभाष्यं टीका

शुक्लकृष्णे इति शुक्ला गतिरर्चिरादिका कृष्णा च धूमादिका शुक्लया यात्यनावृत्तिं याति कृष्णया तु पुनरावर्तते एते शुक्लकृष्णे गती ज्ञानिनां द्विविधानामपि एकर्मिणां श्रुतौ शाश्वते मते तद्य इत्थं विदुर्ये चेमे अरण्ये श्रद्धा तप इत्युपासते ते अर्चिषमभिसंभवंति अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवंतीति २९ ॥

अनयोर्गत्योर्मध्यादाद्यया
नावृत्तिर्मोक्षः अन्यया भोगः
एते सृती यो वेत्ति अभ्यन्तरेण क्रमेण योगाभ्यास
स्वीकृते नेत्यर्थः एतच्च वित्तत्व
प्रकाशमानं ग्रन्थविस्तारयती
त्यलम् २८

अभिनवगुप्त कृत टीका [illegible] २९ ॥ परमार्थप्रपा

तदेवं निवृत्ति कर्मोपासनया क्रममुक्तिं तथा काम्य स्वर्गभोगानंतरं आह
ति मुक्तेदानीमुपसंहरन् स्पष्टमाचष्टे शुक्लकृष्णे इति शुक्ला आर्चिरादिग
प्र^ तिः प्रकाशरूपिणी कृष्णा धूमादिगतिस्तमोरूपिणी एते गती मार्गौ ज्ञाना
कर्माधिकारिणो जगतः शाश्वते अनादिसम्मते संसारस्यानादित्वात् त
योरेकया शुक्लया अनावृत्तिं मोक्षं गच्छति अन्यया कृष्णया पुनरावर्तते
अकुलागमे तु ईश्वरः पार्वतीं प्रति गीताशास्त्रस्य भावार्थं न जानंति यथार्थ
मा^ तः प्रतिपन्नस्य या गुरुपाप्रमिता विसर्जनीया अग्निष्टमात्मको मार्गो वाम
दक्षिणसंज्ञको ष्टा पिंगलनामा वा प्राणापानप्रवाहको इडायां संस्थि
तः प्राणो ह्यपानः पिंगलास्थितः प्राणो ह्यग्निः समुद्दिष्टोऽपानो धूमः प्रकी
र्तितः वर्तेते सह योगेन परस्परविलक्षणे तत्रैकस्याश्रयो ब्रह्म द्वितीय
स्याश्रयो भवः गमागमप्रयोगेन सौम्यदक्षिणतः स्थितौ अन्योन्यगतिसं
चारात् संक्रा[illegible]तिः साभिधीयते उत्तरायणं प्राणश्चापानो दक्षिणाय
नं सौरं चांद्रमसं ज्योतिः क्रमेण त्वमवस्थिते उत्क्रांते तु यदा जीवः सौर नु^
ज्योतिर्विशेत् तदा ब्रह्म प्राप्नोति संसारे यदा चांद्रमसं विशेत् संसारी स ग
मेत्तत्पविशत्येवं तत्र वरानने सौरी याउभयोस्तत्त्वज्ञस्तु समाधिना यदा [illegible]
[illegible] स्थितः जीवन्मुक्तत्वमायाति काल
स्यागोचरस्तदेति २९ ॥

वनमाली टीका ॥

उक्तौ मार्गावुपसंहरति शुक्लेति शुक्लार्चिरादिगतिः ज्ञानप्रकाशमय
त्वात् कृष्णा धूमादिगतिः ज्ञानहीनत्वेन तमोमयत्वात् एते गते हि प्रसिद्धे
ब्रह्मकर्माधिकारिणोर्जगतः सर्वस्यापि शास्त्रस्य शाश्वते अनादी मते संसारस्या
नादित्वात् तयोरेकया शुक्लया नावृत्तिकश्चियाति अन्यया कृष्णया पुन
रावर्तते सर्वोपि यद्यर्चिरादिमार्गेण सगुणोपासकः क्रममुक्तिभाजो ग
च्छंति सद्योमुक्तिभाजस्त्वेवमप्यतेन त्वर्चिरादिमार्गेण गच्छंतीति तत्र अ
र्चिरादिधूमाद्यतिरिक्तप्रकारस्य क्वाप्यनुक्तत्वात् निर्विशेषवादिनः स्व
रूपमात्रस्य सदोपलब्धत्वात्तद्भिन्नस्य सुखस्य दुःखाभावस्य च लोके पु
रुषार्थतया प्रसिद्धस्याभावात् न च विस्मृतकंठस्थमणिलाभवल्लाभोपप
त्तिः तत्र मणिज्ञानजन्यसुखस्य दुःखाभावस्य च पुरुषार्थत्वात् अज्ञाना
नुपहितानंतया सुखादिसाक्षितया स्वरूपमात्रस्य सदा भानेन विस्मरणा
संभवाच्च स्वरूपमात्रादधिकस्य मोक्षस्याभावाच्च अनेकजीववादे एको
यापि निर्मुक्तस्यापि चेतनस्यापायंतरेणावच्छिन्नत्वेन मुक्तत्वसंभवा
त् एकजीववादेप्येकोपि न मुक्त इति बहूनां मुक्तिवाधिकाः अत्रयः
स्तनयश्चासंगता एव २९ ॥

ज्ञसमवैजयन्ती टीका

तावुक्तौ मार्गावुपसंहरन्नाह शुक्लकृष्णे इति जगतो ज्ञानकर्माधिकारिणः
हीति निश्चयेन एते पूर्वोक्ते शुक्लकृष्णे शुक्ला च कृष्णा च शुक्लकृष्णे शुक्लो
र्चिरादिकालस्य प्रकाशरूपत्वात् गती मते शाश्वते अनादी मते तत्
यद्वै स्यं विदुर्ये चेमेऽरण्ये श्रद्धां तप इत्युपासते तेऽर्चिषमभिसंभवंतीत्यादि
श्रुतिसंमते भवतः एकया शुक्लगत्याऽनावृत्तिं मुक्तिं याति ज्ञानयोगी म
द्भक्तः प्राप्नोति अन्यया कृष्णगत्या यः कर्मयोगी मद्भक्तो याति स पुनरा
वर्तते संसारं प्राप्नोति २९ ॥

मधुसूदनी टीका ॥

उक्तौ मार्गावुपसंहरति ॥

शुक्लार्चिरादिगतिः ज्ञानप्रकाशमयत्वात् कृष्णा धूमादिगतिः ज्ञान
हीनत्वेन तमोमयत्वात् ते एते शुक्लकृष्णे गती मार्गौ हि प्रसिद्धे सगुणवि
द्याकर्माधिकारिणोर्जगतः सर्वस्यापि शाश्वते अनादी मते संसारस्याना

शास्त्रस्य

दित्वात् तयोरेकया शुक्लया यात्यनावृत्तिं कश्चित् अन्यया कृष्णया पुना
रावर्तते संवैपि[illegible]नंदमोति २९ ॥

सदानंदी टीका ॥

अर्चिरादिगतिः शुक्ला धीप्रकाशमयत्वतः धूमादिकगतिः कृष्णा ज्ञानहीनतया तमः शाश्वतस्यापि सर्वस्य विधाक र्माधिकारिणः एते गती प्रसिद्धे ह्यनादी जगतो मते संसारस्याप्यनादित्वादनादित्वं तयोर्मते शुक्लया यात्यनावृत्तिं कृष्णया वर्तते पुनः २९ ॥

नीलकंठी टीका ॥

उक्तौ मार्गावुपसंहरति शुक्लेति शुक्ला ज्ञानहेतुत्वादर्चिरादिगतिः तदभावात्कृष्णा धूमादिगतिः एकया शुक्लया अन्यया कृष्णया २६

आनंदी टीका

एतदुपसंहरति ॥

शुक्ला प्राणगतिः कृष्णा अपानगतिः अनावृत्तिः मोक्षः आवृत्तिर्भोगः २६

रामकंठी टीका

अत एव प्राणापानलक्षणांतर विशिष्टमार्गद्वयैत्वेनैतत्संगृहीतुमाह ॥

एते यथोक्ते द्वे गती प्राणापानवृत्तिरूपो देवयानपितृयानसंज्ञो द्वौ मार्गौ जगतः सर्वस्य लोकस्य शाश्वत इति छांदसः पाठः तेन नित्येन सर्वः कश्चिज्जन्तुर्यस्माद्धि अपानमार्गाश्रयेणैव देहादुत्क्रामति अपानमार्गाश्रयणेन देहान्तरे संक्रामति ब्रह्मविदो योगिनस्त्वायं तु विशेषो यदनयोर्गत्यो र्मध्यादेकयोर्ध्ववाह प्राणरूपया शुक्लगत्या यथोक्तप्रकारेणान्तकाले समाश्रितया ब्रह्मविदनावृत्तिं याति ब्रह्म प्राप्नोति योगी तु तयैवोत्क्रामन्नन्यया पानरूपया कृष्णयोक्तेन हेतुना वर्तते विशिष्टदेहांतरे संक्रामतियतः २६

लास्किकी [illegible]टीका

अथानयोरत्वस्थयोरनावृत्त्या वृत्तिदायिन्योः संज्ञापूर्वकनियतत्वमाह ॥

हि प्रसिद्धौ एते अनंतरोक्ते शुक्ल कृष्ण गती मार्गौ शुक्ला ज्ञानप्रकाशमयत्वात् कृष्णाज्ञानतमोवृतत्वात् जगतो योगाधिकारिणो लोकस्य शाश्वते नित्ये अप्रवप्रभाविन्यौ मते निश्चिते तत्रैकया शु

ल्कयाग्निर्ज्योतिरित्यादिलक्षितया सततयोगाभ्यासलब्धप्रक
र्षो योगी अनावृत्तिं मोक्षं याति प्राप्नोति अन्यया कृष्णया धूमरा
त्र्यादिलक्षितया कदाचित्कयोगपरो योगी पुनर्देहत्यागानन्तर
मावर्तते देहान्तरे संक्रामति यत्र पुनर्योगपरिशीलनेन शुक्ला
गतिमासाद्य मुच्यते अत्रास्य तु कृष्णायां गतेरेव निश्चितविध
मानतया न तत्र संशयावकाशः अत्र शास्त्रे इत्थं केचित् तदभिद्ध
ध्यते यः कश्चित्तत्त्वतो योगपरस्तस्यावश्यमत्र जन्मनि परत्र ज
न्मनि वा विदेहमुक्तिः स्यादेव जीवन्मुक्तिस्तु योगिसहस्रेषु म
ध्ये कस्यचिदेव परिपक्वभक्तेरीश्वरानुग्रहेण संप्राप्येति यत उक्त
मास्तुके समहात्मा सुदुर्लभ इति सृत्येतयोर्गत्योः परिज्ञानस्य
फलमाह २६

पंचोलेटीका

उक्तावुत्तरदक्षिणमार्गावुपसंहरति शुक्लेति हि निश्चितं एते शु
क्लकृष्णे ज्ञानप्रकाशयुक्तता दैवैकाशुक्ला उत्तरा कृष्णा दक्षिणा
एते उभे जगदिति ज्ञानकर्मणोरधिकृतानां सर्वस्य जगतः गती
मार्गौ शाश्वते नित्ये ब्रह्मज्ञानपर्यंतं जगतो नित्यत्वादविनाशिन्यौ
मते अभिप्रेते अनयोर्गत्योरेकया शुक्लया अनावृत्तिं याति अन्य
या कृष्णया पुनरावर्तते २६

रणवीरसमिद्धोधिनी॥

उक्तमेवार्थं संगृह्णाति शुक्लकृष्णेति शुक्लकृष्णशब्दोपलक्ष्या
भिधायिनौ प्रकाशांधमयत्वसाम्याद्दिनरात्री अपि लक्षयतः देवा
नां च दिनरात्री सूर्यस्योदग्दक्षिणागती तथा च एते पूर्वं प्रतिपादि
तस्वरूपे शुक्लपक्षादिनकृष्णपक्षरात्रिसदृशे गती विशेषेण स्यो
दग्दक्षिणे अयने अथ वा कं त्वनयोर्विधा सर्वस्यापि कृष्णोक्तिगा
गमनानुकूलप्रतिकूलकालविशेषलक्षणे शुक्लकृष्णसंज्ञके शुद्ध

शुद्धेव मुहूर्ते जगतः गच्छतीति श्रुत्यर्थाद्विप्रकारं प्रयाणं कुर्वतः तथाहि लोकस्य पश्यते नित्यमेते उक्तकालयोर्मध्ये यियासोरस्व तमेव रूपं प्रयाणादिति भावः तयोर्मध्ये एकयोक्त लक्षणया पूर्वे या शुक्लसंज्ञया गत्या प्रयातो जन उक्तलक्षणाम नावृत्तिं याति प्राप्नोति अन्यथापरतो निर्दिष्टया कृष्णसंज्ञया गत्या पुनरावर्त्तते उक्तलक्षणां पुनरावृत्तिं प्राप्नोति २६॥

मधुभाष्य

२६॥

भाष्य अनुवाद टीका

येई शुक्ल कृष्ण दो गती जगत मे सनातन से चली आवती हैं इन मे निःकाम कर्म्मकारी ज्ञानी शुक्लकरके प्रकाश मार्ग से गमन करके मुक्त होते और नाना मनोरथ करके यज्ञादि कर्म्मकारी मनुष्य कृष्ण कहे अन्धेरी धूममार्गसे गमन कर कर्म्मफल भोगके अनन्तर फेरि संसार मे आय जन्मग्रहण करते हैं २८ ॥

दोहा

शुक्लकृष्णजोमार्ग यह नित्यजगतकेमान मोक्षहिहोवे एक
सें एक हि जन्म प्रमान २८॥

139

नैतेसृती पार्थजानन् योगीमुह्यतिकश्चन त
स्मात्सर्वेषुकालेषु योगयुक्तोभवार्जुन २७

शाङ्करभाष्यं टीका ॥

नैत इति नैते यथोक्ते सृती मार्गौ पार्थ जानन् संसारायैकान्या मोक्षाय
चेति योगी न मुह्यति नकश्चन कश्चिदपि तस्मात् सर्वेषु कालेषु योग
युक्तः समाहितो भवार्जुन २७ ॥

आनन्दगिरिकृत टीका ॥

गतेरुपास्यत्वाय तद्विज्ञानं स्तौति नैतइति योगस्य मोहापोहकत्वे फ
लितमाह तस्मादिति ज्ञानप्रकारमनुवदति संसारायेति मोक्षाय क्र
ममुक्तयेमित्यर्थः योगीध्याननिष्ठो गतिमपिध्यायन्नेव मुह्यति केवलं
कर्मदक्षिणमार्गप्रापकं कर्तव्यत्वेन न प्रत्येतीत्यर्थः योगस्यापुनरा
वृत्तिफलत्वे नित्यकर्तव्यत्वे सिद्धमित्युपसंहरति तस्मादिति २७ ॥

मार्गज्ञानफलंदर्शयन्॥ स्वामिकृत टीका ॥

भक्तियोगमुपसंहरति एतेसृतीज्ञानकर्ममार्गौमोक्षसंसारप्रापकौजा
नन् कश्चिदपियोगीनमुह्यति सुखबुद्ध्यास्वर्गादिफलंनकामयेतं किं
तुपरमेश्वर[illegible]निष्ठएवभवतीत्यर्थः स्पष्टमन्यत[illegible]
[illegible] २७ ॥

पिशाचभाष्यम् टीका ॥

नैतेसृतीमार्गौजानन्नवगच्छन्योगीउपासकःकश्चनकोपिमुह्यतिक्र
मादर्चिरादिमार्गेणब्रह्मलोकंउतधूमादिमार्गेणपितृलोकमिति २७

रामानुजभाष्यं टीका ॥

नैतइति एतौमार्गौजानन्योगीप्रयाणकालेकश्चननमुह्यति अपितुस्व
नैवदेवयानेनयथायाति तस्मादहरहरर्चिरादिगतिचिंतनाख्ययोगयुक्तोभव २७

अभिनवगुप्तकृत टीका [illegible] सर्वेषुकालाभ्यन्तरालद्विषयंयोग
मभ्यसेत् अस्मद्गुरवस्त्वाहुः सर्वानुग्राह
कतयामध्ये आभ्यन्तरकालकृतमुत्क्रान्ति
भेदमभिधायप्रकृतमेव मुख्यप्रमेयमुप
संहृतं तस्मात्सर्वेषुकालेष्वित्यादिना २७

परमार्थप्रपा टीका ॥

गी
टी-ग्र-

अथ मार्गज्ञानफलमाह नैतेइति भोः पार्थ योगी सन् एते सृती मार्गौ जा-
नन् कश्चिदपि न मुह्यति स स्वर्गादिसुखं न कामयते [illegible]
किंत्वात्मनिष्ठ एव भवति तस्मात्सर्वेषु कालेषु भोजनासनादिसमयेष्वपि
योगयुक्तः जीवब्रह्मणोरैक्यपरिनिष्ठितो भव २७ ॥

140

वनमालीटीका ॥

मार्गज्ञानफलं दर्शयन् भक्तियोगमुपसंहरति नैते इति योगी ब्रह्मसा-
क्षात्कारस्तद्वान् योगी एते सृती मार्गौ ब्रह्मवाप्तिहेतू जानन् न मुह्यति वैचित्र्य-
न श्रयति सृती ज्ञात्वा तदुपायं चानुष्ठायार्चिरादिगतिं प्राप्य ब्रह्म प्राप्नोतीत्य-
र्थः यतो भक्तियोगस्यापुनरावृत्तिरूपं फलं तस्मात्सर्वेषु कालेषु भक्तियु-
क्तो भव समाहितचित्तो मद्ध्यानं तत्परो मद्युक्तो भवेत्यर्थः २७ ॥

श्रीमद्वैजयन्ती टीका ॥

एतयोर्ज्ञानस्य ज्ञानकारणतां वदन् स्तौति नैते सृतीति हे पार्थ एष्या-
मुक्तपते ऽर्वाक् एते सृती अर्चिरादिधूमादिमार्गौ यो जानन् अर्चिरादिमार्गो
मोक्षहेतुः धूमादिः संसारहेतुर्भवतीति विदन् सन् योगी ज्ञाननिष्ठश्चेत-
नाचेतनब्रह्मस्वरूपज्ञ इत्यर्थः कश्चन कश्चिदपि मद्भक्तो न मुह्यति धूमा-
न दिप्राप्तिसाधनं न करोति किन्तु अर्चिरादिप्राप्त्युपायमेव निश्चिनोतीत्यर्थः
[illegible]
[illegible] यस्मादेवं तस्मात् हे अर्जुन सर्वेषु काले-
षु प्रतिक्षणं योगयुक्तो ऽर्चिरादिगतिप्रापकस्मरणलक्षणो योगस्तद्युक्त-
स्त्वं भव धूमादिमार्गप्रापकं कर्म माकुरुष्वेत्यर्थः २७ ॥

गते रूपास्यत्वाय तद्विज्ञानं मधुसूदनी टीका ॥ पुनः

स्तौति ॥ एते सृती मार्गौ हे पार्थ जानन् क्रममोक्षायैका पुनः संसारायापरेति नि-
श्चिन्वन् योगी ध्याननिष्ठो न मुह्यति केवलं कर्म धूमादिमार्गप्रापकं क-
न र्तव्यत्वेन न प्रत्येति कश्चन कश्चिदपि तस्माद्योगस्यापुनरावृत्तिफलत्वात्
सर्वेषु कालेषु योगयुक्तः समाहितचित्तो भव अपुनरावृत्तये हे अर्जुन
[illegible] २७ ॥

सदानंदी टीका ॥

नैते का क्रममोक्षाय संसाराय चापरा सृती इत्येवं ध्याननिष्ठो हि निश्चिन्व-
न्नैव मुह्यति योगस्यापुनरावृत्तिफलत्वादेव सर्वदा निरन्तरं समाधाने

वित्तं कुरु विमुक्तये २७ ॥

नीलकंठी टीका ॥

एते सृती मार्गौ आवृत्त्यनावृत्तिफले जानन् योगी न मुह्यति योगभ्रष्टोऽयतिरल्पप्रयत्नश्च योगी न भवति कश्चन कोऽपि यस्मादेवं तस्मात्सर्वेष्वित्यादि स्पष्टं २७

आनंदी टीका

एते अक्रमयुक्त्या आभ्यंतरेण क्रमेण योगाभ्यासस्वीकृतेन उत्तरदक्षिणे पदव्यौ जानन् कश्चन योगी न मुह्यति लब्धभूमिस्तत्रैव बाध्यः प्रततीत्यर्थः तस्मादर्जुन सर्वेषु कालेषु सर्वे काला ये बाह्या आभ्यंतराश्च तेषु योगयुक्तो भवेति सर्वानुग्राहकतया मध्ये कालकृतमुत्क्रांतिभेदमभिधाय प्रकृतमेव बाह्यकालविषयप्रमेयमुपसंहृतमित्यभियुक्ताः अ सकलानि शास्त्रदर्शनेन मध्ये ज्ञापयति

रामकंठी टीका

एते यथोक्ते सृती प्राणापानरूपे गती जानन् यथोक्तया महत्तया प्रतिपाद्यमानो योगी शाक्त्रनिपादितस्वीकृतमुख्ये योगे न कश्चिन्मुह्यति सर्व एव तद्गतिज्ञः सन् ब्रह्मप्राप्तिहेतुगतिसमाश्रयणेन ब्रह्मैव प्राप्नोति न तु संसारमितरगतिपरिहारात् एतयोश्च गत्योरेवंविधां महत्तां ब्रह्मविदां ज्ञेयत्वेन स्थितां तत्त्वविदो वदंति सर्वदेहेषु मनःप्रसरसहचरोऽयं प्राणप्रसरो यत उदेति यत्र चास्तमेति तत्कालकलनादिसकलप्रपंचविरहितब्रह्मतत्त्वोपलब्धिपदं ततश्च यथोक्तप्राणप्रसरनिबद्धः सकलः कालादिप्रपंचः तदुदयास्तमयदशाविमर्शतत्परसंविदां ब्रह्मविदां प्रलीयते तादृशीं च दशामासाद्य यो ब्रह्मवित्परमयोगी देहमुत्सृजति स ब्रह्मण्येव परिणतो न पुनरावर्तते यस्तु केवलयोगी तां दशां तथा प्रत्यवमर्शनकुशलः स चायमस ज्योतिरपानप्रसररूपमाश्रित्योत्क्रामन्देहांतरे संक्रामति यत्र क्रमेण सिद्धिमाप्स्यतीत्येवमनयोर्गत्योः सिद्धिहेतुविभागविज्ञानमत एवोक्तं नैते सृती जानन्योगी मुह्यतीति यत एवं तस्मात्सर्वेषु का

गी॰ लेषुवाऽहर्निशोत्तरायणदक्षिणायनादिबहुभेदोक्तेषुयोगयुक्तो
टी॰ भवयथोक्तप्रकारेणप्राणापानगतिज्ञानात्मकेयोगेसमाधौयु
अ॰ क्तोऽवहितोभव यतोऽस्ययोगस्यायंप्रभावः २७

लाक्ष्मिकी [illegible]टीका

अथैतयोर्गत्योः परिज्ञानस्य फलमाह ॥

हेपार्थकश्चनयोगीउक्तविधेषुयोगभेदेष्वन्यतमयोगाभेद्ययुक्तो
योगी एतेयथोक्तेसृतीगतीजानन्नाभ्यंतरेणक्रमेणयोगाभ्यासश्चाहृते
नजानन्सत्यभिजानन्नमुह्यति देहादिष्वात्मप्रत्ययेनभजते यतएवं त-
स्मात्सर्वेषुकालेषुकालविशेषभूतास्ववस्थासुयोगयुक्तोयोगीजीवन्मु
क्तिविदेहमुक्त्योःप्रथमाप्रायुक्तेआत्मसमाधानेयुक्तःसवधानोभव हे
अर्जुन यतोनित्यसमाधानेनैवपरमार्थसिद्धिःनतुपरिमितकाला-
नुष्ठितेनयोगेनेत्यसकृच्छ्रीभगवतोपदिष्टं तथावक्रतुलार्णवे तस्मात्स
र्वप्रयत्नेनसर्वावस्थासुसर्वदा तत्त्वनिष्ठोभवेद्विधिदीक्षेन्नोन्मात्म
नइति अथोक्तस्याध्यायार्थस्यप्रभावमाह २७

पंचोली टीका

मार्गज्ञानफलंदर्शयन्भक्तियोगमुपसंहरतिनैतेइति हेपार्थएतेय
थोक्तेसृतीमार्गौपकाश्चक्रमोत्तायम्अपराहत्तासंसारायइतिजा
नन्कश्चिदपियोगीनमुह्यति हेअर्जुननतस्मात्सर्वेषुकालेषुसर्वदा
योगयुक्तः आत्मनिसमाहितोभव २७

रणवीरसमिद्धायिनी ॥

अथैतादृशाकालसमययोगज्ञानस्यमोहनिवर्तनरूपफलकथनेनार्जु
नंतादृशाकालयोगसज्जीकर्तुमाह नैतेसृतीइति एतेउक्तलक्षणे
सृतीशुक्लादिरूपेअर्कस्योदग्दक्षिणेअयने तद्वद्दिवसेशुभाशुभमु
हूर्तेर्जानन् अनुलोमतयाप्रतिलोमतयावानुभूत्याहृतिहस्तकेइति
प्रायः अन्यथाकालयोगज्ञानमात्रेणमोहनिवृत्त्यनुपपत्तेः कश्चना
पियोगीयोगः शुक्लादिकालसमागमोविद्यतेयस्यवेद्यत्वेनेतियोगी
शुभाशुभमुहूर्तज्ञः अथचतादृशाप्येवकालयोगेकृतसत्त्वरहनश्च

नप्राप्ति भवानिवर्त्तकधर्मत्वेन गच्छति तस्माद्धेतोस्त्वमपि सर्वेषु
कालेषु योगयुक्तः उक्तलक्षणमुहूर्त्तज्ञानेन समाहितः ननु प्रो
क्तले मुहूर्त्ते एव सन्नद्धस्य भवेति ननु सर्वेषु इति कोर्थः नन्वावत्
शुक्लादिषु कृष्णादिषु चेति उभयोर्विधयोः शुभाशुभमुहूर्त्तकथन
स्य व्यर्थत्वात् नापि भूतवर्त्तमानभविष्यत्स्वपीति भूतेषु
तस्यासंभवादतीतत्वात् वर्त्तमानेपि सन्नद्धनादियोगस्य सं
पन्नत्वात् भविष्यति च तत्साधकत्वेपि सर्वेषु इति पदानर्थ
क्यात् इति चेन्न अत्रापि त्वयानेका एवंविधाः समरचर्या विधेया
स्तत्रापि शुक्लादिकालसमागम एव विधार्य इत्यनेकवाराभिप्रा
यकत्वात्सर्वपदस्य सार्थकत्वात् अत एव प्रेरणमपि सार्थकमि
ति यद्वा ननु यद्येवं शुक्लगतेरनावृत्तिः कृष्णगतेरावृत्तिरिति नि
यतात्किमिति दक्षिणायनेप्यस्मान्मुक्तिकामानस्याप्य समरे
नियोजयसीत्यर्जुनाभिप्रायमाशंक्यायनानुलोम्येन हेतुरपि ग
तीमुक्ति दाक्षिण्यावेव किंतु क्रमेणोत्तरजन्मभाविते जन्मांतरभा
विते च मोक्षस्य परस्परमेतयोर्विशेष इत्यभिप्रायवानाह नैते
सृती इति एते उक्तलक्षणे सृती शुक्लादिरुत्तमके स्याद्दक्षिणे
अयने जानन् अनुलोमतया प्रतिलोमतया वानावृत्त्यावृत्तिरेवं
के विदन् कश्चनापि योगी सन्नद्धनोपायध्यानसंगतिर्मुक्तिविति
कोशादिपूरयति कृतः सन्नद्धनः प्रयात इति यावत् न मुह्यति मो
हं कश्मलं नाप्नोति किंतु निश्चयलाभेन समारब्धं कर्म पारयत्येव
सर्वस्य तावन्मोहप्रपन्नस्य मोहो हि उत्पाद्यो विशेषतस्त्वद्यापन्य
वेनासमदीयस्य तव मोहोनुपपन्न इति मोहत्यक्तासो विकर्मयोगमा
तिष्ठेत्यभिप्रायवान् संबोधयति पार्थेति तस्मात् आनुलोम्यं वि
चार्य सर्वेषु कालेषु शुक्लादिषु कृष्णादिषु वा योगयुक्तः योगे स
न्नद्धने कर्मकौशललक्षणे सर्वत्र सुयुक्तमिव सपत्नादिषु तत्त्वदृष्टि
लक्षणे वा युक्तः सन्नः सावधानो वा भव शुक्लाभिधानस्य विशुद्ध

142

स्यवत तव छल्कगतिरव मयंभाविनीति मात्वं तत्वामौ विविकित्स
भूरित्यभिप्रायवा संबोधयति हेप्रज्ञेनेति २७॥

मथभाष्य

२७॥

भाषा अनुवाद टीका

उक्त मार्ग दोनोके [illegible] ज्ञानसे जो फल सो दिखावते हुये भक्तियो
ग कहते हैं कि हे पार्थ मोक्ष औ संसार की देनेवाली इन दोनो मार्ग
को जानि कर कोई योगी पुरुष संसारिक मोह नही पावता अर्थात्
सुख समझि स्वर्ग आदि फल की कामना नही करता बल कि परमेश्वर
ही मे निष्ठा करता है इस से हे अर्ज्जुन तुम मेरी भक्तियोग मे युक्त
होयरहो २७ ॥

दोहा

पार्थयह मग जानके योगीमोहेन कोउ ताते सर्वहिंकालमें
योगयुक्त तं होउ २७॥

143

वेदेषु यज्ञेषु तपःसु चैव दानेषु यत्पुण्यफलं
प्रदिष्टं अत्येति तत्सर्वमिदं विदित्वा योगी परं स्था
नमुपैति चाद्यं २८ इति श्रीभगवद्गीतासू
पनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णा
र्जुनसंवादे तारकब्रह्मयोगो नाम अष्टमोऽध्याय ॥८

शाङ्करभाष्य टीका

इदानीं योगस्य माहात्म्यं वेदेष्विति वेदेषु सम्यगधीतेषु यज्ञेषु च साद्गुण्येनानुष्ठितेषु तपःसु च सुतप्तेषु दानेषु च सम्यग्दत्तेषु यदेतेषु पुण्यफलं प्रदिष्टं शास्त्रेणात्येत्यतीत्य गच्छति तत् सर्वं फलजातमिदं विदित्वा सप्तप्रश्ननिर्णयद्वारेणोक्तं सम्यगवधार्यानुष्ठाय इह योगी परं उत्कृष्टमैश्वरं स्थानमुपैति प्रतिपद्यते आद्यमादौ भवं कारणं ब्रह्मेत्यर्थः २८ इति शाङ्करभाष्य टीकायां अष्टमोऽध्यायः ८ ॥

आनन्दगिरिकृत टीका

अध्यायद्वयार्थं योगं स्तौति वेदेष्विति पवित्रपाणित्वप्राङ्मुखत्वादिसाहित्यमध्ययनस्य सम्यक्त्वं मन्त्राद्यङ्गोपेतमनुष्ठानं तस्य साद्गुण्यं तपसः शास्त्रोक्तानां सुतप्तत्वं मनोबुद्ध्याद्यैकाग्र्यपूर्वकत्वं दानस्य च सम्यक्त्वं देशकालपात्रानुगुणत्वमिदं विदित्वेत्यत्रेदं शब्दार्थमेव स्फुटयति सप्तेति यद्यपि किं तद्ब्रह्मेत्यादावधियज्ञः कथं कोऽत्रेत्यत्र मध्यद्वयं प्रतिभासानुसारेण कैश्चिदुक्तं तथापि प्रतिवचनालोचनायां द्वित्वप्रतीत्यभावात् प्रकारभेदविवक्षया च शब्दद्वयस्य प्रतिनियतत्वान्न सप्तेति विरुध्यते न चेदं वेदनमात्रान्तिकं किं त्वनुष्ठानपर्यन्तमित्याह सम्यगिति प्रकृतो ध्याननिष्ठो योगीत्युच्यते परं स विष्णोः परमं पदं तदेव तिष्ठत्यस्मिन्नशेषमिति स्थानं योगानुष्ठानादशेषफलातिशायि मोक्षलक्षणं फलं क्रमेण लब्धुं शक्यमिति भावः तदनेन सप्तप्रतिवचनेन योगमार्गं दर्शयता ध्येयत्वेन तत्पदार्थो व्याख्यातः २८
इति आनन्दगिरिकृतटीकायां अष्टमोऽध्यायः ८ ॥

स्वामिकृत टीका ॥

अध्यायार्थमष्टप्रश्नार्थनिर्णयं सफलमुपसंहरति ॥

गी
टी·अ·
144

वेदेष्वध्ययनादिभिः यज्ञेष्वनुष्ठानादिभिः तपःसु कायशोषणादिभिः दानेषु च सत्पात्रार्पणादिभिः यत्पुण्यफलं चोपदिष्टं शास्त्रेषु तत्सर्वमत्येति ततोऽपि श्रेष्ठं योगैश्वर्यं प्राप्नोति किं कृत्वा इदमष्टप्रश्नार्थनिर्णयेन उक्तं तत्त्वं विदित्वा ततश्च योगी ज्ञानी भूत्वा परं उत्कृष्टं आद्यं जगन्मूलभूतं स्थानं विष्णोः पदं प्राप्नोति अष्टमेऽष्टविशिष्टेष्टसेष्टार्थार्थनिर्णयैः अक्लिष्टमिष्टधामाप्तिः स्पष्टितेह कृतेष्टवर्त्मना २८ इति श्रीसुबोधिन्यां टीकायामष्टमोऽध्यायः ८ ॥

[illegible]वभाष्यम् टीका

स्मरणयोगस्य माहात्म्यं वेदेषु सम्यगधीतेषु यज्ञेषु यथावदनुष्ठितेषु तपस्सु चान्द्रायणादिषु कृतेषु दानेषु हिरण्यादिषु च यत्पुण्यफलमुपदिष्टं अत्येति निवर्तते तत्सर्वमिदं विदित्वा सप्तप्रश्ननिर्णयद्वारेण उक्तमर्थं ज्ञात्वा योगी परं च कृष्टं स्थानमुपैति प्राप्नोति आद्यम् आदौ भवं परं ब्रह्मेत्यर्थः २८ इति पैशाचभाष्येऽष्टमोऽध्यायः ८ ॥ ॥

[illegible]नुजभाष्ये टीका ॥

अध्यायद्वयोदितशास्त्रार्थवेदनफलमाह वेदेष्विति ऋग्यजुःसामाथर्वरूपवेदाभ्यासयज्ञतपोदानप्रभृतिषु पुण्येषु यत्फलं निर्दिष्टं इदमध्यायद्वयोदितं माहात्म्यं विदित्वा तत्सर्वमत्येति एतद्वेदनसुखातिरेकेण तत्सर्वं तृणवन्मन्यते योगी ज्ञानी च भूत्वा ज्ञानिनः प्राप्यमेव परमाद्यं स्थानमुपैति २८ इति श्रीरामानुजभाष्ये टीकायामष्टमोऽध्यायः ८ ॥

[illegible]नवगुप्तकृतटीका

अनाहृतिर्मोदः आहृतिर्भोगाय उक्तरीत्या येनायनं प्राणप्रासिकं [illegible] ... [illegible] अत्येति अभिभवति सर्वकर्मसंस्काराणां भगवत्तत्त्वाविफलीकरणात् सर्वकर्मपरित्यागेनापि स तवैनैव विदितेन परं शिवम् सर्वसत्त्वगतत्वेन विज्ञाते परमेश्वरे अनन्तं हि तेन साधु स्थानयत्संभासते विभुः इति संग्रहश्लोकः २८ इति अभिनवगुप्तकृतटीकायामष्टमोऽध्यायः ८ ॥

अथाध्यायतात्पर्यम् ॥ ब्रह्मात्मप्रकाशान्निजविषयमतोध्यात्ममत्रेन्द्रियं स्यात्तत्पर्यायः
तत्प्रवृत्तिं जनयति च ततः स्वाधिदैवोधिभूतम् । स्यादं त्रिगुणैवं यदनुगतमनुध्येयमा
त्मस्वरूपं तत्र तत्तस्य तिष्ठाम्य हृमभिमुखत्वहृमे प्रोक्तमेतत् ॥ ४ ॥

परमार्थप्रपा टीका ॥

अथ सर्वोपायापेक्षया ज्ञानयोगिनः पदोत्तमपदप्राप्तिमाह । वेदे
ष्विति वेदेष्वध्ययनादिना यागेषु ज्योतिष्टोमादिषु तपस्सु कृच्छ्रचान्द्रायणादि
नू० षु तुलाभारादिषु यदुक्तमार्गप्रापकं फलं प्रदिष्टं तद्योगी विदित्वा ज्ञानी भू
त्वा सर्वमप्यतिक्रम्य आद्यं परमुत्कृष्टं स्थानं प्राप्नोतीति विष्णोः परं प्राप्नोति २८ प्रा०
इति श्रीपरमार्थप्रपा टीकायामष्टमोऽध्यायः ८ ॥

वनमाली टीका ॥

पुनः श्रद्धावद्भ्यर्थं योगं स्तौति योगी च ब्रह्मादिकं समग्रमतिरूपेण हार्दे
णोक्तमनुष्ठानपर्यन्तं विदित्वा वेदेष्वध्ययनादिना यज्ञेष्वनुष्ठानादिना त
पःसु कायक्लेशादिना दानेषु सत्पात्रत्यागादिना
यत्पुण्यफलं शास्त्रेणोपदिष्टम् तत्सर्वमत्येति अतिक्रामति न केव
लं तदतिक्रामति परं सर्वोत्कृष्टमप्राकृतं दिव्यं भगवदेकसाधारणं
श्रीवैकुण्ठाख्यं स्थानं लोकमुपैति यद्वा शाश्वतं स्थानं सर्वजगदाधारं
मां सर्वेश्वरमाद्यं सर्वकारणं प्रसन्नं सन्तमपरोक्षतया निहतनिःशेषाविद्यः
सन् प्राप्नोतीत्यर्थः यद्वा परं सर्वोत्कृष्टं स्थानं वैकुण्ठाख्यं लोकं च पुनराद्यं
सर्वकारणं मां च प्राप्नोतीत्यर्थः लोकविशेषस्य मत्प्राप्त्याविर्भूतस्वरूपा
न्तः सन् विदेहकैवल्यं प्राप्य दिव्यविग्रहयुक्तः सन् यथाकामं विहर
तीति भावः २८ इति गीतावनमालीटीकायामष्टमोऽध्यायः ८ ॥

क्रमवैजयन्ती टीका ॥

एवं मार्गद्वयं निरूप्याथेदानीं सप्तमाष्टमाध्यायद्वयोक्तं यज्ज्ञानं तत्फल
माह वेदेष्विति वेदेषु प्राप्तोपनयनादिद्विजत्वसंस्कारपूर्वकं प्रमदमा
दिसाधनसदाचरणब्रह्मचर्याश्रमोचितव्रतनिष्ठत्वादिगुणयुक्तगुरु
सेवादिविधिना पदक्रमजटाद्यनुक्रमेण च सम्यक् षडङ्गादिचतुर
धीतेषु यज्ञेषु सर्वाङ्गोपक्रमोपसंहारेण सम्यगनुष्ठितेषु तपस्सु काय
शोषणेन्द्रियदमनसत्यभाषणशीतातपादिद्वन्द्वसहनादिनाशा
स्त्रोक्तविधिना सम्यक्चरितेषु दानेषु देशकालपात्रादिविचारेणाश्र
द्धया सम्पादितेषु च शब्दः पुनरर्थकः सर्वेषां वेदादीनां पृथक्त्वं ज्ञापयति
एवं कारेण वर्णाश्रमाचारव्रतादीनां संग्रहः सूचितः यत्पुण्यफलं प्रदि

गी·
टी· अ·

[illegible]कामुष्मिकसुखभोगलक्षणं प्रदिष्टमुक्तं तत्सर्वं सुखं विलक्षणत्वमत्वा अत्येत्य
तिक्रमति किं कृत्वा इदमध्यायद्वयोक्तमन्तस्य सप्तमष्टकेस्य माहात्म्यं विदि
त्वा ज्ञात्वा योगी मत्स्वरूपादिज्ञानी मद्भक्तः प्रमत्तावरममाद्यं कं च पुनः आ
द्यं सर्वेषां कारणानामपि बीजभूतं जरामरणादिजन्यदुःखशून्यं भगवतो म
म स्थानं वैकुंठाख्यमुपैति प्राप्नोति २८ इति ऊसमवैजयन्तीटीकायामष्टमोऽध्यायः

कृत्स्नभक्ताः कृत्स्नभक्त्या कृत्स्न
माहात्म्यवेदिनः कृत्स्नया
लीलया नैवेत्यद्वमेवद्वनोमितम्

पुनः अज्ञाहृज्ज्ञार्थं योगं स्तौति —

मधुसूदनी टीका ॥

वेदेषु दर्भपवित्रपाणित्वप्राङ्मुखत्वगुर्वधीनत्वादिभिः सम्यगधीतेषु यज्ञे
षु साङ्गोपाङ्गसाद्गुण्येन श्रद्धया सम्यगनुष्ठितेषु तपःसु शास्त्रोक्तेषु मनोबुद्ध्याद्ये
काग्र्येण श्रद्धया सुतप्तेषु दानेषु तुलापुरुषादिषु देशे काले पात्रे च श्रद्धया
सम्यग्दत्तेषु यत्पुण्यफलं पुण्यस्य धर्मस्य फलं स्वर्गस्वाराज्यादि प्रदिष्टं शा
स्त्रेण अत्येति अतिक्रामति तत्सर्वमिदं सप्तप्रश्ननिरूपणद्वारेणोक्तं
विदित्वा सम्यगनुष्ठानपर्यन्तमवधार्य अनुष्ठाय च योगी ध्याननिष्ठः न के
वलं अतिक्रामति परं सर्वोत्कृष्टमैश्वरं स्थानमाद्यं सर्वकारणं उपैति
प्रतिपद्यते च सर्वकारणं ब्रह्म प्राप्नोतीत्यर्थः तदनेनाध्यायेन ध्येयत्वे
न तत्पदार्थो व्याख्यातः २८ इति मधुसूदनीटीका अष्टमोऽध्यायः ८ ॥

सदानंदी टीका ॥

पुनः अज्ञाविष्ठज्ञार्थं योगं स्तौति रमापतिः वेदोक्तव्रतसंदोहैरधीतेष्वाग
मेषु च सांगोपांगेषु यज्ञेष्वश्रद्धयानुष्ठितेषु च शास्त्रोक्तेषु सुतप्तेषु तपःसु स्वे
कान्यया धिया देशे काले च पात्रे च तुलापुरुषकादिषु सम्यग्दत्तेषु यत्पुण्य
फलं स्वर्गादिकं स्मृतं श्रौतैः स्मार्तैः पुराणैर्वा तत्सर्वमतिगच्छति योगी सम्यगि
दं सप्तप्रश्नद्वारेण कीर्तितं ज्ञात्वा सम्यगनुष्ठानपर्यन्तमवधार्य च ध्यान
निष्ठो ह्यनुष्ठाय प्रकृष्टं वैष्णवं पदं सर्वाधिष्ठानमानंदसुखेन प्रतिपद्यते ध्ये
येनानेनाध्यायेन व्याख्यातस्तत्पदार्थो यथातथं यो वेदान्तेषु रामात्मा वङ्गस्तुकीर्तितो
ध्येय आनंदकंदो [illegible] अद्याराचरमचरमिदं कल्पितं यत्र पा
च न्तिये प्राप्याहुर्निमून्यावर्ततिमूप्रमे स्वमहिम्न्यात्मनि तिष्ठन्तं श्रीकृष्णमुकुंदं
स्मितमधुरमुखं सर्वदा संश्रयेऽहं २८ इति सदानंदीटीकायामष्टमो
ध्यायः ॥

नीलकंठी टीका ॥

पुनः श्रद्धाभिवृद्धये योगं स्तौति वेदेष्विति वेदेषु सम्यगधीतेषु
यज्ञेषु तपःसु च सम्यगनुष्ठितेषु दानेषु च सम्यग्दत्तेषु यत्पुण्यं तत्
फलं चेति पुण्यफलं सर्वेषु समनुष्ठितेषु यत्प्रदिष्टं शास्त्रेषु तत्सर्वं
योगी अत्येति अतिक्रामति अतिकाय ब्रह्मलोकं प्राप्नोतीत्यर्थः किं
कृत्वा इदं पूर्वोक्तमुपासनं विदित्वा ज्ञात्वानुष्ठाय च ततश्च किमि
त्यत आह यत्स्थानं निर्विशेषं ब्रह्म उपैति प्राप्नोति च क्रमेणेत्यर्थः
आद्यं न त्वकेन चिन्निर्मितं तदनेनाध्यायेन ध्येयस्तत्पदार्थो व्या
ख्यातः अग्रिमेध्याये ज्ञेयं ब्रह्म व्याख्यास्यतीति २८

आनंदी टीका

अत्र फलातिशयदर्शनेन श्रद्धां जनयति
एतद्विदित्वा तत्सर्वमत्येति अभिभवति सर्वेषां शुभाशुभानां कर्म
णां तत्फलानां वा भगवत्स्मरणेनैव परित्यागात् तत्परित्यागे चासौ
निरायासमेव विन्दति परमानन्दमिति २८ इति श्रीभगवद्गीता
अष्टमोध्यायः ८

रामकेटी टीका

इदं प्रश्नसप्तकव्याकरणरूपं वस्तु विदित्वा ज्ञात्वा यथोक्तसमा
धिस्तत्सर्वं वेदाध्ययनयज्ञतपोदानाद्यन्तर्वर्तिपुण्यक्रियाफलम
त्येत्यभिक्रामति यत आद्यमनुत्तरमत एव परमनन्तानन्दमय
त्वादसत्कृष्टं स्थानं धामोपैति प्राप्नोति परमात्मनि स्वाभाविकीं
प्रतिष्ठां लभत इति यद्यप्येवं केश्चिदयमर्थो व्याख्यातः यथा
मुयेव हृत्योत्तरायणकालसामग्र्या प्रयाता ब्रह्मविदोर्चिरादिसं
ज्ञालोकान्तराक्रमणक्रमेण ब्रह्मप्राप्नुवन्ति योगिनश्चात एव
योगिशब्देनोक्ताः दक्षिणायनकालसामग्र्या प्रयातास्सतस्त्वाद
मसंज्योतिः प्राप्य धूमादिसंज्ञलोकान्तराक्रमणक्रमेण संसार
आवर्तन्त इति पूर्वोक्तयुक्त्या वैतदपि व्याख्यानं संगच्छेत यथोक्त ने॰
युक्त्या चायमपि क्रमो नयोरेव गत्योरन्त भगवतीति केचिन्मन्यते
तदत्र परमार्थविदिनः प्रमाणं गंभीरैर्विपुलैः स्वभावविमलैः श्री
मत्पदार्थोज्वलैः स्फीतासमभिरंबुराशिभिरिव ब्रह्मादिभिर्वक्त्र
भिः अध्यायस्यनरोष्टमस्याविहृतिं दृष्ट्वी मिमामंजसा यः स्वीक

गी॰ टी॰ अ॰

त्युमलं स्पव विद्वषां साम्राज्यमेकोर्हति २८ इति श्रीराजान
करामविरचिते वाक्यार्थान्वयमात्रे सर्वतोभद्रनाम्नि भगव
द्गीताविवरणेऽष्टमोध्यायः ८

नासिकी [illegible] टीका

यद्योक्तस्याध्यायार्थस्य प्रभावमाह ॥

वेदेष्वध्ययनादिना यज्ञेष्वनुष्ठानादिना तपःसु सकायशोषणा
दिना दानेषु सत्पात्रार्पणादिना यत्पुण्यफलं तज्ज्ञाने दाधिष्ठाना
146
भूतस्वर्गादिप्राप्तिरूपं शास्त्रेषूपदिष्टं इदमध्यायोक्तमर्थं विदित्वा
नुभूय योगी नित्यावहितस्तत्सर्वमत्येति अलौकिकमानंदमश्नुते
जीवद्दशायां ततो देहत्यागानन्तरं परं स्थानमाद्यं जगन्मूलभूतं स्था
नं यामेश्वरं रूपमुपैत्यात्मत्वेन प्रतिपद्यते चेत्यर्थः जीवन्मुक्तेः लभ
त्वमात्मस्पशाहयोहरिः विदेहमुक्तिभुक्तिं तत्त्वेनान्तेप्राप्नुयामहं
२८ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृ
ष्णार्जुनसंवादे [illegible] मक्षरनिर्देशोनामाष्टमोध्या
यः ८

तत्त्वप्रकाशिकाख्यायां राजानकलक्ष्मीरामविरचितायां

पंचोलेटीका

साध्यायार्थमष्टप्रश्नार्थनिर्णयं च योगमफलमुपसंहरति वेदे
ष्विति वेदेषु सम्यगधीतेषु यज्ञेषु यथावदनुष्ठितेषु तपःसु तप्तेषु दा
नेषु सम्यग्दत्तेषु यत्पुण्यफलं प्रदिष्टं भवति योगी तदिदं सर्वं वेदा
दिसाधनरमार्गेश्वररूपं समप्रश्ननिर्णयद्वारेण विदित्वा अनुष्ठीय
अत्येति अतिक्रम्य गच्छति च पुनः परमं तत्कष्टमेश्वरं स्थानं आद्यं
आदौ भवं कारणं ब्रह्मरूपं इति प्रपद्यते २८ ॥ इति श्रीभगवद्गीता
सूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे पंचो
लेटीकायां अष्टमोध्यायः ८ ॥

भागवीरमसिद्धायिनी ॥

अथोक्तलक्षणस्य हि प्रकाशस्य योगस्य प्रभावं कथयन्नध्यायार्थमु

पसंहरति वेदेष्विति यदिदमध्यायप्रतिपादितं प्रश्नसप्तकव्याक
रणरूपं वस्तु विदित्वा गुर्वादिभ्यः सकाशाद्विज्ञाय योगी यथोक्त
कालानतिक्रमेणारिष्टमतिक्रांतयागः कर्मकृत्फलः प्रोक्तलक्षण
साम्ययोगारूढस्सन्तत्सर्वं फलमंतवत्तत्तल्लोकसुखं प्राप्नोति किंच
परं सर्वोपरि वर्तमानत्वादतिरूढं श्रेष्ठं च अद्यमनुत्पत्तिविनाशरहि
तत्वेन नित्यं स्थानमर्थान्ममसंबंधि धामउपैति प्राप्नोति किं तत्फ
लं योगी अतिक्रामति वेदेषु ऋगादिषु चतुर्ष्वधीतेषु यज्ञेष्वश्वमे
धादिषु इष्टेषु तपस्सु कृच्छ्रादिषु तप्तेषु दानेषु स्वर्णभूम्यादिषु द
त्तेषु वेदविद्भिर्यत्पुण्यफलं पुण्यक्रियाफलं प्रदिष्टं कथितमस्ति
एवं चैतत्सर्वं यज्ञानस्य फलमीदृशमस्ति किमु वक्तव्यं तदनुष्ठान
स्येति भावः २८॥ इति श्रीरणवीरसमिद्धायिन्यां श्रीगीताव्या
ख्यायामष्टमोऽध्यायः ८॥

मधुभाष्य

२८ इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचिते श्रीम
द्गीताभाष्येऽष्टमोऽध्यायः ८॥

147

भाषा अनुवाद ॥

अध्याय का अर्थ स्वरूप आठ प्रश्न का अर्थ निर्णय फलके सहित कहते हैं कि वेदों मे अध्ययन केद्वारा और यज्ञों मे अनुष्ठान द्वारा औ तपसों मे शरीर शोषण के द्वारा औ सर्व दान मे सत्पात्र के अर्पण से जो उत्तम पुण्यफल सब शास्त्रों नेकहा है इस फल को उल्लंघन करि योगी श्रेष्ठ योगरूप ऐश्वर्य को प्राप्त होताहै अर्थात् परमपद पावतेहैं २८ इतिश्रीभाषा अनुवादेअष्टमोध्यायः ८ ॥

दोहा

निगम यज्ञ तपदान मे कहापुण्यफल जोय तासम योगी
लखिलहैं आदिपरम गति सोय २८ इतिश्री ॥

148